CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सरस्वतीसेवा
७

मायाजालम्

हिन्दीमूलम्- गुरुदत्तः
संस्कृतानुवादः- डा. कैलासपतिः झा

संस्कृतभारती
नवदेहली

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'सरस्वतीसेवा' योजना-७

मायाजालम्

हिन्दीमूलम्

गुरुदत्तः

अनुवादकः

डा. कैलासपतिः झा

Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya * Bharatiya Vidya

संस्कृतभारती

नवदेहली

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रकाशनम्

संस्कृतभारती
मातामन्दिरगली, झण्डेवाला
नवदेहली - ११० ०५५

© प्रकाशकस्य एव।

प्रथममुद्रणम् २०११

प्रतिकृतयः १०००

मूल्यम् - रू. ५५.००

मुद्रणम् -

नन्दी प्रोसेस्

त्यागराजनगरम्, बेङ्गलूरु- ५६० ०२८

ISBN - 978-81-87276-82-7

Bhawan's Sri Sankarachary ... Mahavidyalaya ...

MAAYAAJAALAM -

The Beautiful novel based on village life written by sri Gurudatta. translated by Dr. Kailasapati Jha. Publisher- Samskrita Bharati, Mata Mandira Gali, Jhandewalan, New Delhi- 110055.
Tel. & Fax-011-23517689

Pages - vi + 209 Price - 55/- First Print - January- 2011

Printed at : **Nandi Process,** Bangalore - 28 Ph : 26772292, 26766242

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रायोजनम् -

रामकृष्णजयदयालडालमिया-श्रीवाणीन्यासः

४, सिन्धिया हौस्

नई दिल्ली - ११० ००१

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्राक्कथनम्

यदा पुस्तकस्य अस्य पाण्डुलिपिलेखनं पूर्णं जातं तदा कश्चन सुहृत् तत् पूर्णं पठित्वा विस्मयेन लेखकस्य मुखम् अपश्यत्। तेन प्रकटितः विस्मयभावः स्वाभाविकः एव आसीत्। कश्चन शिक्षितः, अनुभवी च लेखकः इन्द्रजालसदृशीं सामान्यां क्रीडाम् अधिकृत्य किं वक्तुम् इच्छति इति सः न अवगतवान्। अद्यतने कथ्यमाने उन्नते समाजे एतादृशविषयाणां चिन्तनं लज्जास्पदं मन्यते।

किन्तु एषः तु उपन्यासः। पात्रं स्थानं वातावरणम् इत्येतानि तु अत्र मूलविषयं प्रकटयितुं कल्पितानि भवन्ति। यथा शर्करायुक्ते पानके सुवासस्य यत् अस्तित्वं भवति, कस्याञ्चित् सुन्दर्यां शृङ्गारस्य यत् अस्तित्वं भवति च, तथैव उपन्यासे एतानि काल्पनिकानि भवन्ति।

तथापि कल्पनाः पाठकानां बुद्धिपरिधौ एव भवेयुः। तेषां विषयाणां लेखने अत्यन्तं जागरूकता आवश्यकी भवति। ते विषयाः कस्यचन सामान्यस्य जनस्य बुद्धेः सीमारेखायाः समीपवर्तिनः भवेयुः। किञ्चित् अपि इतस्ततः क्रियते चेत् कथायाः अस्वाभाविकता प्रकटीभवति। कदाचित् कथाकारेण स्वस्य कल्पनाः नियन्त्रयितव्याः अपि भवन्ति। यदि लेखकः चतुरः अस्ति तर्हि कदाचित् तेन पाठकानां बुद्धिक्षेत्रं विस्तारयितुम् अपि प्रयतितव्यं भवति।

अतः एव अस्मिन् पुस्तके यत्र सम्मोहिनी विद्या, योगसाधना इत्यादीनां साधनानां वर्णनम् अस्ति, तादृशं भागं दृष्ट्वा विस्मयकरणस्य आवश्यकता नास्ति। कस्यचित् कृषकस्य वणिजः वा जीवनसम्बद्धकथालेखनस्य यः आशयः भवति, सः एव अत्र अस्ति। इदं जगत् मायास्वरूपम् अस्ति। माया इत्यस्य अर्थः मिथ्या इति न भवति। यत् वस्तु यथा दृश्यते तथा तत् वास्तविकरूपेण न भवति इत्येव मायापदस्य अर्थः। विज्ञानं ज्ञानं च एतम् एव परिणामं प्रति मानवं नेतुं प्रयत्नरते स्तः। एते द्वे मानवं जगतः वास्तविकस्वरूपस्य निरूपणार्थं यत्नं कुरुतः।

जगतः वास्तविकं स्वरूपं किम्? एतस्य उत्तरम् अत्यन्तं कठिनम् अस्ति। भगवान् श्रीकृष्णः गीतायां, ततः पूर्वम् अपि वेदाः वेदाङ्गानि च एतस्य स्वरूपस्य वर्णनं कर्तुं यत्नम् अकुर्वन्। मानवस्य बुद्धिः अन्धकारे प्रकाशमानः दीपकः इव भवति। मानवः तस्य दीपकस्य प्रकाशे तावत् दूरम् एव द्रष्टुम् अर्हः, यावत् दूरं दीपकस्य प्रकाशः गच्छति। बुद्धिरूपिदीपकम् इतोऽपि ज्योतिर्मयं कृत्वा मानवः बहुदूरं यावत् दृष्टेः सामर्थ्यं प्राप्तुं शक्नोति। बुद्धिविकासः अपि कश्चन सामान्यः विषयः न। एतदर्थं बहुः प्रयत्नः आवश्यकः। कदाचित् जन्मान्तरम् अपि प्रयत्नः आवश्यकः भवेत्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

योगसाधना एतस्मिन् प्रयत्नकरणे अतीव साहाय्यिका भवति।

मानवस्य शरीरं पञ्जरम् इव भवति, यत्र सुन्दरः शुकः उपविष्टः अस्ति इत्येतत् यदा मानवेन हृत्पूर्वकम् अङ्गीक्रियते तदा तस्य दृष्टिः सर्वथा परिवृत्ता भवति। शुकः अर्थात् आत्मा प्रमुखः भवति। पञ्जरम् अर्थात् एतत् शरीरं बाह्यः प्रपञ्चः च गौणः भवति। यद्यपि शुकः स्वस्य पञ्जरस्य सौन्दर्यं पश्यन् प्रसन्नतायाः अनुभवं कर्तुं शक्नोति तथापि अनुभूयमाना सा प्रसन्नता मिथ्या अस्ति। सा तस्य लाभप्राप्तये साहाय्यिका न भवति।

पञ्जरं सुन्दरं कर्तुम् एव प्रयत्नशीलः कश्चन वणिक् कापट्यम् आचरन् गणनापुस्तके मिथ्यागणनां करोति। तदर्थम् एव कश्चन चोरः चौरकर्म करोति। कश्चन यन्त्रागारस्वामी सहस्रस्य सेवकानां माध्यमेन तदर्थम् एव अहर्निशं धनम् अर्जयन् भवति। कोऽपि अपरेण सह कलहं कृत्वा तदर्थमेव स्वस्य स्वार्थं साधयति। यदा जगत् मुख्यम् इति मत्वा आत्मोन्नतिं गौणरूपेण अङ्गीक्रियते तदा एव एतत् सर्वं भवति।

वैदिकः धर्मः वैदिकी संस्कृतिः वा जगदात्मनोः भेदं स्पष्टीकृत्य आत्मा प्रमुखः, इदं जगत् च गौणम् इति चिन्तयति।प्रापञ्चिकं वैभवम् अन्यविधम् ऐश्वर्यं च आत्मोन्नत्यै साधनरूपेण एव अङ्गीक्रियते। प्रापञ्चिकी उन्नतिः स्वल्पप्रमाणेन आत्मोन्नत्यै साहाय्यिका भवति। किन्तु यदा एषा सीमोल्लङ्घनं करोति तदा वैदिकधर्मः अङ्गुल्या सङ्केतं कुर्वन् इव निर्दिशति यत् अग्रे गमनं मास्तु।

वर्तमानयुगं प्रपञ्चस्य असीमितायाम् उन्नतौ यत्नशीलं दृश्यते। युगधर्मः आत्मोन्नतेः विषये सर्वथा मौनम् अवलम्बते। एषा अवैदिकी प्रवृत्तिः अस्ति। एतादृशं चिन्तनम् अनर्थमयं भवति। एतद्विधं चिन्तनं मानवम् उन्नतेः स्थाने अवनतिं प्रति नेतुं यत्नशीलं भवति।

जगत् साध्यं न, साधनम् अस्ति। एतादृशं दृढं चिन्तनं यदा भवति तदा कार्यं सत्यमार्गं प्रति गच्छति। ततः आत्मतुष्टिः आनन्दः वा यः प्राप्यते सः अवर्णनीयः भवति।

एतस्य विस्मयरूपस्य विशालचिन्तनस्य किञ्चित् सीमितम् अंशम् आधारीकृत्य 'मायाजालम्' इति लिखितम् अस्ति। अत्र लेखकः कियत् साफल्यं प्राप्नोत् इति पाठकाः एव वक्तुं शक्नुवन्ति।

उपन्यासे स्थानं नाम कालः इत्यादयः काल्पनिकाः भवन्ति। अत्रापि तथैव अस्ति। प्रेम द्वेषः मोहः घृणा इत्यादयः भावाः अत्र अभिप्रेताः न सन्ति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अध्यायसूची

१. ग्रामः १

२. नगरस्य रीतिः ३६

३. सङ्कटकाले सहयोगिता ८५

४. मायायाम् आधिपत्यम् १२३

५. निर्वाणदीपे किमु तैलदानम् १६८

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ग्रामः

१

यावत् दूरं दृष्टिः गच्छति स्म तावत् पर्यन्तं क्षेत्राणि प्रसृतानि आसन्। ग्रामतः बहिः स्थित्वा पश्चिमां दिशं प्रति दर्शनेन एवं भाति स्म यत् क्षेत्राणां प्रसारणं बहु दूरपर्यन्तम् अस्ति, यत्र आकाशः भूम्या मिलति। मध्ये कुत्रचित् बबूलवृक्षाः सिस्सवृक्षाः आम्रवृक्षाः च प्रहरिणः इव क्षेत्रेषु स्थिताः आसन्। एते वृक्षाः विस्तृतक्षेत्रस्य दर्शने बाधकाः न आसन्। अपि तु ते तस्य इतोऽपि समीचीनतररूपेण दर्शनं कारयन्ति स्म।

ग्रामात् बहिः काचित् वाटिका आसीत्। तत्र कश्चनः कूपः आसीत्। तस्मिन् जलसंयन्त्रं स्थापितम् आसीत्। तत् यन्त्रं मङ्गलनामकस्य कस्यचन ग्राम्यभ्रातुः वृषभाः चालयन्ति स्म। एतेन जलयन्त्रेण सर्वेषां ग्रामीणानां कृते पानार्थं स्नानार्थं वस्त्रक्षालनार्थं च जलवितरणव्यवस्था आसीत्। वाटिका अपि आर्द्रताकारणेन हरिततरुलताभिः आच्छादिता आसीत्। सा वाटिका ननकोः आसीत्। यद्यपि ननकुपितामहः शतात् वर्षेभ्यः पूर्वं दिवङ्गतः तथापि तस्य नाम्ना एवं सा वाटिका प्रसिद्धा आसीत्। तत्र अधिकांशतः आम्रवृक्षाः आसन्। एकस्मिन् भागे अल्पभूम्यां सेवन्तिका जाती मल्लिका इत्यादीनां पुष्पाणां पादपाः अपि आसन्। एतानि पुष्पाणि वाटिकायां कस्मिश्चित् भागे विद्यमाने मन्दिरे देवपूजार्थम् उपयुज्यन्ते स्म। कदाचित् ग्रामे कस्यापि गृहे पूजोत्सवः भवति स्म, तदा सः वाटिकातः एव पुष्पाणि नयति स्म।

वाटिकायाः पूर्वदिशि ग्रामः आसीत्। तत्र प्रथमं गृहं मङ्गलस्य आसीत्। आविंशतेः वर्षेभ्यः एषा परम्परा आसीत् यत् प्रातः काले मङ्गलस्य पितुः गृहात् वृषभयुगलम् आगत्य जलसंयन्त्रं चालयति इति। यन्त्रस्य "चीं चीं" इति शब्दं श्रुत्वा ग्रामीणाः जनाः, नार्यः, बालाः, वृद्धाः च नित्यक्रियायाः निवृत्त्यर्थं गृहात् बहिः आगच्छन्ति स्म। जलसंयन्त्रतः पात्रेषु जलं पूरयित्वा शौचं कर्तुं क्षेत्राणि प्रति गच्छन्ति स्म। ततः आगत्य मुखक्षालनं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्नानं च कृत्वा, शिवालये जलं समर्प्य गृहं प्रति आगच्छन्ति स्म।

ये पुरुषाः क्षेत्रेषु कार्यं कर्तुम् इच्छन्ति स्म ते प्रातःकालात् पूर्वं ब्राह्ममुहूर्ते एव किञ्चित् अन्धकारे शौचादिकर्म समाप्य, स्कन्धयोः हलं संस्थाप्य, वृषभाणां प्रणोदनं कुर्वन्तः क्षेत्राणि प्रति गच्छन्ति स्म। एतेषां पश्चात् द्वितीयः पर्यायः ग्रामस्य स्त्रीणाम् आसीत्। तासां निवृत्तेः अनन्तरम् अन्ते वयोवृद्धाः जनाः कूपसमीपम् आगच्छन्ति स्म। इत्थं सूर्योदयतः एकं प्रहरं यावत् सर्वेषां दैनन्दिनं कर्म पूर्णं भवति स्म। तत्पश्चात् वृषभाः जलसंयन्त्रतः मुक्ताः भवन्ति स्म। ते पुरतः विद्यमानं बुषं अन्नकणान् च खादित्वा आम्रवृक्षाणाम् अधः उपविश्य च मुखेन रोमन्थनं कुर्वन्ति स्म।

मध्याह्नसमये ग्रामस्त्रियः स्वपुरुषाणां कृते क्षेत्राणि प्रति भोजनं नयन्ति स्म। पतिं भोजयित्वा प्रत्यागच्छन्ति स्म। भोजनशालातः तिस्रः चतस्रः वा रोटिकाः, तासाम् उपरि मेथिकायाः, आलुकस्य च शाकं तथा च पूर्णं पात्रं दाधिकम् आनयन्ति स्म। एतत् सर्वं कृषिक्षेत्रेषु कार्यं कुर्वतां पुरुषाणां भोजनम् भवति स्म। ये पुरुषाः सूर्योदयतः मध्याह्नपर्यन्तं कार्यं कुर्वन्ति स्म ते एव एतादृशं भोजनं प्राप्नुवन्ति स्म। मध्याह्नस्य पश्चात् वृषभाः अपि मुक्ताः भूत्वा बुषं खादित्वा च रोमन्थनं कुर्वन्ति स्म। श्रमकारणतः ते अनुक्षणं निद्रां कुर्वन्ति स्म। क्षेत्रेषु कार्यं कुर्वतां जनानां कृते अपि घण्टाद्वयस्य समयः विश्रामार्थं भवति स्म। अतः ते अपि वृक्षस्य अधः वस्त्रप्रसारणं विनैव भूम्यां निद्रां कुर्वन्ति स्म। भोजनतः प्राप्यमाणेन उल्लासेन अथवा षड्घण्टापर्यन्तं यत् श्रमयुक्तं कर्म कृतं भवति, तस्मात् कारणात् ते वा श्रान्तिम् अपनयन्ति स्म।

घण्टाद्वयस्य विश्रामस्य पश्चात् पुनः क्षेत्राणि कर्षन्ति स्म। हलानि “खुसुर - खुसुर” इति ध्वनिम् उत्पादयन्ति स्म। कदाचित् क्षेत्रेभ्यः तृणनिष्कासनम् आवश्यकं चेत् दात्रं स्वीकृत्य षड्घण्टापर्यन्तं कण्ठम् अवनमय्य परिश्रमं कुर्वन्ति स्म।

इत्थं नैकेषु मासेषु श्रमस्य कारणात् यदा उत्पादनं पक्वीभूय सज्जं भवति स्म तदा कृषकाः सस्यकर्तनं कृत्वा गृहम् आनयन्ति स्म। गृहम् आनीतवतां तेषां तावान् आनन्दः, यावान् आनन्दः परिश्रमकर्तृषु भवति। तेषां कियान् आनन्दः इति चिन्तयितुं न शक्यते।

ग्रामः विश्वस्य कश्चन लघुः भागः इति अस्माभिः अवगन्तव्यम्। विश्वे सुखं दुःखं शोकः आनन्दः कामः मोहः लोभः अहङ्कारः इत्यादयः विद्यमानाः मनोभावाः ये भवन्ति ते अस्मिन् ग्रामे अपि आसन्। यथा एकेन पक्वेन कणेन द्विदलं पक्वम् इति ऊहितुं शक्यते तथैव कस्यचित् एकस्य ग्रामसमाजस्य अध्ययनेन मानवसमाजस्य अवगमनं भवितुं शक्यते।

Funding by IKS-MoE

वैशाखमासस्य अन्तिमानि दिनानि आसन्। मङ्गलः गोधूमसस्यं कर्तयित्वा,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चयनं कारयित्वा च गृहम् आनीतवान्। ग्रामस्य कार्मिकाः तस्य सहायतां कुर्वन्ति स्म। कार्मिकाणां पर्यवेक्षणस्य दायित्वं मङ्गलस्य आसीत्। तस्य माता प्रीतो, धर्मपत्नी मोहिनी च खलस्य रक्षणं कुरुतः स्म।

अस्मिन् वर्षे मङ्गलः चत्वारिंशति बीघापरिमितायां भूम्यां गोधूमबीजम् उप्तवान् आसीत्। सहस्रं मनपरिमितम् अन्नोत्पादनस्य अपेक्षा आसीत्। सहस्रद्वयं परिमितं बुषं भवेत् इत्यपि अपेक्षा आसीत्। अतः विंशत्यधिकाः कार्मिकाः कार्यं कुर्वन्ति स्म। सस्यानाम् उत्पादनदिनेषु मङ्गलः एकम् अपि क्षणम् अवकाशाय न प्राप्नोति स्म। रात्रौ यदा सः गृहं प्रत्यागच्छति स्म तदा श्रान्तः सन् भोजनं कृत्वा, शयनात् ऋते किमपि कर्तुम् अशक्तः भवति स्म। तस्य माता पत्नी च गृहकार्याणि कुर्वत्यौ धान्यागारेषु अन्नं पूरयन्त्यौ तथा च धेनुवृषभौ निरीक्षयन्त्यौ एवं मग्ने आस्तां येन ते उभे शिरसः कण्डूयनं कर्तुम् अपि क्षणं न प्राप्नुतः स्म।

अन्नं गृहम् आगतम्। सुरक्षणम् अपि जातम्। बुषं बहिः एव स्थापितम् आसीत्। विस्तृतवक्षः उन्नतकण्ठः विशालमस्तकः वर्तुलाकारकः किन्तु सुदृढः भुजदण्डः पुष्टोरुः दृढपादः गृहीतदण्डः धृतधौतवस्त्रः मङ्गलः करांशुकं स्कन्धे अवलम्ब्य क्षेत्रतः आगच्छन् आसीत्। तस्य शिरसि किमपि उष्णीषं न आसीत्।

यदा मङ्गलः वाटिकामार्गेण गच्छन् आसीत् तदा तस्य दृष्टिः अनुजस्य रामोः उपरि पतिता। रामुः कूपस्य वेदिकायाम् उपविश्य दूरं क्रीडन्तीनां बालानाम् उपरि प्रस्तरखण्डान् क्षिपति स्म। मङ्गलः तु अद्य बहुः प्रसन्नः आसीत्। तस्य खलं गोधूमेन पूर्णम् आसीत्। बुषम् एतावत् जातं यत् स्थापयितुं स्थानम् एव न आसीत्। अस्मिन् वर्षे वृष्टिः अपि सम्यक् जाता। शैत्यम् अधिकं न आसीत्। ग्रामे कस्यचित् अपि रोगस्य प्रसारणं न जातम्। सः स्वस्थः आसीत्। तस्य क्षेत्रेषु कार्यं कृतवतां कार्मिकाणाम् अपि आरोग्यम् उत्तमम् आसीत्। एतादृशेषु सौभाग्यदिनेषु कस्यापि प्रसन्नता, तथा च भगवतः कृपायाः कृते कृतज्ञताप्रकटनं स्वाभाविकम् एव अस्ति। यदा सः दुकूलं करांशुकं धौतवस्त्रं च धृतवतीभिः बालाभिः सह कल्लोलं कुर्वन्तं रामुं दृष्टवान् तदा तस्य मनसि कश्चन विचारः आगतः। 'मन्दिरे देवदर्शनं कृत्वा गच्छामि चेत् सम्यक् भवेत्' इति। मङ्गलस्य पृष्ठतः बुषेन पूर्णं शकटद्वयं क्षेत्रतः गृहम् प्रति आगच्छति स्म। मङ्गलः रामुम् आहूतवान् "भोः! रामो!" इति।

"आम्, भ्रातः!" इति रामुः ततः एव कूपस्य वेदिकायाम् उपविशन् प्रत्युत्तरं दत्तवान्।

"अरे, आगच्छ! एतत् बुषं गृहं प्रापय। अहं तावत् मन्दिरतः आगच्छामि।"

Funding by IKS-MoE

"मम समयः नास्ति" इति रामुः लघुभिः प्रस्तरखण्डैः सह प्रस्तरखण्डक्रीडां

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुर्वतीनां बालानाम् उपरि एकं प्रस्तरखण्डं क्षिपन् उक्तवान्।

मङ्गलः प्रस्तरखण्डं क्षिपन्तं रामुं दृष्टवान् आसीत् इत्यतः समीपम् आगत्य पृष्टवान् "अत्र उपविश्य कीदृशं समरं जेतुम् इच्छसि?" इति।

"अहं न आगमिष्यामि भ्रातः!" इत्येतत् उक्त्वा सः एकं प्रस्तरखण्डम् इतोऽपि क्षेप्तुम् उत्थापितवान्।

एतस्मिन् अवसरे मङ्गलः बहुसमीपम् आगतवान्।

सः इदानीं रामोः प्रस्तरखण्डानां लक्ष्यभूताः क्रीडां कुर्वतीः बालाः अपि दृष्टवान्। "अरे! अरे! एतत् किं करोषि?" इति मङ्गलः हस्तम् उन्नीय प्रस्तरखण्डं क्षिपन्तं रामुं दृष्ट्वा उक्तवान्। रामुः तस्य वचनम् अशृण्वन् प्रस्तरखण्डेन प्रहारं कृतवान् एव। अस्मिन् पर्याये प्रस्तरखण्डः लक्ष्यभूतः जातः। कस्याश्चित् बालायाः शिरसि सः प्रस्तरखण्डः पतितः। तस्याः मुखात् "आह!" इति ध्वनिः श्रुतः।

मङ्गलाय एतत् सर्वं न अरोचत। सः कोपदृष्ट्या रामोः समीपम् आगत्य स्थितवान्। बालाः उत्थितवत्यः। ताः रामुं तदेकदृष्ट्या पश्यन्त्यः मङ्गलम् उक्तवत्यः- "पितामह! रामुः ताडयति।"

"किं रे! किमर्थम् एताः बालाः ताडयसि?"

"एताः माम् अपि क्रीडितुम् अवसरं न कल्पयन्ति।"

"वयम् उक्तवत्यः एव" इति काचित् बाला दूरे उपवने गुलीदण्डक्रीडायां मग्नान् बालकान् उद्दिश्य उक्तवती- 'तैः बालकैः सह क्रीड'।

"मम मनः एताभिः सह क्रीडितुम् इच्छति।" इति रामुः उक्तवान्।

मङ्गलः इतोऽपि कोपेन आविष्टः अभवत्। सः रामोः कर्णद्वयं सम्यक् आलोड्य उक्तवान् - "अरे गर्दभ! बालाभिः सह क्रीडितुं तव लज्जा नास्ति किम्? शिष्टः इव सर्वत्र व्यवहारं कुर्वन् भ्रमसि। किन्तु अत्र बलात् क्रीडायां सहभागी भवितुम् इच्छसि?" इति।

"आ..... आ.....!" इति रामोः मुखाद् कर्णद्वये आलोडिते जाते पीडामयः ध्वनिः निस्सृतः।

"वद पुनः एवं करिष्यसि?" इति मङ्गलः पृष्टवान्।

"भ्रातः! त्यजतु मां, नोचेत् अहं मातरं सर्वं वृत्तान्तं वदिष्यामि।" इति भापनं कुर्वन् रामुः उक्तवान्।

"मातरं वदिष्यसि? कं वृत्तान्तं वदिष्यसि?" इति मङ्गलः पृष्टवान्।

"एतत् एव। भवान् मां ताडयति इति।"

"तर्हि त्वं येन प्रस्तरखण्डेन बालां प्रहृतवान् तस्य किम्?"

"एताभिः बालाभिः सह भवतः कः सम्बन्धः? अहं यां काञ्चित् ताडयिष्यामि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एव" इति।

मङ्गलः एतत् उत्तरं श्रुत्वा आश्चर्यचकितः जातः। तस्य मनसि कश्चन विचारः स्फुरितः। सः रामुं ताडयेत् इति। किन्तु सः चिन्तितवान् यत् यत्किमपि रामुः इदानीम् उक्तवान्, कस्य पाठनस्य आधारेण? सः रामोः कर्णद्वयं त्यक्तवान्। मङ्गलः कूपस्य वेदिकायाम् उपविश्य रामुं पृष्टवान् - "त्वं यं कञ्चित् ताडयिष्यसि किम्?" इति।

"आम्" इत्येतत् उक्त्वा रामुः गृहं प्रति प्रस्थितः।

मङ्गलः तम् आहूतवान् "अरे, रामो! तिष्ठ!" इति।

रामुः स्वस्य कर्णद्वयस्य मर्दनं करोति स्म। सः भ्रुवौ वक्रीकृत्य अग्रजं दृष्टवान्। उत्तरदानं विना एव सः गृहं प्रति प्रस्थितवान्। एतावता बुषपूर्णं शकटद्वयं गृहस्य द्वारे आगतम् आसीत्। मङ्गलस्य मनः मन्दिरं गन्तुं निराकरोत्। सः तत्र एव कूपस्य वेदिकायाम् उपविशन् रामोः आचरणविषये चिन्तयितुम् आरब्धवान्।

एतत् किं प्रवृत्तम् इति सः मनसि चिन्तयन् आसीत्, किन्तु तत्क्षणम् एव द्विवङ्गतस्य पितुः स्मरणम् अभवत्। पिता मरणात् पूर्वं रामोः हस्तं मङ्गलस्य हस्ते स्थापयन् उक्तवान् आसीत् - 'मङ्गल! एषः बालकः मम अतीव प्रियः अस्ति। एतस्य किमपि कष्टं न भवेत्। एषः पुत्रः इव पालनीयः' इति।

एतत् सर्वं वर्षपूर्वं जातम्। रामुः इदानीं चतुर्थकक्षायां पठन् आसीत्। सः ग्रामात् क्रोशपरिमिते दूरे नगरस्य किञ्चन विद्यालयं पठितुं गच्छति स्म। अस्मिन् वर्षे आ बहुभ्यः मासेभ्यः क्षेत्रेषु कर्षणकार्यं क्रियमाणम् आसीत्, इत्यतः गृहस्य विषये चिन्तयितुं मङ्गलेन अवसरः एव न प्राप्तः। सः तावान् क्रियाशीलः जातः आसीत् येन अधिकं धनम् उपार्ज्य नूतनं गृहं निर्मातुं शक्येत। अपि च तत्र सर्वे वासं कर्तुं शक्नुयुः। तस्मात् कारणात् रामोः योगक्षेमं न विचारितवान् एव। अद्य तस्य विद्रोहात्मिकां प्रवृत्तिं दृष्ट्वा सः गभीरं विचारं कृतवान्। सः पितुः वचनं स्मरन् रामुं पुत्रम् इव पालयति स्म। इदानीं सः चिन्तयन् आसीत् यत् तेन भ्रष्टात् आचरणात् अनुजः कथं रक्षणीयः । एतदर्थं रामोः ताडनम् आवश्यकम्। किन्तु ताडनेन मातुः प्रतिक्रिया का भवेत्? सा रामौ बहु स्निह्यति स्म' इति। मङ्गलस्य मनसि मातुः कृते बहुः आदरभावः आसीत्। तर्हि 'किं करणीयम्'? इत्येतादृशाः विचारतरङ्गाः निरन्तरं तस्य मनसि स्फुरिताः अभवन्। सायङ्कालः जातः। अन्धकारः अपि प्रसृतः। मन्दिरस्य अर्चकः मन्दिरं पिधाय ग्रामं प्रति आगमनकाले कूपस्य वेदिकायाम् उपविष्टं मङ्गलं तत्समीपम् आगत्य पृष्टवान्- "मङ्गलभ्रातः! अत्र किमर्थं उपविष्टः अस्ति?"।

"अर्चकवर्य! अधुना सर्वम् अन्नं सङ्गृहीतं जातम्। मम मनः अपि प्रसन्नं भारमुक्तं च अस्ति। अतः एकान्ते उपविश्य भगवतः कृते धन्यवादम् अर्पयन् अस्मि।"।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"आम्, भ्रातः! भगवतः अनेके धन्यवादाः यत् अस्मिन् वर्षे अन्नोत्पादनं बहु सम्यक् अभवत्। ऋतुः अपि सम्यक् आसीत्। भवति भगवतः कृपा जाता इति ग्रामे सर्वत्र चर्चाविषयः जायमानः अस्ति।"

मङ्गलः मनसि चिन्तयन् आसीत् यत् रामुसदृशस्य आचारहीनस्य बालकस्य कारणतः मयि ईश्वरकृपा कथं भवेत्? इति। सः मौनम् आश्रितवान्। ततः अर्चकः उक्तवान्- "किन्तु, भ्रातः! एकं विषयं वदामि। अन्यथा मा चिन्तयतु"।

"अरे! अर्चकवर्य! भवान् किं वदति। अहं भवति बहु आदरं करोमि। भवान् मत्तः विद्यायाम् अनुभवे वयसि च श्रेष्ठः अस्ति। भवतः वचनस्य उल्लङ्घनं कदापि कर्तुं न शक्नोमि।"

"मङ्गलभ्रातः! समस्ते ग्रामे भवान् प्रशस्यमानः अस्ति। भवतः शीलस्वभावः शुद्धं चरित्रं दयाभावः च सर्वेषु प्रकटिताः सन्ति। किन्तु भ्रातः! एषः रामुः भवतः उज्ज्वलं यशः कलङ्कितं कुर्वन् अस्ति।"

"सः किम् अकार्यं कृतवान् अर्चकवर्य?" इति सातङ्कम् अपृच्छत् मङ्गलः।

अर्चकः बृजलालः किमपि वक्तुम् इच्छति स्म किन्तु वक्तुं न शक्तवान्। किञ्चित् विचार्य सः मनसि उत्पन्नान् विचारान् अवदत् एव- "भ्रातः! अहं ब्राह्मणः अस्मि। भगवान् मह्यं दीर्घां दृष्टिं दत्तवान् अस्ति। अहं पञ्चाङ्गं पश्यामि। हस्तस्य मस्तकस्य च रेखाभिः भविष्यतः ऊहां करोमि तथा च एतावति वयसि प्राप्तैः अनुभवैः संसारस्य स्थितिम् अपि अवगच्छामि। अहं कथयामि रामोः नियन्त्रणम् आवश्यकम्। तस्य पठनं बहु जातम्। अधुना तं प्रतिदिनम् आत्मना सह क्षेत्रं नयतु। द्वादशघण्टापर्यन्तं तद्द्वारा कार्यं कारयतु। नोचेत् घटः चिक्कणः एव भविष्यति। पुनः तत्र जलं पूरयितुं न शक्येत"।

मङ्गलः सर्वं जानन् अपि न अवगतवान्। सः उक्तवान् - "अर्चकवर्य! प्रहेलिकावचनेन मम किमपि अवगमनं न भवति। भवान् स्पष्टं वदतु यत् किं प्रवृत्तम्?"

"सुस्वादुभोजनस्य भक्षणेन रामुः ग्रामे अनावश्यकरूपेण कोमलः जातः अस्ति। राम! राम!, भ्रातः! भवान् तु स्वयं बुद्धिमान् अस्ति" इत्युक्त्वा बृजलालः अग्रे प्रस्थितः।

२

मङ्गलस्य पूर्णं नाम मङ्गलदासः, रामोः च रामदासः आसीत्। तयोः पिता दुर्गादासः बुद्धिमान् परिश्रमी कृषकः च आसीत्। स्वजीवने परिश्रमेण, विचारशीलतायाः व्यवहारेण च बहु साधितवान्। पूर्वं स्वल्पानां भूमिखण्डानां भूमिस्वामित्वं तस्य आसीत्। पश्चात् शतस्य बीघापरिमितानां भूमिखण्डानां भूस्वामित्वं तेन प्राप्तम्। दुर्गादासस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मरणकाले त्रयः सन्तानाः आसन्। द्वौ बालकौ एका बालिका च। मङ्गलः सर्वेषु ज्येष्ठः आसीत्। सोहनी मङ्गलात् पञ्चवर्षैः कनीयसी सोदरी आसीत्। रामुः सोहन्याः अपेक्षया वयसा दशवर्षैः कनीयान् आसीत्। सोहन्याः विवाहः नगरे एव जातः आसीत्। वरस्य पिता अन्नस्य बृहति आपणे वणिक् आसीत्। दुर्गादासः तस्य समीपे स्वस्य अन्नोत्पादनं विक्रयणार्थं कदाचित् गच्छति स्म। आपणे एव परिचयकारणतः एषः कुटुम्बसम्बन्धः प्रवृद्धः। मङ्गलस्य विवाहः दुर्गादासस्य मरणात् एकमासपूर्वं जातः। पत्नी मोहिनी, तस्य ग्रामस्य एव कन्या आसीत्। मोहिन्याः पिता तु कासाञ्चित् एव भूमीनां स्वामी आसीत्। विवाहस्य पश्चात् काचित् दुर्घटना घटिता। यदा मोहिन्याः शिबिका दुर्गादासस्य गृहम् आगता तत्समनन्तरम् एव तस्य कासः आरब्धः। सः कासः एव मासं यावत् पीडयन् दुर्गादासस्य प्राणान् अहरत्। अतः एव मङ्गलस्य माता भगिनी च मोहिनीम् अपशकुनम् इति भावयतः स्म।

दिवङ्गतस्य दुर्गादासस्य एतावता एकं वर्षम् अतीतम्। तावता मोहिन्याः दुर्दशा नितरां शोचनीया जाता। सा गृहे सर्वाणि कार्याणि करोति स्म। गोवृषभेभ्यः आहारदानम्, अन्नस्थापनं, गोदोहनं, दधिमथनं, नवनीतस्य निष्कासनम् इत्यादीनि सर्वाणि कार्याणि सा एव करोति स्म। तथापि तस्याः श्वश्रूः ताम् अदृष्ट्वा एव सम्भाषते स्म। समये कुसमये वा सा श्वश्र्वाः अपवचनानि अपि शृणोति स्म, यथा- डाकिनी श्वशुरं भक्षयित्री पिशाची इत्यादयः। यदा सोहनी मातृगृहम् आगच्छति स्म तदा तस्याः दुर्दशायाः तु पराकाष्ठा एव भवति स्म। एवं प्रायशः सर्वदा भवति स्म। एकदा सोहनी अवदत् - "मोहिनि! अहं तावत् दूरतः आगच्छामि। किं मम अल्पाहारविषये भोजनविषये च किञ्चित् चिन्तयति न वा?" इति।

"इदानीमेव आनयामि'' इत्यवदत् मोहिनी।

"इदानीमेव आनयामि! बहुः अभिमानः अस्ति। ओ! निर्धनस्य पुत्री धनिकस्य गृहम् आगतवती खलु" इत्येतम् आक्षेपं कुर्वत्यौ सोहनी तन्माता च रोदनं कुरुतः स्म। ततः सोहनी वदति स्म- "यदि त्वम् अस्माकं गृहं न आगमिष्यः तर्हि मम पिता अपि न अमरिष्यत्"

मोहिनी एतत् सर्वं श्रुत्वा अपि मौनेन सहनां करोति स्म। पत्युः कष्टं भवेत् इति धिया सा कदापि स्वकष्टविषये पतिं न उक्तवती। तस्मात् सा अतीव विनम्रीभूय सर्वैः सह प्रेममयं व्यवहारम् एव करोति स्म। यद्यपि सोहनी तस्याः माता च अपशब्दैः अनुचितं व्यवहारं कुरुतः स्म तथापि सा किमपि प्रत्युत्तरं न ददाति स्म। एकदा सा शनैः पतिम् उक्तवती आसीत्- "आवाम् एकं गृहं निर्मायाव किम्"?

"किमर्थम्" इति मङ्गलः पृष्टवान्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"सुखेन जीवितुं भगवान् धनं दत्तवान् अस्ति। मम इच्छा अस्ति यत् यथा नगरे सोहन्याः भगिन्याः गृहम् अस्ति तथैव आवां गृहं निर्मायाव तथा च तत्र वासं कुर्याव। भवान् मञ्चे उपवेक्ष्यति। अहं भवतः चरणसेवां करिष्यामि। उपवेष्टुं पृथक् एव प्रकोष्ठः भवेत् येन आवयोः बालाः अपि पितुः ऐश्वर्यस्य सुखं प्राप्नुयुः" इति मोहिनी स्वमतम् उपस्थापितवती।

"त्वं सत्यं वदसि मोहिनी! एतत् कार्यं कठिनं नास्ति। केवलम् एकवर्षं यावत् परिश्रमेण कार्यकरणस्य आवश्यकता अस्ति। यदि अहं दशसहस्रम् एव प्राप्नुयां तर्हि त्वं यथा इच्छसि तथा गृहनिर्माणं भविष्यति। किन्तु तावत् धनं सङ्ग्रहीतुं त्वया अपि अधिकः श्रमः करणीयः भवेत्"

"अहम् अहर्निशं परिश्रमं करिष्यामि। किन्तु कश्चन विषयः मया वक्तव्यः अस्ति। यदा गृहनिर्माणं पूर्णं भविष्यति तदा एव आवां सोहनीभगिनीं मातरं च वदेव"

"एवं किमर्थम्"?

"माता पुरातनवादिन्याः विचारधारायाः अस्ति। सा गृहनिर्माणं नाम धनस्य अपव्ययः इति भावयति। तस्याः पुरतः अहम् एतत् न वदिष्यामि यत् आवयोः मनः सुखेन जीवितुम् इच्छति" इति मोहिनी पुनः अवदत्।

मङ्गलः एतस्मिन् विषये सहमतिं प्रकटितवान्। सः एतस्मिन् पर्याये चत्वारिंशति बीघापरिमितायां भूमौ गोधूमबीजम् उप्तवान् आसीत्। सः एकाकी एव अहर्निशं परिश्रमं करोति स्म। यत् कार्यं दशजनैः मिलित्वा करणीयं भवति स्म तत् कार्यम् एकाकी एव करोति स्म। मोहिनी अपि अधिकं श्रमं कृतवती। एतेषु दिनेषु यदि श्वश्रूः ननान्दा च अपभाषणं कुरुतः स्म तर्हि सा एकेन कर्णेन श्रुत्वा अन्यस्मात् कर्णात् तत् निष्कासयति स्म।

सर्वेभ्यः कार्मिकेभ्यः सेवकेभ्यः च तेषां देयभागं दत्त्वा सहस्रमनपरिमितम् अन्नम् अवशिष्टम् आसीत्। बुषस्य कश्चन भागः अपि वितीर्णः। तथापि द्विशतं शकटपरिमितं बुषम् अवशिष्टम् आसीत्। एकस्मिन् शकटे दशमनपरिमितं बुषं स्थापितं भवति स्म। विपणौ एकस्य शकटस्य मूल्यं दश रूप्यकाणि आसन्। मङ्गलस्य पार्श्वे चत्वारि वृषभशकटानि आसन्। सर्वम् आकलय्य सः योजनां करोति स्म यत् वृष्टिकालात् पूर्वं कथञ्चित् सर्वं बुषं गोधूमं च विक्रयणार्थं विपणिं प्रति नेतव्यम् इति। तस्य ऊहा आसीत् यत् अनेन उत्पादनेन षट्सहस्रं सप्तसहस्रं वा रूप्यकाणि प्राप्येरन् एव।

सः कृषिकार्येण यत् धनं प्राप्नोति स्म तेषां संग्रहणम् अपि करोति स्म। स्वस्य भोजनस्य वस्त्रस्य च प्रबन्धनं गृहे एव कृतवान् आसीत्। मोहिनी तु आरात्रि तन्तुनिर्माणं करोति स्म येन गृहकुटुम्बस्य कृते वस्त्राणि लभ्यन्ते स्म। मङ्गलः वाटिकायां कस्यचन

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लघोः भूमिखण्डस्य उपयोगं शाकानि वप्तुं करोति स्म। अन्यत् सर्वं द्विदलं गोधूमः घृतं नवनीतं दुग्धं तक्रं च गृहे एव आसीत्। एवम् अतीतेषु बहुषु मासेषु एकपैसात्मकं वस्तु अपि विपणितः आनेतव्यं न भवति स्म।

यस्मिन् दिने सस्यकर्तनं भूत्वा गृहम् आगतम् आसीत् तस्मिन् दिने सः अभिमानेन नृत्यन् देवमन्दिरं गत्वा धन्यवादप्रकटनं कर्तुम् इच्छति स्म। किन्तु रामोः व्यवहारेण हतोत्साहितः सन् कूपस्य वेदिकायाम् उपविष्टवान्। यदा मन्दिरस्य अर्चकः तं 'भवान् बुद्धिमान् अस्ति' इति एवम् उक्त्वा प्रस्थितः तदा सः विचारमग्नः जातः आसीत्। वाटिकायाम् अन्धकारः प्रसृतः किन्तु तस्य विचारशृङ्खला भग्ना न जाता। बुषेण पूर्णं शकटद्वयम् ततः अग्रे निर्गतं तथापि सः तत्रैव उपविष्टः आसीत्। पुनः पुनः तस्य मनसि अर्चकस्य वचनं श्रूयते स्म यत् 'चिक्कणः घटः जलपूरणकाले समर्थः न भवति' इति।

तस्य ध्यानं तदा भग्नम् अभवत् यदा शृगालाः क्षेत्रेषु भ्रमन्तः कूपसमीपं जलं पातुम् आगतवन्तः। सः दीर्घं श्वासोच्छ्वासं कृत्वा गृहं प्रति प्रस्थितवान्। गृहस्य देहल्यां भित्तेः आश्रयेण उपविष्टवतीं प्रतीक्षां कुर्वतीं च मोहिनीं दृष्टवान्। आगमने विलम्बः जातः इति तस्य अवगमनम् अभवत्। सः लज्जितः जातः। यदा सः देहलीं प्रविष्टवान् तदा अनुभूतवान् यत् मोहिनी दीर्घं श्वासोच्छ्वासं कुर्वती अस्ति। अन्धकारकारणेन सः तस्याः मुखं द्रष्टुं न शक्तवान्। सः पृष्टवान्- "अत्र स्थिता अस्ति"?

"भवान् कुत्र आसीत्? शाकटिकः उक्तवान् यत् भवान् क्षेत्रतः अर्धघण्टापूर्वम् एव प्रस्थितः"

"आम्! भवतु, भोजनं सिद्धं किम्"?

"सिद्धम्। जलम् अत्रैव आनयामि। मुखं प्रक्षालयतु।"

"अन्तः किम् प्रचलति?"

"भवान् दिनपर्यन्तं परिश्रमं कृत्वा प्रत्यागतः अस्ति। श्रान्तिः अपि भविष्यति। अन्तः स्थितिः सम्यक् नास्ति"।

मङ्गलस्य मनसि सन्देहः जातः। सः सावधानम् अपृच्छत्- "रामुः आगतः किम्"?

"तस्य विषये एव तु वदामि। बालः दोषं करोति एव। भवान् शान्तचित्तः भूत्वा तस्य वचनं शृणुयात्"।

"तर्हि किं तस्य वचनम् अपि अस्ति? भवतु, प्रथमं तदेव शृणोमि।"

"अहं भवतः शरणम् आगता अस्मि। पूर्वं भवान् शान्तचित्तः भवतु।"

तस्मिन् समये एव मङ्गलस्य माता अन्तस्तात् बहिः आगत्य उक्तवती - "किं शिक्षयति स्वामिनम्?"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मोहिनी तूष्णीं स्थिता आसीत्। मङ्गलः चिन्तितवान् यत् रामुः गृहम् आगत्य सर्वं वृत्तान्तं मातरम् उक्तवान् स्यात्, अतः माता कुपिता अस्ति। मङ्गलः पृष्टवान्- "मातः! भवती एव वदतु, किं प्रवृत्तम्?" इति।

"एतां डाकिनीम् एव किमर्थं न पृच्छसि?"

भार्यायाः कृते सः एतत् कटुवचनम् ऐदम्प्राथम्येन श्रुतवान्। प्रायशः मोहिनी एव कारणभूता स्यात्, अतः प्रवृत्तं सर्वं श्रोतुं सः पार्श्वे विद्यमाने मञ्चे उपविष्टवान्। "आम्, मातः! वदतु, एषा डाकिनी किम् उक्तवती?" इति पृष्टवान्।

मोहिन्याः पूर्णं शरीरं कम्पते स्म। सा जानाति स्म यत् मातुः वचनं पुत्रः अवश्यमेव पालयिष्यति। वचनपालनस्य परिणामः तस्याः कृते उत्तमः न भवेत् इति ऊहितवती। अतः सा किञ्चित् दूरे एव स्थितवती। प्रथमं माता एव सर्वं वदेत्, पश्चात् सा वदिष्यति इति चिन्तितवती।

पुत्रस्य मुखात् एव पत्न्याः कृते 'डाकिनी' शब्दं श्रुत्वा सोत्साहम् उक्तवती- "त्वं रामुम् अद्य ताडितवान् खलु?" इति।

"नैव"!

"तर्हि त्वम् अपि एतस्याः डाकिन्याः संसर्गेण मिथ्याभाषणं कर्तुम् आरब्धवान् वा"?

"मातः! अहं तं न ताडितवान् एव। केवलं कर्णमर्दनं कृतवान् आसम्"।

"अहं स्वयमेव दृष्टवती। तस्य पृष्ठे कपोलयोः च तव चपेटिकायाः चिह्नम् अस्ति"।

"मातः! भवती स्वयमेव दृष्टवती किम्"? इति मङ्गलः अपृच्छत्।

"आम्! आम्! आम्!!!"

"तर्हि मातः! कदाचित् सः अन्येन ताडितः स्यात्। मम नाम वृथा स्वीकरोति"।

"सः मिथ्यां वदति किम्? एतावान् कनिष्ठः बालकः मिथ्याभाषणस्य अभ्यासं कुतः शिक्षितवान्? एवं भाति यत् तव पत्नी त्वां मूर्खं कृतवती अस्ति"।

"मातः! एतस्याः नाम किमर्थं वदति? एषा किं कृतवती?" इति मङ्गलः पृष्टवान्।

"एषा गृहस्य सर्वनाशं कृतवती। एषा डाकिनी तव पितरं खादितवती"।

सामान्यः बुद्धिमान् मङ्गलः अपि अवागच्छत् यत् क्रोधस्य आवेशेन विचारहीनतायाः उत्पत्तिः भवति। अतः सः मातुः वचनस्य प्रत्युत्तरं न अयच्छत्। सः स्वप्रकोष्ठं गतवान्। मोहिनी तस्य पृष्ठतः एव तम् अनुसरन्ती प्रकोष्ठम् आगतवती। मङ्गलः तत्र विद्यमानायाः खट्वायाः उपरि उपविष्टवान्। मोहिनी खट्वायाः अधः उपविष्टवती। प्रकोष्ठे नेयदीपस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रकाशः आसीत्। तस्मिन् प्रकाशे मङ्गलः मोहिन्याः उभे रक्ते नेत्रे दृष्टवान्। ते नेत्रे रोदनकारणतः रक्ते जाते आस्ताम्। सः चिन्तितः सन् पृष्टवान्- "किं जातम्?" इति।

"किमपि न। स्वस्य भाग्यस्य फलम् एतत्। अहं ज्ञातुं न शक्तवती यत् मम दोषः कः? पूर्णं दिनम् एतत् एव चिन्तयामि यत् अहं मातरं कथं प्रसन्नां कुर्याम्"?

"पश्यतु मोहिनि! अद्य मम मनः बहु विक्षुब्धम् अस्ति। प्रहेलिकया सम्भाषणं मास्तु। मां स्पष्टं वदतु यत् किं प्रवृत्तम्? माता अद्य किमर्थं कुपिता अस्ति"?

"अहं शपथपूर्वकं वदामि यत् मया किमपि न कृतम्। एकघण्टापूर्वं रामुः रोदनं कुर्वन् आगतः आसीत्। सः आगत्य मातरम् उक्तवान् यत् भवान् तं ताडितवान् इति। सः स्वस्य मुखम् अपि दर्शितवान्। तस्य मुखं रक्तवर्णीयम् आसीत्। एतत् सर्वं दृष्ट्वा मातुः कोपः आगतः। सा माम् अपशब्दैः निन्दितवती"।

"किन्तु सा त्वां डाकिनीं किमर्थं वदति"?

"अत्र कोऽपि नूतनः विषयः नास्ति। भवतः पितुः देहावसानस्य पश्चात् एषा पदवी मया प्राप्ता अस्ति। आरम्भे तं शब्दं श्रुत्वा दुःखम् अनुभवामि स्म। इदानीं मातुः आशीर्वचनम् इति मत्वा तूष्णीं तिष्ठामि। मातुः अपवचनम् अपि आशीर्वचनस्य एव अन्यत् रूपं भवति खलु"!

"एवं तर्हि, त्वं किमर्थं रोदनं करोषि?"

"अहं चिन्तयामि स्म भवान् एव रामुं ताडितवान् इति। सः कोमलः बालकः अस्ति। तस्मिन् भवतः दृढाभ्यां हस्ताभ्यां प्रहारं विचिन्त्य मम रोदनम् आगतम् आसीत्"।

"किन्तु, अहं तं न ताडितवान् एव। केवलं कर्णमर्दनं कृतवान्। सः तादृशानि वचनानि उक्तवान् आसीत् येन सः ताडनीयः एव। किन्तु भापनं कृत्वा एव त्यक्तवान्"।

"सः यत् मिथ्याभाषणम् अकरोत् तत् तु अनुचितम् अस्ति। मिथ्याभाषणं तु पापकार्यं खलु" इति मोहिनी अवदत्। मङ्गलः अद्य अनुभूतवान् यत् गृहे कलहस्य वातावरणम् अस्ति। तस्य मातरि पत्न्याः कृते घृणाभावः अस्ति। किन्तु सः इदानीं तु एतत् एव चिन्तयन् अस्ति यत् रामुः कथं दुष्टः जातः इति। रात्रौ सः भोजनं न कृतवान्। माता अपि न खादितवती। मोहिनी तु सर्वदा मातरि क्रुद्धायां सत्यां बुभुक्षिता एव निद्रां करोति।

अन्येद्युः भोजनं विना एव क्षेत्रेषु कार्यकरणं कठिनम् इत्यतः मङ्गलः तिस्रः पर्युषिताः रोटिकाः खादित्वा कमण्डलुपरिमितं दाधिकं च पीतवान्। मोहिनी प्रातः काले एव उत्थितवती आसीत्। शौचादिकर्म समाप्य, हस्तौ मुखं च प्रक्षाल्य, दधिमथनं कृत्वा दाधिकं निर्मीय सा एव मङ्गलस्य कृते आनीतवती। ततः मङ्गलः लगुडं स्कन्धे आरोप्य क्षेत्रतः बुषं वाहयितुं गृहात् प्रस्थितः। रामुः अपि रोटिकां खादित्वा दाधिकं च पीत्वा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुस्तकस्यूतं स्कन्धे आरोप्य विद्यालयं गन्तुं सज्जः अभवत्। यदा मङ्गलः गृहात् बहिः आगतः तदा रामुः अपि बहिः आगतः। रामुं दृष्ट्वा मङ्गलः पृष्टवान्- "रामो! त्वां कः ताडितवान् आसीत्"? इति।

रामोः हृत्कम्पनं आरब्धम्। तेन कृतं मिथ्याभाषणं तमेव भीतं कुर्वत् आसीत्। तस्य मौनं दृष्ट्वा मङ्गलः पृष्टवान् "किं रे! किमर्थं न वदसि? कः त्वां ताडितवान् आसीत्?" इति।

रामुः एकम् उपायं चिन्तितवान्। सः उच्चैः अभाषत- "मातः! मातः! पश्यतु, भ्राता मां ताडयति"! इति। एवम् उक्त्वा सः मातुः प्रकोष्ठं प्रति धावितवान्। अनुक्षणम् एव माता बहिः आगतवती। रामुम् अग्रे आनीय उक्तवती- "एतं मारयतु एव। पितृहीनः पुत्रः एषः खलु? सा डाकिनी प्रथमम् एतस्य पितरं नाशितवती। इदानीम् एतं विनष्टं कर्तुम् इच्छन्ती अस्ति" इति।

मोहिनी गृहस्य पृष्ठतः पशुशालायां धेनुवृषभाणां कृते बुषम् अन्नकणान् च दातुं गतवती आसीत्। तस्याः पार्श्वे समयः एव न आसीत् एतादृशाय कलहश्रवणाय। आहारं दत्त्वा ते वृषभाः क्षेत्रं प्रति प्रेषणीयाः आसन्। बुषम् उत्थाप्य गृहम् प्रति आनेतव्यम् आसीत्। धेनुभ्यः आहारं दत्त्वा गोदोहनम् करणीयम् आसीत्। पुनः दुग्धम् उष्णम् अपि करणीयम् आसीत्। यत् नवनीतं पूर्वमेव निष्कासितम्, तत् उष्णं कृत्वा धृतम् अपि करणीयम् आसीत्। एतत् सर्वं कृत्वा एव स्नानं, वस्त्रक्षालनकार्यं च भवति स्म। तदनन्तरं बुषं तु माता स्थापयति स्म। मोहिनी तु पाककार्यं करोति स्म। पाककार्यं कृत्वा तया कार्मिकमाध्यमेन वा क्षेत्रे पत्युः कृते भोजनं प्रेषणीयम् आसीत्। ततः मातरं भोजयित्वा स्वयं खादित्वा च घण्टापर्यन्तं विश्रामं कर्तुं तस्याः समयः आसीत्।

विश्रामस्य पश्चात् सा तन्तुचक्रेण तन्तुनिर्माणं करोति स्म। अस्मिन् समये यदि बुभुक्षा बाधते स्म तर्हि एकां रोटिकां खादित्वा चषकपरिमितं दाधिकं पिबति स्म। यदा सायंकाले धेनुवृषभाणाम् आगमनं भवति स्म तदा सा धेनुवृषभेभ्यः आहारं दत्त्वा गोदोहनम् अपि करोति स्म। एवं सूर्यास्तः भवति स्म। तदनन्तरं मङ्गलः अपि आगच्छति स्म। आदिनं परिश्रमेण श्रान्तः सन् गृहम् प्रत्यागत्य पाणिपादं प्रक्षाल्य बुभुक्षितः व्याघ्रः इव भोजनं करोति स्म।

मङ्गलः यदा मातुः मुखात् अकारणम् एव अपशब्दान् श्रुतवान् तदा सः आश्चर्यचकितः जातः। यस्मिन् क्षणे माता रामुम् अग्रे कृत्वा उक्तवती आसीत् यत् एतं मारयतु एव इति तत्क्षणं स्मृत्वा तस्याः दुःखदां मनोवृत्तिम् अवगत्य सः मुखम् अवनमय्य क्षेत्रं प्रति प्रस्थितः। गमनकाले सः मातुः मुखात् निःसृतं वचनं श्रुतवान् 'पत्न्याः दासः' इति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बुषं वाहयितुं शकटम् एतावत् पर्यन्तं क्षेत्रं प्रति न गतम् आसीत्। अतः सः वाटिकायां मन्दिरस्य पुरतः प्राप्तवान्। अर्चकः पुष्पाणि अवचेतुं पुष्पवाटिकां गतवान् आसीत्। मङ्गलः पादत्राणं निष्कास्य मन्दिरं प्रविष्टवान्। प्रतिमायाः पुरतः नन्दीवृषभस्य पार्श्वे उपविश्य मनसि जायमानानां विचारतरङ्गाणाम् अवगमनं कर्तुं प्रयत्नम् अकरोत्।

यदा अर्चकः आगत्य विचारमग्नं मङ्गलं दृष्टवान् तदा सः विस्मितः जातः। ततः सः पुष्पकण्डोलं मन्दिरस्य देहल्यां स्थापयित्वा, मङ्गलस्य पुरतः उपविश्य पृष्टवान्- "मङ्गलभ्रातः! कस्मिन् गभीरे विचारे मग्नः सन् उपविष्टः अस्ति"?

"अर्चकवर्य! अद्य माता उक्तवती यत् अहं पत्न्याः दासः अस्मि। इदानीम् उपविश्य चिन्तयन् अस्मि यत् अहं तादृशः अस्मि उत न"? इति।

मङ्गलस्य स्थूलायां बुद्धौ विषयस्य अवगमनं न भवति स्म। सः एवं चिन्तयन् आसीत् यत् सः पत्न्याः कीदृशीं दासताम् अवलम्बितवान् येन माता एतादृशम् उपालम्भं तस्मै उक्तवती? इति। अर्चकः मङ्गलं दृष्ट्वा स्मयमानः आसीत्। तस्य स्मितमुखं दृष्ट्वा मङ्गलः विस्मितः जातः। अन्ततोगत्वा अर्चकः एव पृष्टवान्- "मङ्गलभ्रातः! क्षेत्रेषु कियत् वुषम् अवशिष्टम् अस्ति?"

"अधुना चतुःशकटपरिमितं बुषम् आगतम्। प्रायशः द्विशतम् इतोऽपि क्षेत्रेषु अस्ति"।

"तर्हि भ्रातः! शीघ्रं करोतु। वृष्टिकालात् पूर्वं बुषं न केवलं गृहम् एव आनेतव्यम् अपि तु तत् विक्रेतव्यम् अपि अस्ति। गतेभ्यः आषड्मासेभ्यः भवान् येन परिश्रमेण निष्ठया च कार्यं कृतवान्, तस्य सर्वस्य साक्षी एषः ग्रामः अस्ति। अहं तु एवं चिन्तयामि भवतः पार्श्वे मातुः वचनं श्रोतुं समयः कुतः अस्ति?" अर्चकः अपृच्छत्।

"अर्चकवर्य! परिश्रमं तु कृतवान् किन्तु फलप्राप्तेः पूर्वं विषस्य निगरणं क्रियमाणम् अस्ति मया। अतः मम उत्साहभङ्गः जातः अस्ति"।

"अरे! सरलहृदय, मङ्गल! पश्यतु, अस्माकं ग्रामे भवतः कारणात् सर्वे ग्रामीणाः प्रसन्नाः भवन्ति। अहं सत्यं वदामि भवतः उत्साहं दृष्ट्वा ग्रामवासिनां वक्षस्स्थलं गौरवेण विशालं भवति। भ्रातः! पुरुषाः महिलानां कलहकारणेषु न पतेयुः"।

"किन्तु, अहं पत्न्याः दासः अस्मि किम्"?

"अरे, यदि अस्ति तर्हि अनुचितं किम्? भ्रातः, अहं तु पण्डितायाः चरणधूलिं यदि शिरसि स्थापयेयं तर्हि आत्मानं धन्यं मन्येयम्। कठिनकार्यं तु एतत् अस्ति यत् सा पादस्पर्शं कर्तुम् एव अवसरं न कल्पयति।"

मङ्गलः मन्दहासम् अकरोत्। सः अवदत्- "किं सा भवते पादस्पर्शं कर्तुम् अवसरं न कल्पयति"?

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"आम्, भ्रातः, अहं यदा प्रातः स्नानं कृत्वा गृहं गच्छामि तदा पण्डिता कमण्डलुं यावत् दाधिकं, पुनः तत्र एकं नवनीतखण्डं यत् ददाति तेन अहं गद्गदः सन् तस्यै धन्यवादम् अर्पयामि। मम धन्यवादं श्रुत्वा सा लज्जया भूमिम् एव पश्यति। जानाति किं, तदा सा किं वदति? 'शतं वर्षाणि पर्यन्तं जीवेतां मङ्गलचौधरी तत्पत्नी मोहिनी च। एतत् सर्वं तयोः एव कृपया अस्ति'।.....

"अहं मङ्गलचौधरीं तु न जानामि। मम कृते तु पण्डिता एव अन्नपूर्णा देवी अस्ति। भ्रातः! तेन कमण्डलुपरिमितेन दाधिकेन अहं जीवनपर्यन्तं तस्याः पादस्पर्शं कर्तुं सज्जः भवामि। किन्तु सा वदति- 'शपथः अस्ति, यदि भवान् मम पादस्पर्शं करिष्यति'।

"विवशः भूत्वा अहं तत् दाधिकं सर्वं पिबामि तथा च आत्मनि एव तत्प्रति श्रद्धां भक्तिं च सञ्चयामि" इति अर्चकः अवदत्।

"किन्तु अर्चकवर्य! अत्र सर्वः विषयः एव विपर्यस्तः अस्ति। सा मम चरणसेवां करोति, मम कृते पाकं करोति, वस्त्राणि क्षालयति प्रत्येकं सुखं ददाति च। किन्तु, अहं तस्यै किमपि न करोमि"।

"अस्तु! अस्तु! एतत् पुष्पं स्वीकरोतु। देवाय समर्प्य हस्तौ संयोज्य देवाधिदेवं महादेवं प्रार्थयतु यत् भवतः गृहे सूर्यसदृशः तेजस्वी पुत्रः भवेत्"। इति।

मङ्गलः पुत्रविषयं श्रुत्वा लज्जितः जातः। सः इदानीं चिन्तयन् एव आसीत् यत् पुत्रप्राप्त्या किं भविष्यति, तावता एव अर्चकः पुष्पकण्डोलतः कानिचित् पुष्पाणि स्वीकृत्य तस्य हस्तयोः स्थापितवान्। ततः उक्तवान् च- "आगच्छतु भ्रातः!" इति।

उभौ अपि स्थितौ आस्ताम्। देवाभिमुखं भूत्वा नेत्रे निमील्य प्रार्थनां कर्तुम् आरब्धवन्तौ। अर्चकः शिवस्तोत्रं पठितवान्। ततः देवाय पुष्पाणि समर्प्य, हस्तौ संयोज्य नेत्रे निमील्य मन्दं देवस्य कर्णे किमपि कथयन् इव आसीत्- "भगवन्! शीघ्रम् एव मङ्गलस्य गृहे चन्द्रः इव सुन्दरः, सूर्यः इव तेजस्वी, कुबेरः इव धनिकः, वरुणः इव उदारहृदयः पुत्रः भवतु!"

प्रार्थनां कृत्वा सः मङ्गलं दृष्टवान्। सः इदानीम् अपि हस्तौ संयोज्य नेत्रे निमील्य देवाभिमुखं श्रद्धया स्थितः आसीत्। अर्चकः उक्तवान्- "भ्रातः! मङ्गल! अधुना क्षेत्रं गन्तुं समयः जातः अस्ति।"

मङ्गलः नेत्रे उन्मील्य विस्मयेन अर्चकं दृष्ट्वा पृष्टवान्- "पर्याप्तम्?"

"तर्हि इतोऽपि किम् इच्छति?"

"अर्चकवर्य, भवान् स्वस्य कृते देवं किं याचितवान्?"

अर्चकः विनोदेन हसितवान्। सः उक्तवान्- "अहं तु वृद्धः जातः। पुत्रोत्पत्तिः कथं? पुत्रेण किं प्रयोजनम्? न गृहम् अस्ति, न च ... गच्छतु, भ्रातः! दिनं अग्रे सरत् अस्ति।"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

३

तस्मिन् सायङ्काले रामुः विद्यालयतः न प्रत्यागतः। यदा मङ्गलः सायङ्काले गृहम् आगतः तदा मोहिनी तम् उक्तवती- " रामुः विद्यालयतः न प्रत्यागतः"

"सोहन्याः गृहं गतवान् स्यात्" इति मङ्गलेन उक्तम्।

"अहं मातरं पृष्टवती आसम्। तदा सा 'तस्य अत्र कः आत्मीयः अस्ति? कस्य समीपम् आगच्छेत्'? इति उक्तवती आसीत्।

"तर्हि एतस्य तात्पर्यम् अस्ति यत् सा एव तत्र स्थातुम् उक्तवती स्यात्"।

"एवम् अपि स्यात्। तथापि भवान् सकृत् मातरं पृच्छतु।" इति मोहिनी अवदत्।

मङ्गलः मातुः प्रकोष्ठात् बहिः स्थित्वा पृष्टवान्- "मातः! रामुः न आगतवान् किम्? त्वां किमपि उक्तवान् आसीत् किम्?" इति।

"किमपि न उक्तवान्। किन्तु अहमेव तम् उक्तवती आसं यत् सः कतिपयानि दिनानि भगिन्याः गृहे एव वासं कर्यात् इति।

"कदा पर्यन्तम्?"

"यावत् पर्यन्तं पत्न्याः इन्द्रजालस्य प्रभावः त्वत्तः दूरं न गच्छेत्। अत्र तु सः ताडनीयः एव खलु?" इति उक्तवती मङ्गलस्य माता।

"मातः! भवती किं भाषते?"

"वत्स! मदीयाः केशाः आतपे एव न पलिताः। सर्वं जानामि।"

"तर्हि मातः! मह्यं पृथक् एव गृहं निर्मातुम् अनुमतिं ददातु"।

"एतत् एव तु सा इच्छति"।

"एतत् एव इच्छति इति कथं जानाति भवती? सा किं कृतवती?"

"तस्याः कथनम् आश्रित्य एव तु त्वं रामुं ताडितवान्।"

"इतोऽपि किमपि"?

"अन्यत् किं? एतत् कृत्यं स्वल्पम् वा? अधुना तस्याः कथनेन त्वं मां ताडयितुम् इच्छसि किम्?'' माता पृष्टवती।

मङ्गलेन अवगतं यत् इतोऽपि सम्भाषणं व्यर्थं भवेत्। सः ज़ानाति स्म यत् अहं रामुं न ताडितवान्, न वा कदापि मातरं ताडयितुं शक्नोमि इति। अतः मातुः मनसि विद्यमानां प्रतिक्रियां ज्ञातुम् अनिच्छन् मुखम् अवनमय्य स्वप्रकोष्ठम् आगतः। हस्तौ मुखं च प्रक्षाल्य भोजनं कर्तुम् उपविष्टः। ततः पूर्वं मोहिनी मातुः कृते भोजनं दत्तवती आसीत्।

Funding by IKS-MoE

मङ्गलः पृष्टवान्-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"माता भोजनं कृतवती किम्?" इति।

"खादन्ती अस्ति सा।"

"तर्हि त्वम् अपि खाद।"

"भवान् खादतु। अहम् अनन्तरं खादिष्यामि। एतत् उदरं यावत्कालं मया सह तिष्ठति भोजनं तु करिष्यामि एव।"

"तर्हि वद, माता तुभ्यं किमर्थम् एतावत् कुप्यति?"

मुखम् अधः कृत्वा मोहिनी "अहं किमपि न जानामि। मम भाग्यम् एव एतादृशम् अस्ति। अहं निर्धनस्य पुत्री अस्मि इत्यतः माता मह्यं द्विषति" इति अवदत्।

अन्तिमं वचनं कथयन्त्याः मोहिन्याः नेत्राभ्याम् अश्रूणि निर्गतानि। मङ्गलः किमपि अनुक्त्वा एव भोजनं कुर्वन् आसीत्। यदा तस्य भोजनं समाप्तं तदा मोहिनी अपि स्वस्य कृते भोजनं परिविष्टवती। मङ्गलः खट्वायाम् उपविश्य- "मम जीवनस्य आनन्दः तथैव नष्टः यथा बहुयत्नेन निर्मितं पायसं केनापि शुनकेन भुज्यते" इति उक्तवान्।

मोहिनी भोजनं कुर्वती एव- "मास्तु, एतादृशं वचनम्। मम वचनं पालयतु। श्वः नगरं गच्छतु। बुषविक्रयणस्य प्रबन्धनं कृत्वा आगमनकाले आत्मना सह रामुम् अपि आनयतु" इति अवदत्।

"सः मिथ्याम् उक्तवान्। अहं तं न ताडितवान् एव। सः मया सह न आगमिष्यति।"

"तथापि भवता गन्तव्यम् एव" इति मोहिनी अवदत्।

"अस्तु! भवती वदति चेत् अहं गमिष्यामि। किन्तु श्वः न, त्रिचतुराणां दिनानां पश्चात् गमनसमयः भविष्यति। अद्य चत्वारिंशत् शकटपरिमितं बुषं गृहम् आगतम् अस्ति। त्रिचतुरेषु दिनेषु सर्वं बुषं सङ्गृहीतं भविष्यति। शकटानि अपि रिक्तानि भविष्यन्ति। पश्चात् तत् नगरं प्रापयितुं प्रबन्धं करिष्यामि।" इति मङ्गलः अवदत्। मातरं प्रति मङ्गलस्य आदरभावः तु आसीत् एव।

किन्तु गतयोः द्वयोः दिनयोः यत् किमपि प्रवृ तं तेन सः बहुः आश्चर्यचकितः जातः। ज्येष्ठः मासः आरब्धः। इदानीं केवलं प्रातः सायं च कार्यं कर्तुं शक्यते। तथापि सर्वे कृषकाः स्वस्य बुषम् धान्योत्पादनं च अवगाह्य, अवच्छेदनं कृत्वा च गृहे स्थापयन्तः आसन्। कार्मिकेभ्यः पारिश्रमिकरूपेण बुषम् अन्नं च दीयते स्म। अस्मिन् समये सर्वे प्रसन्नचित्ताः आसन्।

मङ्गलस्य क्षेत्रेषु कार्यकरणं कार्मिकेभ्यः बहु रोचते स्म। सः पारिश्रमिकप्रदानसमये कदापि कार्पण्यं न अदर्शयत्। सः [illegible] कार्मिकद्वारा कार्यं कारयति स्म।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वयम् अपि तैः सह उपविश्य कार्यं करोति स्म। ततः सः उदारहृदयेन पारिश्रमिकं ददाति स्म। ग्रामीणाः अपि तस्य विकासं दृष्ट्वा प्रसन्नाः आसन्। ते जानन्ति स्म विपत्तौ सः सर्वेषां साहाय्यकरणे सङ्कोचं न अनुभवति। तस्य बलिष्ठं शरीरं, सरलं स्वभावम् उदारहृदयं च दृष्ट्वा ग्रामीणाः तं ग्रामस्य उत्तमं जनं भावयन्ति स्म।

बुषं प्रायशः सङ्गृहीतम् जातम्। मध्याह्नकाले कार्मिकाः आम्रवाटिकाम् आगत्य वृक्षस्य छायायां निद्रां कुर्वन्ति स्म। अद्यत्वे तु मङ्गलः अपि मध्याह्ने गृहं गच्छति स्म। सायं चर्तुवादनतः अष्टवादनपर्यन्तं पुनः कार्यं करोति स्म।

परम्परानुसारं बुषस्य सङ्ग्रहणस्य पश्चात् मङ्गलः प्रतिवर्षं सर्वेषां कार्मिकाणां ग्राम्यजनानां च कृते महाभोजस्य आयोजनं करोति स्म। महाभोजात् एकदिनपूर्वं सः रामुम् आनेतुम् ऐच्छत्। परेद्युः प्रातः उत्थाय स्नानादिकर्म समाप्य सः नगरं गन्तुं सज्जः अभवत्।

"मातः!" इति सम्बोधयन् मातुः समीपं गत्वा "अहं रामुम् आनेतुं गच्छामि।" इति अवदत्।

"किमर्थं? का आवश्यकता तस्य?"

"श्वः अस्माकं गृहे महाभोजस्य आयोजनम् अस्ति। तं विना कथम् महाभोजम् आचराम?"

"त्यजतु तम्। अत्र आगमिष्यति चेत् ताडितः एव भविष्यति।"

"कः ताडयिष्यति तम्? मातः, भवत्याः विश्वासः मयि नास्ति किम्? तं मम पुरतः पृच्छतु। पश्यामि, अहं ताडितवान् इति कथं वदति?"

"त्वां दृष्ट्वा तु तस्य प्राणाः गताः इव भवन्ति। तव पुरतः कथं वदिष्यति सः?"

"पश्यतु मातः, अहं तं न ताडितवान् एव। इदानीं तम् आनेतुं गच्छामि। सः श्वः अत्रैव भविष्यति। अनन्तरं यत् इच्छति तत् करोतु"।

"अहं तु एतत् एव वदामि यत् तस्य आह्वानस्य आवश्यकता एव नास्ति" इति माता उक्तवती। तथापि मङ्गलः नगरं गत्वा सोहन्याः श्वसुरस्य आपणे स्थितः अभवत्।

"आगच्छतु मङ्गल, कथम् अस्ति? एतस्मिन् पर्याये धान्योत्पादनं कथं जातम्? भवतः माता कुशलिनी अस्ति किम्?" इति लालनत्थूमलः अपृच्छत्।

"आं महोदय! सर्वं सम्यक् एव अस्ति। अहम् पूर्वतनस्य उत्पादनस्य गणनां कर्तुम् आगतः येन पुनः अन्यत् उत्पादनं भवतः पार्श्वे प्रेषयेयम्"।

"आम्! आम्! उपविशतु तावत्!" इत्युक्त्वा लालमहोदयः आपणस्य गणकम् आदिशत्- "मङ्गलस्य पूर्वतनवाणिज्यस्य गणनां करोतु" इति। गणकः गणनापुस्तकम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उद्घाटितवान्। मङ्गलस्य पितुः दुर्गादासस्य नाम्ना विद्यमानं पुटम् उद्घाट्य एकस्मिन् कागदे गणनां लिखितवान्। मङ्गलः साक्षरः न आसीत्। अतः कागदे लिखितं विवरणं पुनः गणकेन बोधितम्। सः बोधितवान्- "पश्यतु मङ्गलचौधरि! गते कार्तिकमासे गणना कृता आसीत्, तस्य एतत् विवरणम् अस्ति। एकसहस्रं द्विशतम् अशीतिः रूप्यकाणि भवतः सङ्गृहीतानि सन्ति। द्विशतं मनपरिमितं कणिशम् आगतम्। तस्य मूल्यं षट्शतम्। तैलबीजं पञ्चाशत् मनपरिमितम्। तस्य मूल्यं द्विशतम्। अलसीबीजं पष्टिमनपरिमितं। तस्य मूल्यं त्रिशतं रूप्यकाणि। गुडं शतं मनपरिमितम्। तस्य मूल्यं चतुश्शतम्। इत्थम् आहत्य द्विसहस्रं सप्तशतम् अशीतिः रूप्यकाणि भवन्ति। व्ययं पश्यामः चेत् पञ्चसप्ततिः रूप्यकाणि परार्थविक्रयभृत्यर्थं, सप्तविंशतिः रूप्यकाणि अष्ट नाणकानि च तोलनार्थं, तावत् एव धर्मार्थं च व्ययः अभवत्। द्विसहस्रं षट्शतं रूप्यकाणि अस्माकं पार्श्वे अवशिष्टानि सन्ति" इति।

"तर्हि लालमहोदय! द्विसहस्रम् इदानीं मह्यं ददातु"।

"द्विसहस्रम्! किं करिष्यति एतावता धनेन?" इति साश्चर्यम् अपृच्छत् लालनत्थूमलः।

"एकम् इष्टिकानिर्मितं गृहं भवेत्" इति मदीयः विचारः अस्ति।

"किं करिष्यति एतेन गृहेण? पूर्वतनगृहम् अस्ति खलु?"

"तत् तु अस्ति एव। तत् गोष्ठं करिष्यामि। तत्र धेनुस्थापनं कृत्वा घृतस्य वाणिज्यं करिष्यामि।"

"अस्माकं मतम् अस्ति" इति लालमहोदयः भ्रुवौ वक्रीकृत्य उक्तवान्- "एतस्मात् वाणिज्यतः हानिः भविष्यति। घृतनिर्माणं समययापनाय तु सम्यक् अस्ति, किन्तु लाभदृष्ट्या सम्यक् नास्ति" इति।

"मम मतं तु विपरीतम् अस्ति। वयं यावन्तं परिश्रमं क्षेत्रेषु कुर्मः, यदि तस्य अल्पः अपि भागः अन्यकार्यार्थं व्ययीक्रियते तर्हि निश्चयेन लाभः स्यात्" इति।

"मङ्गल! भवतः कथनस्य तात्पर्यं किम् इति न ज्ञायते"।

"अहं पठनं लेखनं च न जानामि। तस्मात् मम मनसि विद्यमानान् विचारतरङ्गान् बोधयितुं न शक्नोमि। किन्तु मम या अभिरुचिः अस्ति सा सम्यक् एव। भवतः गृहम् इव मम गृहं भवेत् इति मदीया इच्छा अस्ति। तत्र भगवतः कृपया जीवने किञ्चित् सुखं प्राप्नुयाम"। इति मङ्गलः नत्थूमलम् अवदत्।

"मङ्गल! भवान् जानाति एव यत् ग्रामे एतादृशं गृहनिर्माणम् अशक्यम्। कथञ्चित् निर्माणम् अपि भवति चेत् तस्य रक्षणम् अतीव कठिनं भवति। यदि रक्षणं शक्यं तर्हि वर्षद्वये तावान् व्ययः भवति येन सर्वस्य अपि कृषिक्षेत्रस्य विक्रयणं सम्भवेत्।"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"लालमहोदय! एतादृशाय परामर्शाय भवते धन्यवादम् अर्पयामि। किन्तु मयि स्वल्पा बुद्धिः अस्ति। मम बुद्धौ तु एषः विषयः अस्ति यत् एतावता परिश्रमेण प्राप्यमाणस्य फलस्य सुखम् अनुभवितुं मम अधिकारः अस्ति एव"।

"अस्तु! किन्तु इदानीं द्वित्रिशतं वा रूप्यकाणि एव भवते दातुं शक्नोमि। ततोऽपि अधिकं नास्ति" इति अवदत् नत्थूमलः।

एवं पूर्वं कदापि न प्रवृत्तम्। धनस्य अभावः न जातः आसीत्। एतत् तु सत्यं यत् सः तत्पिता वा कदापि अग्रिमराशिं न स्वीकृतवान् आसीत्। मङ्गलः एतत् अपि जानाति स्म वणिजः आपणस्य एषः नियमः अस्ति यत् वस्तूनि यदा आपणस्थले प्राप्तानि भवन्ति तदा तेषाम् अर्धं मूल्यम् अग्रिमधनरूपेण लभ्यते स्म। इदानीं तु तस्य सर्वाः सामग्र्यः विक्रीताः आसन्।

मङ्गलः नत्थूमलं विनयेन उक्तवान्- "लालमहोदय! मुख्यः विषयः एषः अस्ति यत् अहं गृहस्य मूलाधारस्य खननकार्यं शीघ्रमेव कर्तुम् इच्छामि। गृहनिर्माणं तु वृष्टेः पश्चात् भविष्यति। किन्तु मूलाधारस्य खननात् पूर्वं तस्य मानचित्रं निर्मातव्यम् अस्ति। अतः एतत् कार्यं द्वित्रिशतेन वा रूप्यकैः न शक्यते" इति।

नत्थूमलः किञ्चित्कालं विचार्य उक्तवान्- "भवान् सम्यक् एव वदन् अस्ति मङ्गल! किन्तु भवान् न जानाति यत् एषा सम्पत्तिः केवलं भवदीया एव नास्ति। भवतः पितुः सम्पत्तौ अन्यस्य अपि अधिकारः अस्ति। नूतनस्य गृहस्य निर्माणार्थम् एतावतः धनस्य विनियोगात् पूर्वं तस्य मतम् अपि अङ्गीकारः भवेत्। अहं जानामि यत् तस्य सहमतिः नास्ति" इति।

वज्राघातं प्राप्तवान् इव मङ्गलः स्तब्धः जातः। तस्य स्थूलायां बुद्धौ अपि किञ्चित् चित्रं स्पष्टं जायमानम् आसीत्। बहुकालपर्यन्तं सः नत्थूमलस्य मुखम् एव पश्यन् आसीत्। तस्य मनसि विचाराणां झञ्झावातः एव आगतः। किन्तु तेषां क्रमबद्धता न आसीत्। सः तेषां स्पष्टरहितानां भावानां प्रकटनार्थं शब्दानाम् अन्वेषणं करोति स्म। मौनेन उपविष्टवन्तं तं नत्थूमलः उक्तवान्- "मङ्गल क्षमां करोतु। मया एतत् सत्ययुक्तं कर्तव्यं पालनीयं भवति। कस्यचित् अवयस्कस्य रक्षणस्य उत्तरदायित्त्वं मया एव निर्वोढव्यम्" इति।

इदानीं विषयः किञ्चित् स्पष्टः जातः। मनसि उत्थितस्य झञ्झावातस्य स्वरूपं दृश्यमानम् आसीत्। तथापि तं स्वरूपं प्रकटयितुं मङ्गलस्य अन्तरङ्गे शक्तिः न आसीत्। सः केवलं एतत् एव पृष्टवान्- "एतत् दायित्त्वं भवते केन दत्तम्?" इति।

"यस्य दायित्त्वप्रदानस्य अधिकारः अस्ति"।

मङ्गलः उत्थितवान् उक्तवान् च- "यथा भवतः इच्छा। भवान् मम पूज्यः अस्ति। अहं भवतः कथनस्य विपरीतं न आचरामि। मह्यं द्वित्रशतम् अपि न आवश्यकम्।......

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्वः मम गृहे महाभोजकार्यक्रमः अस्ति। भगिनीं नेतुम् आगतवान् अस्मि। भवान् अनुमतिं ददातु। भवतः गृहात् तां नेष्यामि" इति।

सोहन्याः श्वसुरस्य नाम नत्थूमलः आसीत्। तस्य पूर्वजाः ग्रामे एव वसन्ति स्म। नत्थूमलस्य पितामहः कृषिक्षेत्रे उत्पन्नस्य अन्नस्य विक्रयणार्थं नगरे आपणं निर्मितवान् आसीत्। तस्य वाणिज्यम् उन्नतिपथं गच्छत् लक्षाधिकाणां रूप्यकाणां वाणिज्यं जातम् अस्ति।

नत्थूमलस्य पुत्रः सोहन्याः पतिः शङ्करदासः आसीत्। सः किञ्चित् आङ्ग्लभाषां हिन्दीभाषां च जानाति स्म। तस्मात् तस्य कुटुम्बजनानाम् अपेक्षया तस्मिन् अहम्भावः किञ्चित् अधिकः एव आसीत्। नत्थूमलः तस्य स्वभावं जानाति स्म। अतः सः मङ्गलम् उक्तवान्- "एतस्मिन् विषये आवुत्तम् अपि पृच्छतु। यथा सः वदेत् तथा करोतु" इति।

मङ्गलः ततः उत्थाय भगिन्याः गृहं प्रति प्रस्थितः। अद्य तस्य मनः बहु खिन्नम् आसीत्। आकाशात् भूमौ पतनम् इव अनुभवं करोति स्म। क्षुद्रः प्राणी इव सः भगिन्याः गृहस्य द्वारे स्थितः जातः। यदा सः द्वारशब्दम् अकरोत् तदा उपरिष्टात् वातायनात् सोहन्याः श्वश्रूः तं दृष्ट्वा उच्चैः आह्वानं कुर्वती- "अरे सोमे! अधः पश्यतु! सः आगतः अस्ति" इति सोहनीम् उक्तवती। श्वशुरालये सोहन्याः नाम सोमा इति जातम् आसीत्।

मङ्गलाय तस्मिन् वाक्ये नूतनस्य ध्वनेः सञ्चारस्य प्रतीतिः अभवत्। सः एवम् अनुभूतवान् यत् तस्य श्रवणशक्तिः नष्टा जायमाना अस्ति। सामान्यकथनम् अपि तस्मै न रोचते स्म। सः नत्थूमलस्य कथनं सोहन्याः श्वश्र्वाः कथनं च विमर्शयन् एव आसीत्, तत्क्षणम् एव सोहनी अधः आगता। द्वारम् उद्घाट्य पृष्टवती- "भ्रातः! कः विशेषः?" इति।

भगिन्याः मुखात् रसहीनं प्रश्नं श्रुत्वा मङ्गलेन अपि कथ्यमानं वचनम् ऋजुरूपेण- "भवतीं रामुं च नेतुम् आगतः अस्मि। कृषिक्षेत्रेभ्यः सर्वम् उत्पादनं कर्तितं सत् आगतम् अस्ति। तस्मात् कारणात् अस्माकं गृहे सर्वेषाम् आमन्त्रणम् अस्ति" इति उक्तम्।

"अस्तु। वयम् आगमिष्यामः। भवतः आवुत्तः अपि आगमिष्यति।"

"तर्हि, मया सह न आगच्छति?"

"नैव! सः निराकृतवान् अस्ति"।

"रामुः?"

"सः विद्यालयं गतवान्। सः अपि मया सह आगमिष्यति।" इति सोहनी अवदत्।

मङ्गलः इतोऽपि किमपि न उक्तवान्। तस्मिन् श्रवणस्य सामर्थ्यम् एव न आसीत्। तस्य नेत्रे सजले जाते। सः - "भवतु, श्वः आगच्छन्तु। मम परतया आवुत्तम् अपि आगन्तुं वदतु" इति उक्त्वा ततः प्रस्थितः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

४

मङ्गलः यदा नगरम् आगच्छति स्म तदा तेन बहूनि कार्याणि करणीयानि भवन्ति स्म। अद्य अपि ग्रामतः प्रस्थानसमये बहु चिन्तनं कृतवान् आसीत्। किन्तु मार्गे प्रत्यागमनकाले सर्वं विस्मृतवान्। तस्य मनसि एतत् एव चिन्तनम् आसीत् 'इदानीं कथमपि नगरतः निर्गम्य एकान्तं स्थलं गच्छेयम्। कदाचित् एवं न भवेत् यत् मार्गे गमनागमनं कुर्वन्तः जनाः मम अश्रूणि पश्येयुः' इति।

इदानीं मध्याह्नभोजनस्य समयः अपि न जातः आसीत्। सः गृहं प्राप्तवान्। तस्य माता पत्नी च असमये आगमनस्य कारणं पृष्टवत्यौ। माता उक्तवती- "अहम् उक्तवती आसं खलु, यत् रामुः न आगमिष्यति!" इति।

"मातः! सः सोहन्या सह श्वः आगमिष्यति। आवुत्तः अपि आगमिष्यति"।

एतत् श्रुत्वा माता सन्तुष्टा जाता। प्रसन्नचित्ता सती स्वप्रकोष्ठं गतवती। किन्तु मोहिनी पत्युः वचनम् अश्रुत्वा तस्य शुष्कं मुखं पश्यन्ती आसीत्। सा तस्य हृदयपीडायाः आभासं तस्य मुखे पश्यन्ती आसीत्। सा मातुः गमनस्य अनन्तरम् "आगच्छतु, अन्तः आगच्छतु" इति उक्तवती।

मङ्गलः अन्तः गतवान्। सा अञ्चलेन तस्य धूलिसहितौ पादौ मार्जितवती। तत्पश्चात् तं खट्वायाम् उपवेश्य स्वयं भूमौ उपविश्य तस्य पादस्पर्शं कुर्वती- "भवतः मुखदर्शनेन एवं भाति यत् किमपि विशिष्टं किञ्चित् प्रवृत्तम्" इति अवदत्।

"आम्! तादृशं किमपि प्रवृत्तं येन मादृशानां जनानां मस्तिष्कं सोढुं न शक्नोति" इति मङ्गलः अवदत्।

"मुखं कान्तिहीनं जातम् अस्ति। अहं वदामि यत् पूर्वं भवान् किञ्चित् दाधिकं नवनीतं रोटिकां च खादतु। तत्पश्चात् सर्वं वृत्तान्तं श्रोष्यामि" इति मोहिनी अवदत्।

सायङ्काले मङ्गलः अर्चकस्य गृहं प्राप्तवान्। मङ्गलः यदा निमन्त्रणार्थम् अवदत् तदा सः गद्गदः सन् स्वीकृतिवचनं प्रादात्। मङ्गलः उक्तवान्- "भवान् सकुटुम्बम् आगच्छतु। केषुचित् कार्येषु भवत्पत्नी मोहिन्याः साहाय्यं करिष्यति। यतः मम भाति एषः महाभोजकार्यक्रमः अन्तिमः अस्ति" इति।

"किमर्थम्?" इति अर्चकः आश्चर्येण पृष्टवान्।

"अस्मत्सदृशानां ग्राम्यजनानां कृते उदरं तु लघु एव भवति खलु! अधिका पाचनशक्तिः नास्ति"।

"तर्हि बृहत् उदरं कस्य अस्ति? अहं तु सप्त रोटिकाः युगपत् एव खादामि।"

Funding by IKS-MoE

"नगरजनानाम् उदरं निःसन्देहं बृहत् भवति। लक्षाधिकम् अर्जयन्ति। तत्पश्चात्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सर्वम् उद्‌गिरन्ति। बहिः किञ्चित् अपि प्रकटितं न भवति। अस्मिन् वर्षे अहम् सहस्रं मनपरिमितं गोधूमम् उत्पादितवान् आसम्। तत् अस्माकम् उदरे आलोडनं कुर्वत् अस्ति"।

"ओह! तर्हि एवम् अस्ति! मङ्गलभ्रातः, किं माता किमपि उक्तवती वा?"

"श्वः एव सर्वं वृत्तान्तं ज्ञास्यति। रामुः सम्पत्तेः अर्धभागं याचिष्यति। माता अपि पृथक् जीवननिर्वाहार्थं किञ्चित् याचिष्यति, तथा च मङ्गलः मोहिनी च कस्याञ्चित् पेषण्यां वृषभौ इव वलयाकारेण घूर्णनं कर्तुम् उद्यतौ भविष्यतः" इति नैराश्येन उक्तवान् मङ्गलः।

"मङ्गल! मातुः जीवनात् पृथक् भवतु भवान्।"

"एतत् कथं सम्भवति! पुत्रः मातृजीवनात् कथं पृथक् भवितुं शक्नोति?"

"एषा असम्भववार्ता अस्ति चेत् अपि भवान् एकं विषयं न जानाति एव। मातापुत्रयोः मध्ये सम्बन्धविच्छेदः अत्र नास्ति। प्रत्युत, भ्रात्रोः मध्ये सम्बन्धविच्छेदः अस्ति। मातापुत्रयोः मध्ये तु एवं प्रवर्तमानम् अस्ति- एकस्मै पुत्राय अपरस्मात् पुत्रात् अधिकम् एव महत्त्वं दीयमानम् अस्ति"।

"एतस्य सूक्ष्मविषयस्य चिन्तनम् अहं न करोमि। केशात् त्वक्निष्कासनस्य योग्यता मयि नास्ति। अर्चकवर्य! अहं तु एतत् जानामि यत् चौधरिदुर्गादास्य कृषिक्षेत्रेभ्यः सर्वं धान्यं गृहम् आगतम् अस्ति। तदर्थं महाभोजनस्य आयोजनं श्वः अन्तिमं भविष्यति। तस्मात् कारणात् आगन्छन्तु। सम्यक्रूपेण भोजनं कुर्वन्तु"।

मङ्गलेन अर्चकं प्रति उक्तं सर्वं वचनं ग्रामे प्रसृतं जातम्। 'रामुमङ्गलयोः मध्ये दुर्गादासस्य भूमेः विभजनं भविष्यति। मङ्गलेन अर्जितं धनं रामुः प्राप्स्यति। अवयस्कस्य रामोः सम्पतिं मङ्गलः स्वायत्तीकर्तुम् इच्छति स्म। सोहन्याः श्वसुरालयजनाः तन्मध्ये एव आगत्य स्वायत्तीकरणस्य तस्य इच्छापूरणे बाधां जनितवन्तः' इति ग्रामस्य प्रत्येकं गृहे एषः एव चर्चाविषयः आसीत्।

अन्येद्युः ग्रामबालाः अपि ज्ञातवन्तः यत् रामुमङ्गलयोः मध्ये विभजनं भविष्यति। एतादृश्यां चर्चायां प्रवृत्तायां सत्याम् अपि मङ्गलस्य गृहस्य अङ्गणे महाभोजस्य प्रबन्धनकार्यं प्रचलत् आसीत्। गोधूमचूर्णस्य संयावः कुण्डलिका शष्कुली काशीफलं तथा च भिण्डेः कोशातक्याः च शाकम्। पानार्थं तक्रं, खादनार्थं नवनीतम् आसीत्। मङ्गलस्य क्षेत्रेषु पञ्चाशदधिकाः कार्मिकाः कार्यं कुर्वन्ति स्म। तेषां कृते अपि भोजनस्य व्यवस्था आसीत्। इत्थं द्विशतस्य जनानां कृते भोजनं सिद्धं जातम्। यदा ग्रामजनाः भोजनं कुर्वन्ति स्म तदा एव चतुश्चक्रयुतेन अश्वशकटेन शङ्करः तत्पत्नी सोहनी रामुः च आगतवन्तः। अपरेण अश्वशकटेन शङ्करस्य पिता नत्थूमलः अपि आगतवान्।

अङ्गणे एकस्यां पङ्क्तौ भोजनं कुर्वतः शतं जनान् दृष्ट्वा नत्थूमलस्य भ्रुवौ वक्रे जाते। यदा मङ्गलः तस्य स्वागतार्थम् अग्रे गतः तदा नत्थूमलः "एषः कीदृशः धनस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपव्ययः! पञ्चशतस्य तु एतत् निमित्तं व्ययः एव जातः स्यात्। एतस्य अपेक्षया पञ्चकिलोपरिमितम् अन्नदानम् एव श्रेयस्करं खलु!" इति अवदत्।

भोजनकर्तृषु सर्वे एव जानन्ति यत् ते किमर्थम् आगताः इति। यदा कश्चन जनः नत्थूमलस्य मस्तके आगतां रेखाम् अपश्यत् तदा सः उद्गिरणं कुर्वन् उक्तवान्- "सूम गच्छेत्। सख्याः कल्याणं भवतु!"

अपरः जनः ततः अग्रे उक्तवान्- "भगवान् तु सख्या सह एव अस्ति"। इति।

निम्नजातेः कार्मिकाः सर्वे एव मङ्गलं प्रति आचर्यमाणम् अन्यायम् अनुभवन्ति स्म। केचन जाटवर्गीयाः जनाः तस्मै ईर्ष्याम् असूयां चापि कुर्वन्ति स्म। तस्मात् कारणात् ते तस्य भूमिविभाजनं ज्ञात्वा प्रसन्नाः आसन्। ते प्रत्यक्षं किमपि न वदन्ति स्म।

भोजनपङ्क्तिमार्गेण आगच्छन् शङ्करः- "मङ्गल, एतेषां शीघ्रम् एव आपृच्छनं करोतु। मम पिता शीघ्रं गन्तुम् इच्छति।" इति अवदत्।

"भ्रातः! एते खादित्वा एव गमिष्यन्ति खलु?"

"यदि खादितुं न शक्नुवन्ति तर्हि भोजनं स्वीकृत्य गच्छन्तु" इति शङ्करः उच्चैः उक्तवान्।

शङ्करस्य तद्वचनं कश्चन भारवाहकः श्रुतवान्। सः मङ्गलस्य गृहे चौधरि-दुर्गादासस्य कालतः एव कार्यं करोति स्म। सः उक्तवान्- "जामातृवर्य! भवतः पितृगृहे भोजनं वयं न कुर्मः। स्वस्य पारिश्रमिकस्य कारणेन खादामः" इति।

ततः शङ्करः भ्रुवौ वक्रीकृत्य कटाक्षेण तं दृष्टवान्। सः भारवाहः पुनः- "कदापि भूमिस्वामित्वस्य कार्यं कृतवान् वा? करिष्यति तर्हि ज्ञास्यति!" इति अवदत्। एतस्मिन् अवसरे मङ्गलः हस्तौ संयोज्य- "कर्मु पितृव्य! तूष्णीं भवतु। एषः जामाता अस्ति। अस्माकं पूज्यः अस्ति" इति अकथयत्।

मङ्गलः हस्तौ संयोज्य शङ्करम्- "आवुत्त! एषः ग्रामीणः जनः अस्ति। एतस्य वचनं श्रुत्वा क्रोधं मा करोतु" इति अवदत्।

मङ्गलः शङ्करम् आत्मना सह प्रकोष्ठं नीतवान्, यत्र नत्थूमलः रामुः च पूर्वमेव प्राप्तवन्तौ आस्ताम्। प्रकोष्ठं प्रविश्य शङ्करः- "पितः! एतं कलहं शीघ्रं समापयतु। मम तु अत्र प्रतिक्षणं खिन्नता वर्धते" इति उक्तवान्।

"मङ्गल! अत्र आगच्छतु, उपविशतु"। प्रकोष्ठे कटः आसीत्। तस्मिन् आस्तरणं प्रसृतम् आसीत्। उपधानानि अपि आसन्। तत्र उपवेशयन् स्वयं च उपविशन् नत्थूमलः- "वयं केनचित् विशेषप्रयोजनेन अत्र आगतवन्तः स्मः" इति उक्त्वा विषयम् आरब्धवान्।

"आं लालमहोदय! एतत् तु अहं ह्यः एव ज्ञातवान्"।

नत्थूमलस्य पार्श्वे शङ्करः रामुः च उपविष्टवन्तौ। तयोः पृष्ठतः रामोः माता,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अवगुण्ठनं कृत्वा सोहनी च उपविष्टवत्यौ। नत्थूमलस्य अपरस्मिन् पार्श्वे केवलः मङ्गलः उपविष्टः आसीत्। प्रकोष्ठस्य द्वारात् बहिः स्थित्वा ग्रामीणाः अन्तः वीक्षणं कुर्वन्तः आसन्।

मङ्गलस्य कथनस्य पश्चात् नत्थूमलः- "अस्माकं विचारः अस्ति यत् विभाजनं भवेत्। तत्पश्चात् भवान् गृहं प्रासादं वा निर्मातु" इति अवदत्।

"मम अङ्गीकारः अस्ति" इति मङ्गलः अनुक्षणं प्रत्युत्तरम् उक्तवान्।

तस्य मुखात् एतादृशं वाक्यं निस्सरत् एव आसीत्, तत्क्षणम् एव शिवालयस्य अर्चकः प्रकोष्ठं प्रविष्टवान्। नत्थूमलः शङ्करः च तं प्रश्नदृष्ट्या दृष्टवन्तौ। किन्तु अर्चकः हस्तौ संयोज्य नत्थूमलाय आशीर्वचांसि यच्छन्- "लालमहोदय, भगवान् भवन्तं दीर्घायुः कुर्यात्। किं जामातृवर्य! सम्यक् अस्ति खलु? अस्माकं पुत्रीं सोहनीम् अपि आनीतवान् खलु? बहु सम्यक्। सा उपविष्टा अस्ति। जीवतु पुत्रि!" इति अवदत्।

नत्थूमलः अर्चकं तर्जयित्वा बहिः प्रेषयितुं विचारं करोति स्म किन्तु आशीर्वादं कथयन्तं तं दृष्ट्वा सः सौम्यः जातः। सः विनयेन- अर्चकवर्य! भवान् यदि बहिः गमिष्यति तर्हि सम्यक् भविष्यति" इति अवदत्।

"लालमहोदय! अहं तु अस्मिन् निर्णायकगणे उपवेष्टुम् आगतः। अहम् एतस्य गृहस्य पुरोहितः अस्मि। तस्मात् कारणात् अस्मिन् विभाजनकाले मम उपस्थितिः आवश्यकी अस्ति।"

एवम् उक्त्वा अर्चकः मङ्गलस्य पृष्ठभागे उपविष्टवान्। तस्मात् नत्थूमलः बहुः कुपितः जातः। सः मङ्गलम्- "मङ्गल! एतं बहिः निष्कासयतु" इति अवदत्।

मङ्गलः वक्तुम् किमपि उद्युक्तः जातः किन्तु अर्चकः अनुक्षणम्- "अहं मङ्गलस्य आह्वानकारणात् न आगतः। न वा मङ्गलस्य कथनात् इतः गमिष्यामि। अहं यथा मङ्गलस्य पुरोहितः अस्मि तथा एव तन्मातुः, तस्य भ्रातुः रामोः अपि पुरोहितः अस्मि। अहं गृहस्य सर्वविधं प्रकरणं द्रष्टुम् अर्हः अस्मि" इति अवदत्। तदा नत्थूमलः- "अर्चकवर्य! कदाचित् भवान् ताडनम् एव प्राप्नुयात्" इति सक्रोधम् अवदत्।

"कस्य ताडनम्?........ मम?........ कः ताडयिष्यति? किञ्चित् बहिः गत्वा पश्यतु। मम परतया कति जनाः स्थिताः सन्ति"।

नत्थूमलः बहिः अपश्यत्। तत्र विंशत्यधिकाः जनाः स्कन्धेषु काष्ठदण्डम् आरोप्य स्थिताः आसन्। तत् दृष्ट्वा तस्य हृत्कम्पनं जातम्। आत्मानं विपद्ग्रस्तं ज्ञात्वा सः बहुयत्नेन मनसः नियन्त्रणं प्राप्तवान्, मङ्गलम् उक्तवान् च- "मङ्गल! भवान् ज्येष्ठः भ्राता अस्ति। भवान् एव वदतु, किं दातुम् इच्छति अनुजाय?" इति।

"यत् किमपि एषः याचितुम् अर्हति"।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"तथापि भवान् एव वदतु। रामोः कः अधिकारः अस्ति?"

"वद रामु!" इति मङ्गलः रामुं दृष्ट्वा पृष्टवान्- "वद, किम् इच्छसि?" इति।

"सः तु अवयस्कः अस्ति। सः किं याचिष्यति?"

"तर्हि मातरं पृष्ट्वा वदेत्"।

"अहं तस्य मातरं पृष्टवान् अस्मि। अहं यत् किमपि वदामि, तत् सर्वं तां पृष्ट्वा एव वदामि। अस्य वर्षस्य कृषेः उत्पादनं त्रिषु भागेषु विभक्तं करोतु। एकः भागः भवतः मातुः, द्वितीयः भागः रामोः, तृतीयः भागः च भवतः भविष्यति"। इति नत्थूमलः कृष्युत्पादनविषये विभाजनस्य रूपरेखाम् अवदत्।

"तर्हि, किं माता रामुः च एतादृशेन विभाजनेन प्रसन्नौ स्तः?" इति मङ्गलेन पृष्टम्।

"भविष्यनिमित्तं भूमेः अपि भागत्रयं भवतु। यदि भवान् प्रबन्धनं कर्तुम् अर्हति तर्हि उत्पादनस्य भागत्रयं भवेत्। नोचेत् भवान् स्वस्य भागस्य स्वामी भवतु। अवशिष्टस्य भागद्वयस्य व्यवस्थां रामोः माता यथेच्छं करिष्यति" इति नत्थूमलः पुनः अवदत्।

"मम कापि आपत्तिः नास्ति। यथा माता इच्छति तथा करोतु"।

"अस्तु तावत्! एतस्य निर्णयस्य लेखनं भवतु।"

तत्क्षणम् अर्चकः उक्तवान्- "गृहे विद्यमानानि आभूषणानि अपि विभक्तानि भवेयुः?" इति।

"तूष्णीं भवतु!" इति नत्थूमलः तं तर्जितवान् एव।

"लालमहोदय! न्यायस्य सिंहासने उपविष्टवान् अस्ति, तर्हि पूर्णं न्यायं करोतु।"

"अहं कथयामि यत् एवं हस्तक्षेपं कुर्वन् भवान् मङ्गलस्य कल्याणं न करोति।"

"किन्तु अहं पृच्छामि, भवते कन्या दत्ता, सर्वं गृहं तु न दत्तम्। तर्हि केन अधिकार-बलेन भवान् एतत् सर्वं वदन् अस्ति"? इति अर्चकः अपृच्छत्।

"काचित् अबला विधवा मां निर्णयं कर्तुम् आहूतवती। कस्यचित् अनाथस्य रक्षणं कर्तुम् अपि अत्र आगतः अस्मि"।

"भगवान् माम् अपि एतत् द्रष्टुं प्रेषितवान् अस्ति यत् कस्यापि कृते अन्यायः न भवेत्। पश्यतु लालनत्थूमल! मङ्गलस्य पत्न्यै आभूषणानि आवश्यकानि। अतः एव अहं मङ्गलस्य परतया वदामि यत् आभूषणानि अपि विभक्तानि भवेयुः"।

"शृणोतु अर्चकवर्य!" इति मङ्गलः एतं विवादं समाप्तं कुर्वन्- "अहं तु सर्वम् एतस्य इच्छानुसारं करिष्यामि। मह्यं तु भूमेः तृतीयः भागः अपि एतस्य इच्छां विना न आवश्यकः। एषा मम माता अस्ति। रामुः भ्राता अस्ति। यथेच्छं सर्वम् अपि एतौ अधि-ग्रहीतुम् अर्हतः। यदि एतयोः मनसि किञ्चित् दातुम् इच्छा अस्ति तर्हि दीयताम्। इच्छा नास्ति चेत् न दीयताम्"। इति अवदत्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"अर्चकवर्य!" इत्येव सम्बोधयन् नत्थूमलः तं तर्जयितुम् इच्छन्- "भोः! अनाहूतः अतिथिः इव, पृच्छां कर्तुम् आगतः किम्?" इति उक्तवान्। तदा अर्चकः धैर्येण- "अहं कस्यचिद् अधिवक्तृरूपेण अत्र न आगतः। गृहस्य पुरोहितः अस्मि। अपि च ग्रामप्रमुखस्य अनुमतिं स्वीकृत्य आगतः अस्मि। मङ्गलः तु निश्छलः जनः अस्ति। भवान् तु बहुः चतुरः अस्ति। भवतः चातुर्यात् तस्य रक्षणं नितराम् आवश्यकम् अस्ति" इति अवदत्।

"अस्तु तावत्, तूष्णीं भवतु इदानीम्। मङ्गल! भवान् वदतु यत् किम् इच्छति?"

मङ्गलः नत्थूमलस्य धूर्ततायै कुप्यति स्म। किन्तु अस्य कलहस्य मुख्या कारणीभूता माता एव अस्ति। एतस्यां स्थितौ अन्यस्य कृते कः उपालम्भः इत्यपि चिन्तयति स्म। सः उक्तवान्- "अर्चकवर्यः मयि सर्वदा कृपाभावं दर्शयति, इत्यतः मम हानिलाभयोः विषये एतस्य अधिका चिन्ता भवति। यद्यपि सर्वे ग्रामवासिनः मयि प्रेमभावं दर्शयन्ति, तदर्थम् अहम् एतेषां कृतज्ञः अपि अस्मि। किन्तु अहं वदामि यः विभाजनस्य विचारः अत्र उपस्थितः जातः, सः भवेत् एव। मुख्यः विषयः एषः अस्ति यत् मया किं किं प्राप्तव्यम् इति। अत्र माता एव निर्णयं करिष्यति। मातः, वदतु, किमपि ददाति उत न?" इति।

तदा माता- "पश्यतु मङ्गल! तव पालनं पोषणं च जातम्। तव विवाहः अपि जातः। भगवान् त्वां सर्वप्रकारयोग्यं कृतवान्। तस्मात् त्वं भ्रातुः संरक्षणं कुर्याः" इति उक्तवती।

"अस्तु, अहं भवत्याः वचनम् अङ्गीकरोमि। मुखेन वदतु, किमपि किञ्चित् ददाति वा? अहं तु भवतीं पितुः स्थाने एव भावयामि। यत् किमपि प्रसन्नमनसा ददाति तत् अहं स्वीकरिष्यामि"।

"तर्हि एवं करोतु। स्वस्य कृते पृथक् गृहं करोतु। तव पत्नीं दृष्ट्वा मम मनसि ईर्ष्या उत्पन्ना भवति। निम्बवृक्षस्य पश्चिमायां दिशि यत् क्षेत्रम् अस्ति तत् त्वं स्वीकुरु। यानि आभूषणानि तव पत्न्या मातृगृहात् आनीतानि तानि सा एव स्वीकुर्यात्। यानि आभूषणानि अस्य गृहस्य सन्ति, तेषु कानिचित् सोहन्यै दत्तानि। कानिचित् च रामोः पत्न्याः कृते स्थापितानि सन्ति" इति।

"मातः! लालमहोदयस्य समीपे सार्धद्विसहस्रं रूप्यकाणि सन्ति, तेषां किम्?" इति मङ्गलः अपृच्छत्। "तानि रामोः विवाहकाले व्ययार्थं त्यजतु। यत् उत्पादनम् अस्मिन् वर्षे जातं, तस्य तृतीयं भागं त्वं स्वीकर्तुम् अर्हसि"।

अपरस्मिन् क्षणे ग्रामप्रमुखः अपि गृहस्य अन्तः प्रविष्टवान्। सः अपि एतादृशस्य अन्याययुक्तस्य विभाजनस्य निर्णयं शृण्वन् आसीत्। तस्मात् मङ्गलस्य कथनात् प्राक् एव- "मङ्गल, किञ्चित् वचनं शृणोतु!.... अत्र आगच्छतु!" इति कथयन् ग्रामप्रमुखः तं बहिः आह्वयत्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नत्थूमलः ग्रामप्रमुखस्य वचनं श्रोतुम् उद्युक्तं मङ्गलं दृष्ट्वा- "अस्माकं पार्श्वे अधिकः समयः नास्ति। अस्माभिः अन्यानि अपि कार्याणि करणीयानि सन्ति" इति अवदत्। "तिष्ठतु लालवर्य! त्वरा किमर्थम्? अद्य वा श्वः वा एतत् भविष्यति एव"।

मङ्गलः यदा ग्रामप्रमुखेन सह तस्मात् प्रकोष्ठात् बहिः आगतवान्, तत्र सर्वे ग्रामीणाः उपस्थिताः आसन्। युवानः वृद्धाः बालकाः स्त्रियः पुरुषाः अपि उपस्थिताः आसन्। तान् प्रति अङ्गुलिनिर्देशेन ग्रामप्रमुखः "मङ्गल! पश्यतु, एषः समस्तः ग्रामः भवतः साहायतां कर्तुम् अत्र एकत्रितः अस्ति। एते जानन्ति यत् एषः लालमहोदयः भवतः मातुः भ्रातुः च सम्पत्तिं छलेन अधिग्रहीतुं कापट्यं रचितवान् अस्ति। भवान् एतेषां वचनं न अङ्गीकरोतु। ते भवतः किञ्चित् अपि हानिं कर्तुं न अर्हन्ति" इति उक्तवान्।

"अहं भवतां कृतज्ञः अस्मि। किन्तु चौधरि, एकं विषयं भवान् न जानाति। माता इति पदं भगवता दीयमानं किञ्चित् अमूल्यम् उपायनं भवति। तस्याः प्रसन्नतायाः रक्षणम् आज्ञायाः पालनं च पुत्रस्य कर्तव्यम् अस्ति। भूमेः, गृहात्, ऐश्वर्यात् अपि श्रेष्ठः मातापुत्रसम्बन्धः। अहं तादृशं किञ्चित् अपि न वदिष्यामि येन मातुः मनः खिन्नं भवेत्। नैव, चौधरि! एवं न भविष्यति। माता तत् सर्वं स्वीकुर्यात् यत् वदन्ती अस्ति। अन्ततोगत्वा सा माता एव अस्ति खलु। तया एव एतत् शरीरं दत्तं पालितं पोषितं च। किम् अहं तस्याः कृते एतत् अपि कर्तुं न शक्नोमि?"

"किन्तु, निम्बवृक्षस्य अग्रे भूमेः अर्धांशभागः ऊषरः अस्ति।"

"अहं तदपि न स्वीकरिष्यामि। तत् स्वीकृत्य तु कुख्यातः एव भविष्यामि।"

"तर्हि कुत्र कर्षणं करिष्यति? आजीविका का भविष्यति?"

"नगरं गत्वा पारिश्रमिकं करिष्यामि।"

"पारिश्रमिकं करिष्यति भवान्?"

ग्रामप्रमुखस्य मुखम् उद्घाटितम् एव आसीत्। मङ्गलः तं तत्र एव त्यक्त्वा पुनः स्वस्य स्थानम् आगत्य- "मम स्वीकृतिः अस्ति। यत् किञ्चित् माता वदति, अहं तत्सर्वं अङ्गीकर्तुं सज्जः अस्मि" इति अवदत्।

"तर्हि एतस्य निर्णयस्य लेखनकार्यं करणीयं खलु!" इति नत्थूमलः त्वरां प्रदर्शयन् अवदत्।

"भवान् लिखतु, अहं सज्जः अस्मि"।

५

विभाजनस्य पत्रे सर्वं लेखितं जातम्। मङ्गलः, माता, अनुजः रामुः च तस्मिन् पत्रे हस्ताङ्कनम् अकुर्वन्। लालनत्थूमलः शङ्करः च साक्षिणौ आस्ताम्। किन्तु ग्रामस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कस्यचित् अपि जनस्य साक्षित्वं न आसीत्।

मङ्गलः तदा एकं विषयम् उक्तवान्- "यदि समस्तात् उत्पादनात् तृतीयांशः मया प्राप्स्यते तर्हि तेन अहं पृथक् गृहं निर्मातुं शक्नोमि" इति।

"तत् प्राप्स्यति।"

"कदा?" इति नत्थूमलेन कथितं वचनं द्रढीकर्तुम् अर्चकः पृष्टवान्।

"यदा उत्पादनस्य विक्रयणं भविष्यति तदा तृतीयांशस्य मूल्यम् एषः प्राप्स्यति" इति नत्थूमलेन उक्तम्।

"मह्यं रुप्यकाणि न आवश्यकानि। गोधूमः बुषं च यदि प्राप्येत तर्हि सम्यक् भवेत्।"

"अस्मिन् विषये विचारं करिष्यामः" इति उक्त्वा विभाजनचर्चां समापितवती माता।

सर्वे स्वस्थानात् उत्थिताः। लालनत्थूमलः रामुः, तस्य माता, शङ्करः सोहनी च सर्वे वाहनेन नगरं गन्तुम् उद्यताः अभवन्। गमनात् पूर्वं माता मङ्गलम्- "अहं पञ्चषदिनानां पश्चात् आगमिष्यामि। तावत् स्वस्य कृते गृहस्य प्रबन्धनं कुरु" इति उक्तवती।

मङ्गलः मौनेन सर्वं पश्यन् आसीत्। ते वाहनेषु उपविश्य गतवन्तः।

ग्रामीणाः भोजनं कृत्वा स्वगृहं गतवन्तः। मङ्गलः अस्यां परिवृत्तायां परिस्थितौ गम्भीरतापूर्वकं चिन्तनं कुर्वन् गच्छतः जनान् च पश्यन् आसीत्। अर्चकः ग्रामप्रमुखः च तस्य सम्मुखे तूष्णीं स्थितौ आस्ताम्। यदा सर्वे गतवन्तः तदा अर्चकः मङ्गलस्य स्कन्धे हस्तं स्थापयित्वा- "एतत् किं कृतवान् मङ्गल? स्वस्य पादयोः एव कुठारपातं कृतवान्?" इति अपृच्छत्।

"यत् कृतं, तत् सम्यक् कृतम्। अर्चकवर्य! जीवनं नाम काचित् क्रीडा। जीवितस्य मम एषा क्रीडा इदानीं न समाप्ता। इदानीं तु एतस्याः पूर्वार्द्धः अपि न समाप्तः। अहम् आत्मनि भगवति च विश्वसिमि। तथा च एतत् अपि जानामि यत् अहम् आत्मनः स्थितिं सुष्ठु करिष्यामि। किन्तु एषः स्वार्थी लालनत्थूमलः रामोः रक्तस्य अपि चूषणं करिष्यति। तदा किं भवेत् इति मम भीतिः अस्ति।"

"अधुना किं कर्तुम् इच्छति भवान्?"

"यदि उत्पादनस्य चतुर्थांशः प्राप्येत तर्हि तं विक्रीय अग्रिमं वाणिज्यं कुर्याम्"।

"अधुना उत्पादनं तु प्राप्तम् इव मङ्गल! तस्मात् अपि मुक्तः भवतु!" इति ग्रामप्रमुखः उक्तवान्।

"न प्राप्यते चेत् परिश्रमं कृत्वा स्वस्य उदरं पोषयिष्यामि। कश्चित् पुत्रः मातुः प्रीत्यर्थं किं किं कर्तुं शक्नोति इति वक्तुं शक्नोमि अहम्" इति सगौरवम् अवदत् मङ्गलः।

ग्रामप्रमुखस्य चिन्तनं सत्यम् एव आसीत्। अग्रिमे दिने नगरात् पञ्चाशत् शकटानि आगत्य ततः बुषम् अनयन्। वाहनैः सह द्वौ आरक्षकौ अपि आस्ताम्। दिनत्रये

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बुषस्य आरोपणं समाप्तम्। तदनन्तरं गोधूमस्य भारारोपणम् आरब्धम्।

भोजदिने सर्वान् आपृच्छ्य मङ्गलः यदा अन्तः मोहिन्याः समीपं गतवान् तदा सा अवनम्य पत्युः चरणस्पर्शं कृतवती।

"किं जातं मोहिनी?" इति मङ्गलः पृष्टवान्।

"भवान् मम लज्जायाः रक्षणं कृतवान्। यदि स्वल्पः अपि कलहः अभविष्यत् तर्हि जनाः अकथयिष्यन् यत् पत्न्याः कृते जनन्या सह कलहं करोति इति"।

"किन्तु अनया स्थित्या प्राप्यमाणस्य परिणामस्य चिन्तनम् अपि कृतवती त्वम्"?

"वयं निर्धनाः जाताः, एतत् एव खलु?"

"आम्, निर्धनाः......... सर्वथा दीनाः! समस्तः ग्रामः इच्छति स्म यत् मया एतत् विभाजनं न अङ्गीकरणीयम्। अहं जानामि स्म यदि निराकरणम् अकरिष्यं तर्हि ते मम क्षतिं कर्तुं न अशक्ष्यन्। किन्तु मम मुखं त्वया तालेन पिहितम् आसीत्। मातुः वचनं पालनीयम् इति त्वं यत् शपथपूर्वकम् उक्तवती आसीः तत् अहं पालितवान्। माता तु मां जलं पातुम् अपि अयोग्यं कृतवती"।

"तर्हि भवान् किं मह्यं कुपितः अस्ति?"

"कुपितः तु न अस्मि, किन्तु कश्चन अभिप्रायः अस्ति। अधुना अत्यन्तं परिश्रमेण निर्धनतया च जीवनं व्यतीतं भविष्यति।"

"किं भवतः मनः एतस्मात् बिभेति?"

"अहं न बिभेमि। अहं तव विषये वदन् अस्मि"।

"भवता सह निवासं कुर्वती अहम् अत्यन्तं सुखम् अनुभवामि। एतत् सुखमयं जीवनम् एव अहम् उत्तमं मन्ये"।

दिनद्वयस्य पश्चात् यदा बुषम् आरोपितं, नगरं प्रति नीयमानं च आसीत् तदा मङ्गलः ग्रामप्रमुखेन उक्तं वचनं स्मृतवान्। त्रिषु दिनेषु सर्वं बुषं नगरं प्रति प्राप्तम्। न केवलं मङ्गलस्य भागः, अपि तु पशूनाम् आहारार्थम् अपि किमपि न अवशिष्टं जातम्। इत्थं सप्ताहाभ्यन्तरे सर्वं गोधूमः बुषं च नगरं प्रति प्राप्तम्। ग्रामीणाः तं कथयन्तः आसन् यत् न्यायालयं गत्वा अभियोगं करोतु इति। किन्तु मङ्गलः सर्वान् एतत् एव अकथयत् यत् मात्रा सह कलहं न करिष्यामि इति। सः कस्यापि वचनं न श्रुतवान् एव।

अर्चकस्य धर्मपत्नी अपि- "तव कीदृशी दशा भविष्यति इति जानासि किम्? क्व महाराज्ञी इव शासनं क्व च एषा निर्धनता। एतस्मिन् विषये त्वम् एव मङ्गलं बोधाय" इति मोहिनीम् अकथयत्।

"मातृभगिनि! सः यत् कुर्वन् अस्ति तत् मां पृष्ट्वा एव कुर्वन् अस्ति। सः सर्वं सुष्ठु एव कुर्वन् अस्ति इति अहं चिन्तयामि"।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"तर्हि अधुना किं करिष्यसि?"

"तत् एव यत् भगवान् इच्छति" इति मोहिनी उक्तवती।

ग्रामीणाः मोहिन्याः पितुः समीपम् अगच्छन्। तस्याः पिता- "यदा सः अन्यस्य कस्यचित् वचनपालनं न अकरोत्, तर्हि मम वचनपालनं कथं करिष्यति!" इति अवदत्।

यदा सर्वः गोधूमः नगरं प्रति गतः तदा मङ्गलः लालनत्थूमलस्य आपणं गतवान्। तत्र गत्वा तेन ज्ञातं यत् नत्थूमलः न्यायालयं गतवान् अस्ति। सः तस्य प्रतीक्षां कर्तुं तत्र उपविष्टवान्। गणकः अपृच्छत्- "किं कार्यम् अस्ति चौधरिमहोदय?"

"सर्वम् उत्पादनम् अत्र प्राप्तम् अस्ति। अतः किञ्चित् धनं नेतुम् आगतवान् अस्मि"।

गणकः स्मितं कुर्वन्- "भवतः नाम्ना इदानीं गणनापञ्जिका नास्ति। काचित् नूतना गणनापञ्जिका रामोः नाम्ना आरब्धा अस्ति। तस्याम् एव सर्वेषाम् उत्पादनानां गणना कृता अस्ति" इति अवदत्।

तथापि मङ्गलः तस्मिन् विषये अन्तिमां चर्चां कर्तुम् उपविष्टः। सायङ्कालात् किञ्चित् पूर्वं नत्थूमलः आगतः। उपविष्टं मङ्गलं दृष्ट्वा स्थित्वा एव- "किमर्थम् आगतः मङ्गल"? इति अपृच्छत्।

"स्वस्य उत्पादनभागस्य मूल्यं प्राप्तुम्"।

"सर्वम् उत्पादनं भवतः भ्रातुः नाम्ना लिखितम् अस्ति। यदि तस्य मातुः हस्तेन लेखयित्वा आनेष्यति तर्हि रूप्यकाणि प्राप्तुम् अर्हति"।

"मम भागं भवान् रामोः नाम्ना किमर्थं लिखितवान्"?

"भवतः मातुः कथनानुसारम्। यदि भवतः कलहः अस्ति तर्हि मात्रा सह भविष्यति। सा अस्मान् यत् वदिष्यति तत् एव भविष्यति। यदि सा सर्वं भवते दातुं वदिष्यति, तर्हि अस्माकं कापि आपत्तिः न स्यात्"

"सा गृहे अस्ति किम्"?

"आम्"।

मङ्गलः सोहन्याः गृहम् अगच्छत्। तत्र अपि तेन मातुः प्रतीक्षा करणीया अभवत्। सा अधः आगमने एव विलम्बम् अकरोत्। यदा सा आगता तदा सः पृष्टवान्- "मातः! भवती मम भागम् अपि रामोः नाम्ना लेखितवती किम्"? इति।

"तर्हि किं जातम्?"

"मह्यं रूप्यकाणि आवश्यकानि। अतः भवती लालमहोदयाय लिखित्वा ददातु यत् सः मदीयं भागं मह्यं दद्यात्"।

"अहं किमपि न जानामि। लालवर्यः गृहम् आगमिष्यति तर्हि तद्द्वारा लेखयिष्यामि।"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"मङ्गलः अवगतवान् यत् क्रीडा समाप्ता जाता। ततः सः अवदत्- "मातः, अहम् इदानीं न गमिष्यामि। यत् किमपि भवती कृतवती, तस्य विषये भवती एव जानाति। भवत्याः कार्यविषये भगवान् एव जानाति। अहं श्वः गृहं त्यक्ष्यामि। तत्र गोवृषभाः सन्ति। तेषां कृते अपि तत्र बुषम् अवशिष्टं नास्ति। किञ्चित् अन्नं स्थापितम् अस्ति, किन्तु केवलेन अन्नेन तु निर्वाहः न भविष्यति। तस्य व्यवस्थाम् अपि करोतु। कदाचित् भवती गोहत्यायाः पापभाक् न भवेत्" इति।

एवम् उक्त्वा सः प्रणामं कृत्वा ततः प्रस्थितः। तस्य मनः विषादपूर्णम् आसीत्। क्रोधेन अश्रुपातं जायमानम् आसीत्। सः तूष्णीं ग्रामं प्रति प्रस्थितः।

मङ्गलस्य बहुकालं यावत् प्रतिपालनं कुर्वत्याः मोहिन्याः हृत्कम्पनम् आरब्धम्। तस्याः मनसि बहुविधं भयम् उत्पन्नम्। गृहे एकाकिनी आसीत्, इत्यतः भीता अपि आसीत्। सायङ्कालः जातः। रात्रिः सन्निहिता। सर्वत्र अन्धकारः प्रसृतः। सा हरिकेन इति नामकं नेयदीपं प्रज्वाल्य गृहद्वारे प्रतीक्षां करोति स्म।

मङ्गलः यदा रात्रौ दशवादने गृहं प्रत्यागतः तदा पत्न्याः म्लानमुखं दृष्ट्वा दुःखितः जातः। सः पृष्टवान्- "एवं म्लानमुखेन किमर्थम् उपविष्टा असि त्वम्"? इति।

"अर्धरात्रिः व्यतीता अस्ति, भवान् इदानीं प्रत्यागतः!"

"अहं असकृत् गमनस्य अपेक्षया सकृत् एव निर्णयं कृत्वा आगमनम् उत्तमम् इति चिन्तयामि स्म। अतः निर्णयः जातः। किमपि न प्राप्यते इदानीम्"।

"किञ्चित् अपि न"

"नैव!"

"एतत् तु दिने लुण्ठनम् इव जातं खलु?"

"आम्, एतस्य विरोधं कर्तुम् एकः उपायः अस्ति, अभियोगः। किन्तु मातरि अभियोगं न करिष्यामि। अपि च अभियोगं कर्तुं मयि शक्तिः अपि नास्ति"।

"किं भविष्यति अभियोगेन? मम पिता वदति यत् कस्मिंश्चित् समये सः अपि भूस्वामी आसीत्। तस्य पिता तं विरुध्य अभियोगं कृतवान् आसीत्। तेन कारणेन तस्य सर्वं नष्टम् इव जातम्। इदानीम् अपि स्थितिः सम्यक् न जाता।"

"मोहिनि, अहम् अभियोगं न करिष्यामि। मातापुत्रयोः दुर्वार्ताः श्रुत्वा सर्वे हसेयुः। अतः चिन्तनस्य विषयः एषः अस्ति यत् इदानीं किं करणीयम्? गृहे तु द्वित्राणां दिनानां कृते अन्नम् अवशिष्टम् अस्ति। पशूनां कृते तु श्वस्तनः आहारः अपि नास्ति"।

"अन्यत्र कुत्रापि गच्छाव!"

"अस्तु, किन्तु गमनस्य कृते एकम् अपि नाणकम् नास्ति।"

Funding by IKS-MoE

"अहं मातुः सकाशात् किञ्चित् याचित्वा आनयामि।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"मम तु एवं याचनाकरणं लज्जास्पदं भाति। आम्, एकस्मिन् विषये मम दृष्टिः गच्छति। मातुः प्रकोष्ठे धनराशिः निखातः अस्ति। तम् उद्घाट्य पश्याव। कदाचित् किमपि प्राप्येत। तव आभूषणानि अपि तस्मिन् एव सन्ति। यदि तानि प्राप्यन्ते तर्हि सर्वं सुष्ठु भविष्यति"।

"तर्हि निष्कासयतु, तानि तु मम एव सन्ति।"

उभौ अपि अन्तः गतवन्तौ। भोजनं कृतवन्तौ। तदनन्तरं नेयदीपं स्वीकृत्य प्रकोष्ठस्य तालम् उद्घाटयितुं यत्नं कर्तुम् आरब्धवन्तौ। प्रकोष्ठस्य तालः तु सुखेन उद्घाटितः जातः किन्तु धनपेटिकायाः तालस्य उद्घाटने अधिकं काठिन्यम् अनुभूतम्। तस्याः कुञ्चिका मातुः पार्श्वे आसीत्। अन्यया कुञ्चिकया सा न उद्घाटिता। तालः सुदृढः आसीत्। अतः तं विनष्टं कर्तुं होराधिकः कालः अपेक्षितः जातः। मङ्गलः लौहयुतेन मुसलेन तालं ताडयित्वा भग्नं कृतवान्। तत्पश्चात् धनपेटिकायाः आवरणं यदा उद्घाटितं तदा ज्ञातं यत्, तत् पात्रं रिक्तम् अस्ति। किञ्चित् अपि धनं नास्ति तत्र इति।

एतावता परिश्रमेण साहसेन च कृतं कार्यं यदा निष्फलं जातं तदा तौ परस्परं मुखं पश्यन्तौ विस्मितौ जातौ। भित्तिघटी एकवादनं सूचयति स्म। अन्ततोगत्वा मङ्गलः स्वयम् उत्थितवान्। ततः मोहिनीम् उत्थाप्य- "एतत् सर्वं विमर्शनं कृत्वा एव कृतम्। अतः धनपेटिकायाः आवरणस्य नष्टताकारणतः आवां चौरौ जातौ स्वः। किन्तु किमपि न प्राप्तम्" इति अवदत्।

६

अन्येद्युः ग्रामे सर्वत्र प्रचारः जातः यत् मङ्गलः पत्न्या सह ग्रामं परित्यज्यन् अस्ति। सर्वे ग्रामीणाः दुःखपीडिताः आसन्। पूर्वं मङ्गलस्य उन्नतिं दृष्ट्वा ये जनाः तस्मै ईर्ष्यन्ति स्म ते अपि तस्य ग्रामत्यागवार्तां श्रुत्वा रोदनं कुर्वन्ति स्म। क्षेत्रेषु कार्यं कुर्वन्तः कार्मिकाः अपि एतत् श्रुत्वा व्याकुलाः अभवन्।

मङ्गलस्य विचारः तु सूर्योदयात् पूर्वम् एव ग्रामं त्यक्त्वा नगरं प्रति गमनस्य आसीत्। किन्तु सः इच्छति स्म यत् दश विंशतिः वा रूप्यकाणि कुतश्चित् लभ्येरन् तर्हि नगरे एकस्य प्रकोष्ठस्य व्यवस्था कर्तुम् शक्येत इति। सर्वप्रथमं मोहिनी पितुः समीपं गतवती। तस्य पार्श्वे रूप्यकद्वयं एव आसीत्। सः उक्तवान्- "पुत्रि! मध्याह्नपर्यन्तं किञ्चित् अन्नं विक्रीय धनम् आनेष्यामि" इति।

मङ्गलः अर्चकस्य समीपम् अगच्छत्। सः अपि- "मध्याह्नपर्यन्तं धनस्य व्यवस्थां करिष्यामि" इति उक्तवान्। अर्चकः पुनः अवदत्- "धनेन विना नगरगमनम् उचितं नास्ति। तत्रत्याः जनाः कठोरहृदयाः भवन्ति। धनं नास्ति चेत् वार्तालापम् अपि न कुर्वन्ति"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति अवदत्।

विवशीभूय मङ्गलः मोहिनी च ग्रामत्यागविचारम् अग्रिमं दिनं यावत् स्थगितवन्तौ। स्थगनवार्ता ग्रामे सर्वत्र प्रसृता जाता। प्रतिस्थानं गोष्ठ्यः जायमानाः आसन्। मङ्गलेन उक्तं वचनं पौनःपुन्येन 'मातुः प्रीत्यर्थं पुत्रः किं किं कर्तुं शक्नोति इति अहं कृत्वा दर्शयिष्यामि' इति चिन्तयन्तः जनाः तस्य बहुवारं प्रशंसां कुर्वन्ति स्म।

निम्नजातीयजनाः जनसमूहं विरचय्य मङ्गलस्य द्वारसमीपम् आगत्य उपविष्टवन्तः। मङ्गलेन यदा ज्ञातं तदा सः बहिः आगतः। द्विशताधिकाः स्त्रियः पुरुषाः च मङ्गलस्य द्वारे सत्याग्रहं कुर्वन्तः आसन्। मङ्गलः तान् दृष्ट्वा आश्चर्येण- "भ्रातरः! किं जातं? किमर्थम् आगताः भवन्तः?" इति पृष्टवान्।

"मङ्गलभ्रातः! अस्माकं जनसमूहः निश्चयम् अकरोत् यत् भवतः ग्रामत्यागविचारः उचितः नास्ति" इति कश्चन वयोवृद्धः ग्रामीणः अवदत्।

"किमर्थम्? अहं कञ्चित् अपराधं कृतवान् वा? वदन्तु भ्रातरः, अहं किं कृतवान्?"

वयोवृद्धः अग्रे आगत्य अवदत्- "मङ्गल! अस्माकं निर्धनानां कुशलक्षेमं प्रष्टुं भवतः ऋते अत्र कः अस्ति? अतः वयं निर्णयं कृतवन्तः यत् ग्रामप्रमुखस्य गृहे भवतः वासव्यवस्था भविष्यति। अपि च वाटिकायाः दक्षिणपार्श्वे एकं गृहं निर्माय भवते दास्यामः। तदर्थं वयं श्वः आरभ्य कार्यं करिष्यामः। ऋतुपरिवर्तनं यावत् ग्रामीणाः भवतः कृते भोजनव्यवस्थाम् अपि करिष्यन्ति। क्षेत्रेषु बीजानि वप्तुम् अन्नस्य व्यवस्थां च वयं करिष्यामः स्मः" इति।

मङ्गलः तेषां सहानुभूतिव्यवहारेण बहुः प्रभावितः जातः। किन्तु सः ग्रामवासिभ्यः दानं स्वीकृत्य जीवितुं न इच्छति स्म। सः अवदत्- "भ्रातरः! भवतां प्रेमपूर्वकव्यवहारेण अहं कृतज्ञः अस्मि। किन्तु अहं भवद्भ्यः कष्टं दातुं न इच्छामि। अहं शीघ्रम् एव धनम् अर्जयित्वा आनेष्यामि। तदनन्तरं भवतां मध्ये वासं कर्तुं प्रयत्नं करिष्यामि। अधुना गन्तुं मह्यं स्वीकृतिं यच्छन्तु। अहं मृत्युपर्यन्तं भवतां सहानुभूतिं नैव विस्मर्तुं शक्नोमि" इति।

"नैव भ्रातः! वयं भवन्तं प्रेषयितुं न शक्नुमः। वयं भवतः द्वारे एव सत्याग्रहं करिष्यामः। भवतः मार्गस्य अवरोधनं करिष्यामः। किन्तु गमनाय अनुमतिं न दास्यामः।" इति विंशत्यधिकानां ग्रामीणानां मुखात् युगपत् ध्वनिः श्रुतः।

सः एव वयोवृद्धः पुनः- "वयं भवतः वंशक्रमे पञ्चपूर्वजानाम् अन्नं खादितवन्तः स्मः। तस्य किञ्चित् प्रतिफलं दातुम् अवसरं ददातु। भवतः भोजनस्य पानस्य च दायित्त्वं वयं स्वीकुर्मः। दायित्त्वनिर्वहणे अस्माकं का क्षतिः। एतत् भवतः पूर्वजैः दत्तस्य, भवता दीयमानस्य एकम् अंशमात्रम् अपि न ग्रहीष्यति। अस्मिन् वर्षे ऋतुकालः सम्यक् अस्ति। उत्पादनम् सम्यक् जातम्। भवान् अस्मभ्यं सम्यक् पारिश्रमिकं दत्तवान्। तस्मात्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अस्माकं पार्श्वे बहु किमपि अस्ति। भवतः उपस्थित्या वयं निश्चयेन उन्नतिपथं गमिष्यामः। नोचेत्, भ्रातः! अस्मकं सर्वनाशः भविष्यति" इति उक्तवान्।

"किन्तु पितामह!" मङ्गलः हस्तौ संयोज्य उक्तवान्- "अस्माकं कृषकाणां प्राणाः भूमौ भवन्ति। भवान् जानाति एव यत् मम समीपे भूमिः नास्ति। मम मूलम् इतः समाप्तं जातम्। वायुना पर्णहीनतां प्राप्तवान् मूलवृक्षः इव अहम् शुष्कीभूय म्लानः भविष्यामि। मया अन्यत्र कुत्रचित् गत्वा मूलग्रहणं करणीयम् अस्ति।" इति।

"एतत् अपि भविष्यति। अर्चकः वदति स्म यत् अस्मिन् एव ग्रामे बहवः भूमिखण्डाः अकृष्टाः सन्ति। तान् क्रष्टुं शक्नोति भवान्"।

"भवतः तात्पर्यं बमदिशं गतवतः मनोहरस्य भूमिविषये अस्ति सा भूमिः तु विंशतिबीघापरिमिता अस्ति। किं मनोहरः मह्यं तां क्रष्टुं अनुमतिं दद्यात्?" इति मङ्गलेन पृष्टम्।

एतस्मिन् अवसरे अर्चकः यः अदृश्यः आसीत्, अग्रे आगतः। सः मङ्गलस्य समीपम् आगत्य तस्य कर्णे- "भ्रातः! धनस्य व्यवस्थां तु कृतवान्। किन्तु अहं कथयामि यत् एतेषां ग्रामीणानां वचनं पालयतु। कुत्र इतस्ततः अटनं करिष्यति? द्वित्रेषु वर्षेषु सर्वं पूर्ववत् भवेत्। रामोः भूमिविक्रयणं तु भविष्यति एव। तावत् भूमिक्रयणस्य शक्तिं स्वस्मिन् वर्धयतु। मनोहरस्य भूमेः प्रबन्धनम् अहं करिष्यामि। भवान् अत्र एव तिष्ठतु। ग्रामीणाः भवते स्वस्य प्राणान् अपि अर्पयितुं सज्जाः सन्ति। भ्रातः! एतेषां वचनपालनं करोतु भवान्" इति उक्तवान्।

मङ्गलस्य मनसि द्वैधीभावः जातः। सः सर्वान्- "मया चिन्तनं करणीयम् अस्ति। अहं पत्न्या सह विमर्शं करिष्यामि" इति अवदत्।

"भ्रातः! चिन्तयतु अथवा न चिन्तयतु, वयं तु भवते गमनाय अवसरं न कल्पयिष्यामः। सकृत् 'आम्' इति वदति चेत् पश्यतु वयं भवतः कृते किं किं कर्तुं शक्नुमः" इति सर्वे ग्रामीणाः अवदन्।

मङ्गलः अर्चकेण सह अन्तः गतवान्। मोहिनी कपाटस्य पृष्ठतः स्थित्वा सर्वं सम्भाषणं शृण्वती आसीत्। परिश्रमेण उदरं पोषितवतां सरलस्वभाववतां ग्रामीणानां सहानुभूतिवचनैः कृतज्ञताम् अनुभूय तस्याः नेत्राभ्याम् अश्रूणि निर्गतानि। यदा मङ्गलः अन्तः आगतः तदा सा शीघ्रम् एव अश्रुमार्जनं कर्तुं यत्नं कृतवती। किन्तु अर्चकात् गोपयितुं न शक्तवती। सः उक्तवान्- "मोहिनि पुत्रि! एतत् किम्? आत्मानं निलीय किमर्थं रोदनं करोति?" इति।

मोहिनी मुखे प्रसन्नतां प्रकटयितुं हासाभिनयं च कुर्वती- "पितृव्य, किमपि न" इत्येव उक्तवती।

Funding by IKS-MoE

"किमपि न! अरे, भवत्याः कपोलद्वयम् इदानीम् अपि आद्रम् अस्ति। किम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एतेषां प्रस्तावः भवत्यै न अरोचत?" इति अपृच्छत् अर्चकः।

एतावता एव सर्वे ग्रामीणाः गृहस्य अङ्गणम् आगतवन्तः। अर्चकः प्रकोष्ठस्य देहल्याम् उपविश्य- "पश्यतु मोहिनि पुत्रि! एताः भवत्याः प्रजाः सन्ति। एतासाम् आग्रहस्य अवहेलनां राजानः अपि कर्तुं न शक्नुवन्ति। तस्मात् भवत्या अपि इतः गमनस्य हठः त्याज्यः एव" इति अवदत्।

"एतेषां भावनां दृष्ट्वा मम शरीरं रोमाञ्चितं जातम् अस्ति। मम मुखे वचनं नास्ति येन अहं कृतज्ञतां प्रकटयेयम्। अहं न जानामि स्म यत् मम श्वश्र्वाः पुत्रः तावान् उत्तमः अस्ति यस्मिन् जनाः अत्यन्तं स्निह्यन्ति। अहं चिन्तयामि यत् पूर्वजन्मनि मया बहु उत्तमं पुण्यकर्म कृतं येन एतस्य चरणयोः सान्निध्यं प्राप्तम्" इति।

"किन्तु अर्चकवर्य! एवं भाररूपेण जीवनयापनं किं सम्यक् भवेत्"? इति मङ्गलः पृष्टवान्।

"भाररूपेण जीवनयापनस्य आवश्यकता एव नास्ति। पश्यतु, यदि भवान् ऋणं स्वीकृत्य कार्यं कर्तुं नगरं गमिष्यति तर्हि किम् एषः भारः नास्ति? एतेभ्यः यत् किमपि स्वीकरोति तत् ऋणं मत्वा स्वीकरोतु। ततः उत्तमे समये आगते सति कुसीदसहितं ऋणं प्रत्यर्पयतु"।

"मनोहरस्य भूमिः यदि लभ्येत तर्हि कार्यं सिद्धं भवेत्" इति मङ्गलः असूचयत्।

"अहं ग्रामभूलेखकेन सह विमर्शं कृतवान् अस्मि। सः वदति स्म यत् भूमिः बहुभ्यः वर्षेभ्यः अकृष्टा अस्ति। तस्मात् तस्याः कर्षणेन बीजवपनेन च ग्रामस्य कल्याणं भविष्यति। भूम्यधिकारपत्रं बर्मातः अपि लेखयितुं शक्यते" इति उक्तवान् अर्चकः।

आग्रहः सफलः जातः। मङ्गलः अर्चकस्य गृहे वासं कर्तुम् आरब्धवान्। तस्मिन् एव दिने सः मातुः समीपं सन्देशं प्रेषितवान्- "अहं गृहपरिवर्तनं कृतवान्। धेनुद्वयं वृषभद्वयं च आत्मना सह नीतवान्। अन्ये धेनुवृषभाः तत्र एव रज्जुभिः बद्धाः सन्ति। तेषां रक्षणस्य प्रबन्धनं भवत्या करणीयम्" इति।

जनाः अर्चकस्य कथनानुसारं वाटिकायाः दक्षिणपार्श्वे गृहस्य मूलाधारं स्थापितवन्तः। ग्रामस्य पञ्चाशदधिकाः कर्मकराः मिलित्वा एकस्मिन् मासे एव मृत्तिकानिर्मितं गृहं सज्जीकृतवन्तः। भित्तयः अन्तस्तात् बहिर्भागतः च सुधालिप्ताः जाताः। छदिः मृत्पट्टिकाभिः आच्छादिता जाता।

वर्षाकालस्य आरम्भात् पूर्वं मङ्गलः मोहिन्या सह नूतने गृहे वासं कर्तुम् आरब्धवान्। धेनुद्वयस्य वृषभद्वयस्य च कृते गोशाला अपि निर्मिता जाता।

ततः चौधरिमनोहरः भूमेः कर्षणार्थं स्वीकृतिपत्रं प्रेषितवान्। सः लिखितवान् आसीत् यत् भूम्यधिकारपत्रं सज्जीकृत्य आगन्तव्यम् इति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नगरस्य रीतिः

१

लालनत्थूमलः अन्नविपणौ महत्सु पदार्थविक्रेतृषु अन्यतमः आसीत्। पञ्चलक्षरूप्यकाणां दशलक्षरूप्यकाणां वा सम्पत्तिः तस्य आसीत्। सः प्रतिदिनं विंशतेः सहस्रस्य त्रिंशतः सहस्रस्य वा वाणिज्यं करोति स्म। समाजस्य विचारानुसारं सः अतीव कृपणः आसीत्। दानदक्षिणादिकार्येषु तस्य हृदयं कपोतहृदयम् इव दुर्बलम् आसीत्। कर्मचारिभ्यः अपि वेतनदानसमये सः कठोरः आसीत्। गृहस्य व्ययम् अपि बहु विमृश्य करोति स्म। एतत् तु सत्यं यत् तस्य सामान्यः आयः प्रतिदिनं द्विशताधिकम् आसीत्। किन्तु दिने रात्रौ च मुद्गस्य सूपः एव तस्य गृहे निर्मीयते स्म।

लालनत्थूमलः एतावतीं सम्पत्तिं संयोज्य अपि पुत्रं शङ्करदासं कस्मिंश्चित् साधारणे विद्यालये एव पाठितवान्। पुत्रः अष्टमकक्षापर्यन्तम् एव पठितवान्। तदनन्तरं नत्थूमलः पुत्रस्य गणनापुस्तकलेखनस्य अभ्यासं कारयित्वा स्वस्मिन् आपणे एव पञ्चविंशतिं रूप्यकाणि मासिकं वेतनं दत्त्वा कार्यं कारयति स्म।

शङ्करदासस्य हठः एव सोहन्याः पाणिग्रहणस्य मूलं कारणम् आसीत्। सः एकदा नगरे दुर्गादासेन सह अटन्तीं सोहनीं दृष्टवान् आसीत्। ततः विवाहं कर्तुं निश्चयम् अकरोत्। सः मातुः माध्यमेन पितरं स्वकीयं दृढं सङ्कल्पं सूचितवान्। यदि अहं विवाहं करिष्यामि तर्हि तया सह एव करिष्यामि, अन्यथा कदापि न करिष्यामि इत्यपि सः असूचयत्।

दुर्गादासस्य पुत्र्या सह शङ्करस्य विवाहः जातः। एतेन विवाहेन लालनत्थूमलस्य महती हानिः जाता। तस्य चिन्तनम् आसीत् यत् शङ्करस्य विवाहकाले दशसहस्रं विंशतिसहस्रं वा रूप्यकाणि प्राप्येरन्। यद्यपि तस्य चिन्तनं नष्टम् इव, तथापि सः स्वस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ध्येयपरिवर्तनं न अकरोत्। तस्य पूर्त्यै विवाहदिनात् एव अवसरं प्रतीक्षमाणः आसीत्। दुर्गादासस्य देहावसानस्य पश्चात् तेन अवसरः प्राप्तः एव। तस्य देहान्तस्य पश्चात् सः परिस्थितिम् अपश्यत्। तदनन्तरं स्थितिम् अनुकूलां कर्तुं यत्नम् अपि अकरोत्।

दुर्गादासस्य दाहसंस्कारं निर्वर्त्य आगमनकाले नत्थूमलः शङ्करं पृष्टवान्- "शङ्कर! अधुना त्वयि पत्न्यै कियत् प्रेम अस्ति? उत सा त्वयि कियत् स्निह्यति"? इति।

"सा माम् आराध्यदेवं भावयति इति अहं चिन्तयामि"।

"तर्हि पश्यतु, वयं वणिजः स्मः। वयं मृत्तिकातः सुवर्णम् उत्पादयामः। दुर्गादासस्य पुत्र्याः पाणिग्रहणं यत् त्वया कृतं तेन मम सहस्राधिकरूप्यकाणां हानिः अभवत्। यदि अन्यत्र कुत्रचित् विवाहः अभविष्यत् तर्हि सहस्राधिकरूप्यकाणि यौतुकरूपेण प्राप्तुं अशक्ष्यम्। अधुना सः कालः आगतः, यदा तस्य क्षतिपूर्तिः भवेत्"।

"एतत् कथं सम्भविष्यति"?

"एतस्य उपायम् अहं वदामि। वयं तव श्वश्र्वाः मनसि तस्याः कनिष्ठस्य पुत्रस्य कृते स्वाभाविक्याः वात्सल्यताम्नाः पोषणं कुर्याम। ज्येष्ठस्य पुत्रस्य कृते तस्याः मनसि अविश्वासं द्वेषभावं च जनयेम। तथा च तत्पत्न्याः कृते घृणाभावं जनयितुं प्रयत्नम् अपि कुर्याम"।

पितुः वचनं शङ्करस्य मनसि सुष्ठुरूपेण अङ्कितं जातम्। तस्मात् रात्रिकालात् सः कार्यम् अपि आरब्धवान्। तस्य योजनानुसारं रामुः विद्यालयतः प्रत्यागमनकाले भगिन्या सह मेलनं कर्तुं तस्याः गृहं गच्छति स्म। भगिनी रामोः पुरतः खेदं सहानुभूतिवचनं च वदति स्म। शङ्करः अपि द्वित्रदिनेषु एकवारं श्वश्र्वा सह मेलनसमये मोहिन्याः विरुद्धम् उत्तेजनां जनयति स्म। यदा रामोः माता सोहन्या सह मेलनं कर्तुं नगरं गच्छति स्म तदा तत्रत्याः सर्वाः महिलाः वध्वाः विरूद्धं किमपि प्रजल्प्य तस्याः मनः कलुषितं कुर्वन्ति स्म।

सामान्यायाः कस्याश्चित् ग्राम्यमहिलायाः मानसपरिवर्तने एकं वर्षम् अतीतं जातम्। ततः नगरक्रीडां दृष्ट्वा नगरे एव वासं कर्तुं रामुः उत्सुकः जातः। तस्य चेतसि एषा भावना आरोपिता यत् मङ्गलः एव तस्य सुखप्राप्तौ बाधकः अस्ति इति।

निरन्तरं क्रियमाणैः प्रयत्नैः योजना सफला जाता। लालनत्थूमलः तु एतत् चिन्तयति स्म- 'मङ्गलः मातरं विरुध्य अभियोगं करिष्यति येन सहस्ररूप्यकाणां व्ययः स्यात्। क्रमशः तस्य सर्वा सम्पत्तिः विक्रीता भवेत्। तस्मिन् समये मया अपि किमपि प्राप्तुं शक्येत' इति। किन्तु मङ्गलः तु सर्वस्य त्यागं कृतवान् आसीत्। मातरं विरुध्य अभियोगकरणम् अनुचितम् इत्यपि ज्ञातवान्। नत्थूमलाय एतत् सर्वं किञ्चित् अपि न अरोचत। एकदा रामुः तस्य माता च सर्वम् आभूषणं स्वीकृत्य जामातुः गृहम् आगच्छताम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आभूषणानां तोलनं जातम्। रजतनिर्मितानि आभूषणानि विंशतिकिलोपरिमितानि आसन्। सुवर्णेन निर्मितानि आभूषणानि त्रीणि किलोपरिमितानि आसन्। द्विसहस्राधिकं रोकधनम् आसीत्। एतत् सर्वं लालनत्थूमलः स्वस्मिन् धनकोशे स्थापितवान्। रामोः माता तं प्राप्तिपत्रं न याचितवती। नत्थूमलः अपि तन्निमित्तं पत्रं लिखित्वा न दत्तवान्। सः रामोः पुरतः तावत् सहानुभूतिवचनं वदति स्म, तथा च तस्य निःसहायस्थितौ तावान् द्रवीभूतः भवति स्म येन प्राप्तिपत्रस्य याचनाकरणं लालवर्यस्य अपमानजनकं भवेत्।

यदा मङ्गलस्य सन्देशः प्राप्तः यत् सः गृहत्यागं कुर्वन् अस्ति, आहारेण विना पशवः मरणासन्नाः सन्ति च तदा नत्थूमलः तान् पशून् ग्रामात् आनायितवान्। पशूनां विपणौ विक्रयणं कारितवान्। नत्थूमलस्य कथनानुसारं चतुर्णां वृषभाणां द्वयोः धेन्वोः च मूल्यं सार्धद्विशतम् आसीत्। तत् सर्वं तेन रामोः गणनापुस्तके लेखितम्।

मङ्गलः पशूनां विक्रयणस्य वार्ताम् अर्चकस्य माध्यमेन श्रुतवान्। वार्ताहरः एतत् अपि अवदत् यत् तेषां क्रेता कश्चन शौनिकः आसीत् इति। तस्मात् मङ्गलस्य बहु दुःखं समजायत। न जाने सः कियत्कालं यावत् एतेन जातेन दुःखेन अवाङ्मुखः सन् उपविष्टः आसीत्।

एषा वार्ता ग्रामे सर्वत्र प्रसृता। तस्मात् कारणात् ग्रामे रामोः मात्रा सोहन्याः श्वसुरालयजनैः च अर्जितं यशः समाप्तप्रायम् इव। परिणामः एषः जातः यत् कार्मिकैः अपि संकल्पितम् 'एतादृशानां पापिजनानां क्षेत्रेषु वयं कार्यं न करिष्यामः' इति।

मङ्गलेन विभाजनकाले निम्बवृक्षस्य दक्षिणदिशि ये विद्यमानाः भूमिखण्डाः प्राप्ताः ते एतावता अपि कृष्टाः न जाताः। तस्य चिन्तनम् आसीत्- 'तत्र बीजवपनं वृथा स्यात्। कार्मिकेभ्यः दीयमानस्य पारिश्रमिकस्य विनियोगः अपि न लभ्येत। तेभ्यः क्षेत्रेभ्यः कूपः अपि बहुदूरम् आसीत्। बहुभ्यः वर्षेभ्यः तस्याम् अकृष्टभूमौ कर्षणानन्तरम् अपि बहुः श्रमः आवश्यकः भवेत्' इति।

परिणामः एषः अभवत् यत् मङ्गलस्य स्वस्य भूमिखण्डाः अपि अकृष्टाः एव आसन्। यानि क्षेत्राणि रामोः अधिकारे आसन् तानि अपि अकृष्टानि आसन्। यतः तानि क्रष्टुं न प्रबन्धकः लब्धः न वा कश्चन कार्मिकः तत्र कार्यं कर्तुम् ऐच्छत्। ऋतोः अन्तकाले एकदा लालनत्थूमलः स्वयम् आगतः। ग्रामभूलेखकस्य साहाय्येन कार्मिकान् आहूय तान् कार्यं कर्तुम् उक्तवान्। कार्मिकाः एतस्मिन् विषये ग्रामप्रमुखं प्रष्टुम् अवदन्। नत्थूमलः ग्रामप्रमुखम् अपृच्छत्- "चौधरि, विंशतिबीघापरिमितं कृषिक्षेत्रम् अस्ति। कणिशं वज्रकः इत्यादीन् तत्र वप्तुं शक्यते। भवान् एतस्य सर्वस्य कृते कति हलानि दातुं शक्नोति" इति।

"एकम् अपि न" इति ग्रामप्रमुखेन उक्तम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"किमर्थम्"?

"भवादृशस्य गोहन्तुः भूमौ अस्मत्सु कश्चित् अपि जनः कार्यं न करिष्यति". इति ग्रामप्रमुखः उक्तवान्।

"तर्हि ते मूर्खाः सन्ति। गोहन्ता कः अस्ति? अहम्? कथम्? भवतः सम्भ्रमः जातः अस्ति। यस्य एतत् कार्यम् अस्ति, सः एव कृतवान् स्यात्। अस्माकं तेन सह कः सम्बन्धः? ये जनाः अस्माकं क्षेत्रेषु कार्यं करिष्यन्ति ते पारिश्रमिकं प्राप्स्यन्ति एव" इति नत्थूमलः स्वमतम् उपस्थापितवान्।

"वयं पारिश्रमिकं न इच्छामः। वयं तु धर्मम् इच्छामः। वयं भवता उक्तं कार्यं न करिष्यामः"।

ततः ग्रामभूलेखकः यः नत्थूमलस्य धनेन प्रभावितः आसीत् सः ग्रामप्रमुखं तर्जयन्- "चौधरि, विचिन्त्य वदतु। यावत् सामर्थ्यम् अस्ति तावत् एव वदतु। श्वः भवता विंशतिः जनाः लालवर्यस्य क्षेत्रेषु कार्यं कर्तुं प्रेषणीयाः एव" इति अवदत्।

"तर्हि एषा आजूः अस्ति किम्"?

"सत्यम्! आजूः एव। श्वः विंशतिं जनान् प्रेषयतु नोचेत् परिणामः सम्यक् न भविष्यति"।

चौधरी अवाङ्मुखः सन् ततः निर्गतः। ग्रामभूलेखकः आत्मप्रशंसां कुर्वन्- "लालवर्य! भवान् निश्चिन्तः भवतु। अहम् एतान् सम्यक् मार्गे आनयामि। अधमा जातिः अस्ति खलु! पादप्रहारं विना एतेषां बुद्धिः कार्यं न करोति" इति अवदत्।

कार्मिकाः आज्वा क्षेत्रेषु कार्यं कृतवन्तः। यत् कार्यम् एकस्मिन् दिने एव समापनीयं तत् पञ्चसु दिनेषु पूर्णं ज़ातम्। बीजानि उप्तानि, किन्तु जलसेचनं न जातम्। कथञ्चित् सेचनं जातं चेत् अपि अनावश्यकरूपेण अङ्कुरितानां सस्यानां निष्कासनं न जातम्। क्षेत्रेषु अन्नं पक्वं चेत् अपि तस्य कर्तनं विलम्बेन जातम्। क्वचित् कर्तितम् अन्नं पशुभिः खादितम्। इत्थम् अवशिष्टस्य अन्नस्य विक्रयणेन यत् धनं प्राप्तं, तस्मात् कार्मिकेभ्यः पारिश्रमिकं दत्तम्। तदनन्तरं भूमिकरं दातुं धनम् एव न अवशिष्टम्।

रामुः तन्माता च सोहन्याः गृहे वासं कुरुतः स्म। प्रातः आरभ्य सायं यावत् तयोः निमित्तं व्ययीक्रियमाणस्य धनस्य आलेखनं नत्थूमलः प्रतिदिनं रात्रौ रामोः गणनापुस्तके करोति स्म। यथा रामोः मातुः कृते चतुर्भिः नाणकैः अर्धकिलोपरिमितं दधि आगतम्। नाणकद्वयेन पादभागं दधि रामोः कृते आगतम्। एकेन नाणकेन शर्करा आगता। नाणकद्वयेन शाकम् आगतम्। पैसाद्वयेन मरीचिका लवणं लवङ्गः च आगतः। नाणकद्वयेन घृतम्। एवं प्रकारेण प्रतिदिनं नत्थूमलेन क्रियमाणः व्ययः गणनापुस्तके लिख्यते स्म।

व्ययः अधिकः आयः स्वल्पः जातः। अन्येषां वणिजाम् इव अपरेभ्यः स्वीकरणे

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सतर्कता, प्रदाने च विस्मरणशीलता इति नत्थूमलस्य अपि स्वभावः आसीत्।

इत्थं रूप्यकाणां व्ययः प्रतिदिनम् अधिकः एव जायमानः आसीत्। रामुः तु विद्यालये पठति स्म। विद्यालयं गन्तुं तस्मै द्विचक्रिका दत्ता आसीत्। वस्त्राणां पुस्तकानां नित्यव्ययस्य च गणना पृथक् एव क्रियते स्म। एवं तयोः निमित्तं व्ययः एव अधिकः आसीत्। आयस्य तु दर्शनम् एव न आसीत्।

वर्षेऽस्मिन् सहस्रत्रयस्य व्ययः जातः। सप्तशतं तु रामोः यज्ञोपवीतसंस्कारे एव व्ययः जातः। तस्मिन् संस्कारकार्यक्रमे मङ्गलं न आहूतवन्तः। संस्कारस्य बहूनां दिनानां पश्चात् मङ्गलेन ज्ञातम्। तस्य स्थितिः एतावत्पर्यन्तम् अपि उत्तमा न आसीत्। तस्मात् कारणात् अनाहूतः मङ्गलः मौनम् एव आश्रितवान्।

नत्थूमलस्य योजना क्रियान्विता जायमाना आसीत्। तस्य चिन्तनम् आसीत् यत् रामुं भिक्षुकं कृत्वा तस्य गृहात् निष्कासने इतोऽपि वर्षद्वयम् आवश्यकम् अस्ति इति।

२

नत्थूमलः आपणे उपविश्य गणनापुस्तकं परिशीलयन् आसीत्। रामोः तस्य मातुः च गणनापुस्तकं शङ्करः पश्यति स्म। एकदा सः पितरम् अवदत्- "पितः! गते सस्योत्पादनकाले पञ्चसप्तत्युत्तरत्रिशतस्य रूप्यकाणां केवला हानिः जाता" इति।

गणनायाः क्रमः एव एवं भवति। आत्मना क्रियमाणस्य व्ययस्य विषये किञ्चित् अपि अवगमनं न भवति। किन्तु यदा गणना क्रियते तदा अवगमनं भवति यत् परिश्रमेण अर्जितं धनं व्यर्थं जातम् इति। व्यये जाते सति मनुष्यः चिन्तयति 'कथं धनस्य संरक्षणं करणीयम्' इति। किन्तु पश्चात्तापात् ऋते अन्यत् किमपि न अवशिष्टं भवति।

वर्षस्य अन्ते सर्वस्य व्ययस्य विषये रामोः माता यदा ज्ञातवती यत् द्वादशसहस्रे केवलं षट्सहस्रम् एव अवशिष्टम् अस्ति तदा सा चिन्ताकुला सती - "ज्येष्ठमासे उप्तस्य बीजस्य अनुवर्तनकार्यं कथं प्रचलति?" इति जामातरं पृष्टवती।

"मातः! एतत् कृषिकार्यम् अहं कर्तुं न शक्नोमि। अहम् एतस्मिन् वर्षे किमपि बीजवपनं न अकारयम्"।

"तर्हि भवान् पितरं पृष्ट्वा अन्नस्य उत्पादनार्थं कस्मैचित् भूम्यधिकारपत्रं लिखित्वा ददातु"।

"आम्, एषः एव समीचीनः मार्गः अस्ति" इति शङ्करः तस्याः कथनस्य एव अनुमोदनम् अकरोत्।

रामोः माता तु निरक्षरा आसीत्। सा शङ्करदासस्य प्रत्येकस्मिन् वचसि विश्वसिति स्म। परिणामः एषः जातः यत् नगरं परितः विद्यमानेषु ग्रामेषु एतत् उद्घोषणं जातं-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'चौधरिदुर्गादासस्य भूमिः एकवर्षस्य कृते भूम्यधिकाररूपेण दास्यते' इति। मङ्गलः अपि उद्घोषणम् एतत् अन्यस्य द्वारा अशृणोत्।

यद्यपि मङ्गलः बहुपरिश्रमेण कार्यं कृत्वा किञ्चित् धनं सम्पादितवान् आसीत्। तथापि रामोः भूमिं भूम्यधिकाररूपेण स्वीकर्तुं तस्मिन् साहसं न आसीत्। सः पुष्यमासस्य उत्पादनेन प्राप्तं धनं तु भोजनार्थं गृहनिर्माणार्थं च व्ययीकृतवान् आसीत्। ज्येष्ठमासे उप्तस्य बीजस्य परिणामः उत्तमः जातः। एतस्मिन् मासे पञ्चशतं रूप्यकाणि सङ्गृहीतानि जातानि। यद्यपि ग्रामे स्वल्पेन तेन धनेन सर्वे कार्मिकाः पारिश्रमिकं प्राप्तुं न शक्तवन्तः तथापि सस्यं यदा कर्तितं जातं तदा मङ्गलः सर्वस्मै किञ्चित् धनम् प्रादात् एव। तस्मात् सः बहुकाठिन्येन पितुः मानरक्षणम् अकरोत्।

तेषु दिनेषु एव मोहिनी एकं पुत्रं प्रसूतवती। अतः सा पूर्ववत् कार्यं कर्तुं न शक्नोति स्म। कस्याश्चित् गोपपुत्र्याः साहाय्येन गृहकार्याणि कारयति स्म।

मङ्गलः यदा गोधूमं विपणौ प्रापय्य गणनां कारयित्वा च गृहम् आगतः तदा तस्य मनः किञ्चित् आह्लादितम् आसीत्। सः नत्थूमलस्य स्थाने लालवंशीधरेण सह वाणिज्यसम्बन्धं स्थापितवान्। लालवंशीधरः तस्य गणनापुस्तके अन्नस्य वृत्तं लिखित्वा अशीतिः रूप्यकाणि अवशेषधनम् अपि लिखितवान्। गोधूमः तु विक्रीतः जातः। बुषविक्रयणस्य विषये व्यवस्था क्रियमाणा आसीत्। मङ्गलः स्वस्मात् गणनातः पञ्चाशत् रूप्यकाणि स्वीकृत्य मोहिन्याः कृते शाटिकाद्वयं शिशोः कृते च चत्वारि वस्त्राणि क्रीतवान्। ततः कतिचन क्रीडनकानि मिष्टान्नं च क्रीत्वा गृहं प्राप्तवान्।

वस्तूनि आनयन्तं पतिं दृष्ट्वा शिशुं प्रति ध्यानाकर्षणं कुर्वती मोहिनी मङ्गलम् उक्तवती- "पश्यतु, अधुना एषः भवन्तम् अभिजानन् अस्ति" इति। "एतावद्भिः क्रीडनकैः अपि एषः मां न अभिज्ञास्यति किम्?" इति मङ्गलेन सविनोदम् उक्तम्।

"एतेषां वस्तूनां कृते किमर्थं वृथा धनव्ययं कृतवान्? अहं पुनः तन्तुनिर्माणम् आरब्धवती अस्मि खलु! द्वयोः मासयोः पश्चात् वस्त्राणाम् अभावः न भविष्यति। एषः वृथा एव धनव्ययः जातः"।

"हस्तनिर्मितेन वस्त्रेण मम कृते करांशुकं धौतवस्त्रं च निर्मितं भवेत्। त्वं तु हस्तनिर्मितवस्त्रस्य धारणं कृत्वा जामिताम् अनुभवसि, इत्यतः तव कृते इतः परं विपणितः एव वस्त्राणि आनेष्यामि"।

"किमर्थम्?"

"एषा एव मदीया इच्छा अस्ति।"

"कति रूप्यकैः एतत् शाटिकाद्वयं क्रीतम्?"

"अलं कार्पण्यसम्भाषणेन। किञ्चित् धृत्वा तु मां दर्शय! पश्यामि, त्वम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एतस्यां शाटिकायां कथं भासि?"

मोहिन्याः मुखं लज्जया रक्तमयं जातम्। सा खट्वायाम् उपाविशत्। सा शिशोः स्तन्यपानं कारयन्ती- "अस्तु! अहं वृद्धा जाता खलु! इतः परं मम सौन्दर्यं शाटिकाभिः एव प्रकटितं भवेत्" इति अवदत्।

एवम् उक्त्वा सा खिन्ना जाता। मङ्गलस्य नगरतः आगमनेन या प्रसन्नता तस्याः मुखे दृश्यमाना आसीत् सा विलुप्ता जाता। मङ्गलः चिन्तया- "किं जातं मोहिनि?" इति तां पृष्टवान्।

मोहिनी दीर्घं श्वासोच्छ्वासं कुर्वती- "येन उत्साहेन श्रमेण च भवान् गतवर्षे कार्यं कृतवान् आसीत् तत्सर्वं धूलिसात् कृतवान्। यदि मातुः मनसि लेशमात्रं विवेकः अभविष्यत् तर्हि इदानीं वयम् उत्तमे गृहे वासम् अकरिष्याम। भवतः पुत्रः तस्मिन् एव काल्पनिके गृहे जन्म प्राप्य, पालितः सन् श्रेष्ठः भूस्वामी भूयात् इति मदीयः स्वप्नः आसीत्" इति पतिम् अवदत्।

"तत् तु भविष्यति एव। यत् प्रवृत्तं तत् सम्यक् एव। वयं पित्रा अर्ज्रितेन धनबलेन अग्रे गन्तुम् इच्छामः स्म। माता तत् न अनुमतवती। पित्रा अर्जितां सम्पत्तिं सा एव स्वीकर्तुम् ऐच्छत्। एतत् तु तथैव जातं यथा त्वं मया अर्ज्यमाने धने विशेषाधिकारं दर्शयसि। ममं तु अस्मिन् विषये स्वल्पमात्रम् अपि रोषः नास्ति। भगवतः कृपया मातुः क्षीरपानेन च अहं स्वस्मिन् शरीरे बलं, हृदये च साहसं संयोजयितुं शक्नोमि। कस्यचित् साहाय्यं विना अहं तव कृते प्रासादं निर्मातुं शक्नोमि एव। एतादृशः विश्वासः मयि अस्ति"।

"भवान् तु सुष्ठुरूपेण कार्यं करिष्यति। किन्तु अहं मम विषये चिन्तयन्ती अस्मि। किम् अहं पूर्ववत् श्रमं कर्तुं शक्नोमि? सम्प्रति तु किञ्चित् कार्यकरणेन एव शरीरं श्रान्तं भवति।"

"अधुना तव कार्यकरणस्य आवश्यकता एव नास्ति" इति मङ्गलः अवदत्।

मोहिनी किमपि वक्तुम् इच्छन्ती एव आसीत् तावता एव बहिर्भागतः अर्चकस्य आह्वानशब्दः श्रुतः - "मङ्गलभ्रातः!"

"अर्चकवर्य! आगच्छतु" इति मङ्गलः अर्चकम् अन्तः आहूतवान्। यद्यपि अर्चकः गृहजनः इव आसीत् तथापि विगतघटनाकारणतः यत् साहाय्यं तेन मङ्गलाय प्रदत्तं, तस्मात् तस्य मानः ततोऽपि अधिकः जातः आसीत्। सः तत्र निर्विघ्नं गमनागमनं कर्तुं शक्नोति स्म। प्रसारिते आसने उपविश्य अर्चकः अवदत्- "काचित् वार्ता अस्ति भ्रातः" इति ।

"का?"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"रामोः भूमिः भूम्यधिकाररूपेण दीयमाना अस्ति।"

"एतत् तु भवितव्यम् एव आसीत्। पौषमासस्य अन्नोत्पादने महती हानिः जाता। ज्येष्ठमासे बीजानि एव न उप्तानि। भूम्यधिकारदानेन स्वल्पमात्रं लाभः तु भवेत् एव"।

"तर्हि भ्रातः! भवान् एव स्वीकरोतु"।

"नैव, अर्चकवर्य! तेषां भूमिस्वीकरणं मानाय न भवेत्"।

"मम तु इच्छा अस्ति यत् स्वीकरणीयम् एव। यतः ग्रामे तादृशी भूमिः अन्यत्र कुत्रचित् अपि नास्ति।"

"अस्तु! किन्तु अर्चकवर्य, मयि भूमिकर्षणार्थं तावत् बलम् नास्ति। या भूमिः मम पार्श्वे अस्ति ताम् अपि क्रष्टुं न शक्नोमि।"

"तर्हि एवम् उपविशन् एव भवान् कथम् उन्नतिं साधयितुं शक्नोति? तस्मात् एषा दीयमाना भूमिः न त्यक्तव्या।"

"एतत् तु सत्यम्। किन्तु अहम् उन्नतेः मार्गं प्रशस्तं कर्तुं कञ्चित् उपायम् अन्विष्टवान् अस्मि। मनोहरस्य भूमौ शाकोत्पादनं करणीयम् इति मम विचारः अस्ति। तत्र कूपखननम् अपि कारयिष्यामि।"

"तादृश्यां भूमौ शाकोत्पादनं भविष्यति किम्?"

"भविष्यति। किमर्थं न भविष्यति। प्रथमम् आलुकं वप्स्यामि। तदनन्तरम् आनुकूल्यं जातं चेत् पञ्चवर्षाभ्यन्तरे....।

सुदृढं भवनं निर्मास्यामि इति सः वक्तुम् ऐच्छत्। किन्तु तत् कथनं मनसि एव स्थगितवान्। तत् रहस्यम् इति मत्वा मनसि एव निगूहितवान्। विस्मयेन अर्चकः- "पञ्चवर्षाभ्यन्तरे किम्?" इति अपृच्छत्।

"अर्चकवर्य!" इति विषयपरिवर्तनं कुर्वन् मङ्गलः- "भवतां सकाशात् यत् ऋणं स्वीकृतवान् खलु तत् प्रत्यर्पयिष्यामि" इति अवदत्।

"अलं तेन सम्भाषणेन। ग्रामे कश्चन अपि तादृशः जनः नास्ति यः वदेत् 'ऋणं दत्त्वा अहं भवते उपकारं कृतवान्' इति। आम्, एतत् तु सर्वे इच्छन्ति यत् भवान् भ्रातुः भूमिं भूम्यधिकाररूपेण स्वीकुर्यात्।"

"तस्य भूमिम् अहं न स्वीकरिष्यामि। यतः तस्याः स्वीकरणे अस्माकं कल्याणं नास्ति।"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

३

यदा गोधूमः विक्रीतः जातः तदा लालवंशीधरस्य पार्श्वे मङ्गलस्य एकसहस्रं पञ्चशतं रूप्यकाणि सङ्गृहीतानि जातानि। मङ्गलेन सहस्ररूप्यकैः मनोहरस्य भूमौ कूपखननं कारितम्। पौषमासस्य पश्चात् सः विपणितः पुष्पशाकस्य भिण्डेः रक्तफलस्य च बीजानि आनीय क्षेत्रेषु उप्तवान्। इत्थं सः एकबीघापरिमितायां भूमौ शाकानि एव उप्तवान् आसीत्।

मासद्वयस्य अनन्तरं तेन अस्मिन् कार्ये साफल्यं प्राप्यमाणम् आसीत्। तेन पञ्चकार्मिकाः तदर्थम् एव योजिताः आसन्। तेषां मासिकं वेतनं पञ्चरूप्यकाणि आसन्। खादितुम् अन्नं शाकं च अपि तेभ्यः दत्तवान्। विपणौ यदा शाकानां विक्रयणम् आरब्धं तदा प्रथमे क्रमे सार्धैकशतस्य लाभांशः प्राप्तः। एतेन उत्साहं प्राप्य मङ्गलः कूपसमीपस्थायां भूमौ सर्वत्र आलुकस्य बीजम् उप्तवान्। तस्मात् सः इतोऽपि आश्चर्यजनकरूपेण लाभांशं प्राप्तवान्। एकबीघापरिमितायां भूमौ द्विशतं मनपरिमितम् आलुकम् उत्पन्नं जातम्। तस्मात् द्विसहस्रस्य रूप्यकाणां लाभः जातः।

रामोः भूमिं कश्चित् अपि ग्रामीणः भूम्यधिकाररूपेण न स्वीकृतवान्। आम्, नगरस्य केचन जनाः मिलित्वा भूमिं स्वीकृतवन्तः। ते तत्र यन्त्रेण कर्षणस्य व्यवस्थां कृतवन्तः। भूमेः कर्षणं जातम्। बीजानि अपि उप्तानि। किन्तु सेचनं तृणनिष्कासनं च न जातम्। वाटिकायाः कूपे यदा सेचनार्थं नलिका योजिता तदा ग्रामीणानां दैनन्दिनकार्ये बाधा उपस्थिता जाता। प्रथमं महिलाः स्नानार्थम् आगच्छन्ति स्म। इदानीं तत्र चतुर्विंशतिघण्टापर्यन्तं यन्त्रशिल्पकाराणां सम्मर्दः भवति स्म। एतादृश्यां स्थितौ महिलाः कथम् आगन्तुं शक्नुवन्ति स्म? एषः विषयः प्रतिदिनं विवादाय मूलकारणं जातः।

अन्ततोगत्वा ग्रामीणाः विवादस्य समाधानाय किञ्चन कुण्डं निर्मितवन्तः। कुण्डं परितः भित्तिः निर्मापिता। सहस्राधिकरूप्यकाणां व्ययेन यन्त्रचालकेभ्यः वेतनदानेन च नगरजनानां क्षेत्रेषु अन्नम् उत्पन्नं जातम्। तेन अपि कश्चन लाभः न जातः।

तदनन्तरं नगरस्य पञ्चषाः जनाः कञ्चित् मर्यादितसमवायं रचयित्वा तस्य माध्यमेन कृषिकार्यं कारितवन्तः। वर्षान्ते यदा आयस्य व्ययस्य च वृत्तं चिन्तितं तदा तेषां समीपे केवलानि एकशतं पञ्चाशत् रूप्यकाणि एव अवशिष्टानि जातानि। तस्मात् भूमिम् अधिकृतवतां स्वामिनां महान् कोपः आगतः। तेषां चिन्तनम् आसीत् यत् कृषिकार्येषु नियोजिताः प्रबन्धकाः एव सर्वं विक्रीय धनं चोरितवन्तः। तस्मात् कारणात् परिशीलनार्थं ते पर्यवेक्षकस्य निदेशकद्वयस्य नियुक्तिं कृतवन्तः। तौ पर्यवेक्षकौ निदेशकौ

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ग्रामे सर्वाधिकाम् उन्नतिं साधितवन्तं जनम् अन्विष्यन्तौ मङ्गलस्य गृहम् आगतवन्तौ।

मङ्गलस्य गृहं मृत्तिकानिर्मितम् आसीत्। गृहस्य अग्रे काचित् लध्वी वाटिका आसीत्। वाटिकायाम् अनेके पुष्पपादपाः आसन्। कस्मिंश्चित् भागे त्रयः आम्राः अपि आसन्। अपरस्मिन् कोणे हरितानि तृणानि उद्गतानि आसन्। गृहस्य कूपे किञ्चित् लघु जलसंयन्त्रं स्थापितम् आसीत्। तत् यन्त्रं कश्चन वृषभः अपि चालयितुं शक्नोति स्म। इदानीं तत् चलति स्म। गृहस्य वाटिकायां मोहिनी द्विवर्षीयं बालकम् अङ्गुलीभिः गृहीत्वा स्थिता आसीत्। द्वे महिले तत्र लवित्रेण कार्यं कुरुतः स्म।

वाटिकां परितः वंशदण्डेन निर्मिता भित्तिः आसीत्। भितौ काशीफलस्य लताः उन्मुखाः आसन्। वाटिकातः बहिः स्थितौ द्वौ अज्ञातौ पुरुषौ दृष्ट्वा मोहिनी काञ्चित् एकां कर्मकरीम् उक्तवती- "बहिः गत्वा पृच्छतु तौ किम् इच्छतः?"

सा गत्वा अपृच्छत्- "भवान् किम् इच्छति?"

"चौधरिमङ्गलदासस्य गृहम् एतत् एव अस्ति किम्?"

"आम्, एतत् एव।"

"चौधरी गृहे अस्ति?"

"न, पश्यतु..... सः आगच्छन् अस्ति" इति आगच्छन्तं मङ्गलं दर्शयित्वा सा महिला अन्तः अगच्छत्। मोहिनी अपि अन्तः गतवती।

मङ्गलः स्वस्मात् क्षेत्रात् कापिचित् मृत्तिकायुक्तानि मूलकानि उत्पाट्य कूपजलेन क्षालयित्वा आनयन् आसीत्। तस्य एकस्मिन् हस्ते पञ्चषाणि मूलकानि अपरस्मिन् हस्ते दण्डः च आसीत्। षट्पादमितः उन्नतः हृष्टपुष्टः सः गृहात् बहिः स्थितौ जनौ दृष्ट्वा वायुवेगेन आगतः। यदा सः तत्र प्राप्तः तदा प्रश्नदृष्ट्या तौ पश्यन् तत्र स्थितः अभवत्। तौ नागरिकौ विस्मयेन मङ्गलं पश्यन्तौ एव आस्ताम्। तयोः एकः साहसेन- "किं भवतः नाम चौधरिमङ्गलदासः अस्ति?" इति अपृच्छत्।

"आम्, वदतु कः विशेषः?" इति प्रतिप्रश्नं कृतवान् मङ्गलः।

"भवता सह एकस्मिन् विषये सम्भाषणं करणीयम् अस्ति"।

"तर्हि आगच्छतु" इति उक्त्वा सः आह्वानशब्दं कृतवान्- "अये सुगनि, एतत् स्वीकरोतु, मम पत्न्यै ददातु। तां वदतु यत् अहम् एताभ्यां सह सम्भाष्य भोजनार्थम् आगच्छामि" इति।

गृहात् बहिः कश्चन काष्ठमञ्चः आसीत्। तत्र तौ उपवेश्य मङ्गलः अपृच्छत्- "वदतु, महोदय! का आज्ञा अस्ति?"

"विषयः एषः अस्ति यत् आवां रामोः भूमिम् अधिकृतरूपेण स्वीकृतवन्तौ"।

Funding by IKS-MoE

"किम् कृषिसम्बद्धानि यन्त्राणि भवतः एव सन्ति?"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"आम्। आवाम् कृषिकार्यस्य कृते त्रिंशत्सहस्त्रं रूप्यकाणि व्ययं कृतवन्तौ। तत्र विंशतिसहस्रस्य तु यन्त्रे विनियोगः जातः। घर्षणे द्विसहस्रस्य वेतनप्रदाने दशसहस्रस्य च विनियोगः जातः। इत्थं तावत् धनं व्ययीकृत्य अपि आवाभ्यां केवलः एकशतं पञ्चाशत् रूप्यकाणां लाभः प्राप्तः। अन्येषां माध्यमेन आवाभ्याम् एतत् ज्ञातं यत् भवान् अत्र कृषिकर्मद्वारा बहुलाभम् अर्जयन् अस्ति। तस्मात् कारणात् आवाम् एतस्य रहस्यं ज्ञातुम् आगतवन्तौ।"

"निरक्षरः अहं भवन्तौ किं रहस्यं वदानि? अहं तु तथैव कार्यं कुर्वन् अस्मि यथा मम पितृपितामहादयः कुर्वन्ति स्म।"

"तथापि यदि आवां किमपि पृच्छावः तर्हि भवान् तस्य उत्तरं वदिष्यति किम्?"

"किमर्थं न वदिष्यामि। अत्र निगूहनस्य का आवश्यकता?"

"भवान् गतवर्षे कति बीघापरिमितायां भूम्यां गोधूमबीजम् उप्तवान् आसीत्?"

"पञ्चदशबीघापरिमितायां भूम्यां गोधूमबीजं त्रिबीघापरिमितायां भूम्यां कणिशं बर्जरीं च उप्तवान् आसम्। द्विबीघापरिमिता भूमिः किञ्चित् अधः आसीत्। तस्मात् तत्र किमपि न उप्तम्। अस्मिन् वर्षे तत्र कूपखननं कारयित्वा शाकानि वप्स्यामि"।

"पञ्चदशबीघापरिमितायां भूम्यां कियान् गोधूमः जातः?"

"पञ्चत्रिंशदधिकशतं मनपरिमितं जातम्।"

"तर्हि प्रत्येकं बीघापरिमितायां भूम्यां सप्तविंशतिः मनपरिमितः गोधूमः जातः। गोधूमः तु आवयोः क्षेत्रेषु अधिकः जातः। सामान्यतः प्रत्येकं बीघापरिमितायां द्वात्रिंशत् मनपरिमितः गोधूमः जातः"।

"एतत् तु सम्यक् एव जातम्। भवान् विदेशीयम् उर्वरकं प्रयुक्तवान्। अहं तु देशीयस्य उर्वरकस्य उपयोगं कृतवान्। भवतः हलानि उत्तमानि आसन्। तानि क्षेत्रेषु गभीरं खनन्ति। अस्माकं देशीयं हलं षट्इन्चपरिमितं यावत् एव अन्तः खनति।"

"तथापि अस्माभिः अधिकं सङ्ग्रहीतुं कर्तुं न शक्तम्"।

"तस्य किञ्चित् कारणम् अस्ति। वयं कृषकाः अस्याः भूमेः सन्तानाः स्मः। भूमिसम्बद्धं सर्वप्रकारकं नैपुण्यम् अस्मासु अस्ति। अत्र निवसन्तः वयं सर्वविधानाम् आवश्यकतानाम् इतः एव आपूर्तिं कुर्मः। पश्यतु, मम क्षेत्रेषु कार्यं कुर्वन्तः कार्मिकाः रोकधनरूपेण वेतनं न स्वीकुर्वन्ति। ते मम उत्पादनतः एव किञ्चित् अंशं स्वीकुर्वन्ति। तेभ्यः अन्नं प्रदत्तम्। ते स्वेषां वृषभाणां कृते बुषम् अपि स्वीकृतवन्तः। यदा सर्वम् अन्नं विक्रीतं जातं तदा सर्वेभ्यः दशरूप्यकाणि अपि दत्तानि। अस्माकं कार्मिकाः नगरं गत्वा धनव्ययं न कुर्वन्ति। नोचेत् एतावता एव स्वल्पेन धनेन तेषां निर्वहणं कथं शक्यम्? ...... भवतः यन्त्रहलचालकाः कियत् वेतनं स्वीकुर्वन्ति?"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"एकशतं विंशतिः रूप्यकाणि मासिकं वेतनम्।"

"कूपे जलयन्त्रचालकाः?"

"षष्टिः रूप्यकाणि मासिकं वेतनम्।"

"रक्षकप्रमुखः?"

"शतं रूप्यकाणि।"

"क्षेत्रेषु कार्यं कुर्वन्तः कार्मिकाः।"

"प्रत्येकं कार्मिकः पञ्चविंशतिः रूप्यकाणि मासिकम्"।

"भवान् कथं वक्तुम् अर्हति यत् हानिः जाता इति?"

"एतावता परिश्रमेण धनव्ययेन च अपि अस्माकम् एकशतं पञ्चाशत् रूप्यकाणि एव केवलानि सङ्गृहीतानि जातानि"।

"एतेभ्यः जनेभ्यः यत् वेतनं भवता दत्तं तत् किं लाभदायकं न जातम्? पश्यतु, अहं क्षेत्रे कार्यं करोमि। मम पत्नी अपि कार्यं करोति। ये कार्मिकाः कार्यं कुर्वन्ति तेषां पत्नीपुत्रादयः अपि तैः सह कार्यं कुर्वन्ति। अपि च एतेन उत्पन्नेन अन्नेन अस्माकं निर्वाहः अपि भवति। यत् किञ्चित् अस्माकं समीपे अवशिष्टं भवति तत् मितव्ययेन एव भवति। यः कार्यं करोति तस्य एव पारिश्रमिकस्य स्वीकरणे अधिकारः अस्ति। भवतां क्षेत्रेषु अपि ये कार्यं कृतवन्तः ते लाभं तु प्राप्तवन्तः एव। भवन्तः किञ्चित् अपि कार्यं न कृतवन्तः। तस्मात् भवतां पार्श्वे किमपि नास्ति इत्येषः तु स्वाभाविकः विषयः अस्ति"।

"रूप्यकाणां निवेशं कृतवद्भिः जनैः किमपि न प्राप्तव्यं किम्?"

"रूप्यकाणि प्राणरहितानि भवन्ति। मानवात् मानवस्य उत्पत्तिः भवति। किन्तु रूप्यकेभ्यः रूप्यकाणां प्रादुर्भावं कोऽपि न दृष्टवान् स्यात्। परिश्रमेण फलं लभ्यते। रूप्यकाणि स्वयमेव परिश्रमं न कुर्वन्ति"।

"किन्तु अन्येषु वाणिज्येषु तु रूप्यकेभ्यः एव रूप्यकाणि प्राप्यन्ते"।

"नगरस्य वाणिज्यविषये मम ज्ञानं नास्ति। अहं तु अत्रत्यस्य कृषिकार्यस्य विषये वदन् अस्मि। पश्यतु, मम समीपे या भूमिः अस्ति सा पञ्चवर्षेभ्यः अकृष्टा आसीत्। एषा एकस्य अपि रूप्यकस्य लाभं न कारितवती। तथापि धनव्ययः तु जातः एव। अहं मम सहयोगिनः च अहर्निशं श्रमेण अन्नस्य उत्पादनं कृतवन्तः।"

"किन्तु यदि भूमिः न भविष्यति तर्हि परिश्रमेण किम्?"

"आं, भूमिः तु रामोः अस्ति। तस्मै अपि प्राप्तात् अन्नात् कश्चन अंशः दत्तः एव। येन यन्त्रद्वारा घर्षणं कृतं तस्मै अपि किञ्चित् दत्तम्। वित्तकोषाय कुसीदं दत्तम्। कार्मिकेभ्यः वेतनं दत्तम्। सर्वकारेण अपि अस्मत्तः भूमिकरः प्राप्तः एव। अधुना भवन्तः किं प्राप्नुयुः? तदर्थं भवन्तः किं कृतवन्तः?"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नगरस्य तौ साक्षरौ जनौ मङ्गलस्य पुरतः निरुत्तरौ जातौ। अवाङ्मुखौ सन्तौ ततः गतवन्तौ। ताभ्याम् एकः विषयः स्पष्टतया अवगतः यत् कर्षणं नाम किञ्चित् कार्यं, न तु वाणिज्यम् अस्ति। यः करोति सः फलं प्राप्नोति। अस्मिन् कार्ये बहु वेतनम् अपि न लभ्यते।

४

सम्प्रति रामुः तन्माता च भाटकगृहे वासं कुरुतः स्म। भूम्यधिकारप्रदानकारणतः वर्षे पञ्चशतं रूप्यकाणि प्राप्नुतः स्म। तेषु सार्धद्विशतं रूप्यकाणि वार्षिकभाटकत्वेन दातव्यानि अभवन्। केवलं सार्धद्विशतम् अवशिष्टं जातम्। तावता एव धनेन वर्षपर्यन्तं निर्वहणम् अशक्यम् आसीत्। तस्मात् कारणात् लालनत्थूमलस्य पार्श्वे सङ्गृहीतात् धनात् प्रतिमासं किञ्चित् स्वीकृत्य तौ जीवननिर्वहणं कुरुतः स्म।

इत्थं वर्षद्वयम् अतीतम्। ग्रामे यत् नवनीतं दुग्धं दाधिकं च प्राप्यते स्म तत् सर्वम् अत्र तौ न प्राप्नुतः स्म। नगरे तु यत् किलोद्वयमितं दुग्धं विपणितः आनीयते स्म तस्मिन् अपि अर्धं जलम् एव मिश्रितं भवति स्म। प्रतिमासं विंशतिरूप्यकाणि तु दुग्धनिमित्तम् एव व्ययीभवन्ति स्म। गोधूमचूर्णम् अपि विपणितः एव आगच्छति स्म। द्विदलं तण्डुलः शाकं वस्त्राणि लवणं मरीचिका इत्यादीनि दैनिकानि वस्तूनि अपि तत्र मूल्येन एव लभ्यन्ते स्म। जलविद्युदादीनां कृते अपि धनं दातव्यं भवति स्म। एवं प्रकारेण व्ययः एव अधिकः आसीत्। आयस्य किञ्चित् अपि अन्यः स्रोतः न आसीत्। परिणामतः रामोः तस्य मातुः च उभयोः आरोग्यं क्षीयमाणम् आसीत्।

रामुः शिक्षणं प्राप्य योग्यः भूत्वा धनम् अर्जयिष्यति इति तस्य मातुः काचित् आशा आसीत्। नगरस्य स्वच्छता, उद्यानानां सौन्दर्यम्, उत्तमाः मार्गाः, उत्तमानि गृहाणि, सङ्ग्रहालयः, जन्तुशाला, गोमुखानि मन्दिराणि इत्यादीनि आनुकूल्यानि ग्रामे न आसन्। एतेषाम् उपभोगार्थं धनम् आवश्यकम् आसीत्। धनं तु तयोः समीपम् आसीत् किन्तु प्रतिदिनं व्ययीकरणेन तत् न्यूनं जायमानम् आसीत्। रामुः वर्षद्वयस्य इतोऽपि शिक्षणं प्राप्य कञ्चित् उद्योगं कृत्वा ततः सर्वं आनुकूल्यं कल्पयिष्यति इति मातुः आशा आसीत्।

रामुः सप्तमकक्षायाः परीक्षायाम् अनुत्तीर्णः जातः, किन्तु सः गृहे न उक्तवान्। प्रतिवेशिनां बालाः उत्तीर्णाः भूत्वा उत्प्लवनं कूर्दनं च कुर्वन्तः स्वं स्वं गृहम् अगच्छन्। रामोः माता अपि तस्य आगमनस्य निरीक्षां कुर्वती आसीत्। यदा सः सायंकाले आगतः तदा माता तं पृष्टवती- "रामो, त्वम् अपि उत्तीर्णः खलु?" इति।

"आं, मातः!" रामुः निःसङ्कोचम् अवदत्- "अहं बालैः सह भ्रमितुं गतवान् आसम्" इति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"तर्हि त्वम् इदानीम् अष्टमश्रेणीं गतः खलु?"

"आं, मातः!"

"वत्स! शीघ्रं सर्वाः परीक्षाः उत्तीर्य कञ्चित् उद्योगं कृत्वा धनम् अर्जय। नोचेत् आवयोः जीवनं दुष्करं भविष्यति। यतः आवयोः समीपं यत् सङ्गृहीतं धनम् अस्ति तत् मन्दं न्यूनं जायमानम् अस्ति"।

"मातः, किम् आवां ग्रामं न गमिष्यावः?"

"तत्र तव भूमिं कः क्रक्ष्यति?"

"किं अग्रजः न क्रक्ष्यति?"

"तस्य डाकिनी पत्नी तं क्रष्टुम् अनुमन्यते किम्?"

रामुः मौनम् आश्रयत्। सः मातुः सकाशात् कतिचन रूप्यकाणि स्वीकृत्य पुस्तकानि क्रेतुम् अगच्छत्। अनुत्तीर्णतां प्राप्तवते तस्मै पुस्तकक्रयणस्य आवश्यकता एव न आसीत्। अतः हस्तगतानि रूप्यकाणि स्वीकृत्य चलच्चित्रं द्रष्टुं चित्रमन्दिरं गतवान्। तत्र 'अलीबाबा चालीस चोर' इति चलच्चित्रं प्रदर्श्यमानम् आसीत्। यद्यपि रामुः तत् चलच्चित्रं नैकवारं दृष्टवान् तथापि समयं यापयितुं तदेव अपश्यत्।

चित्रदर्शने तस्य रुचिः न आसीत्। सः तत्र उपविशन् मनसि बहुविधकल्पनाः करोति स्म। सः अपि आत्मानम् 'अलीबाबा' इति भावयन् पर्वतस्य गुहायाः अग्रे स्थित्वा 'सिम......सिम' इति ध्वनिं कथयन् विचारणां करोति स्म। गुहायाः प्रमुखद्वारे उद्घाटिते सति अन्तः विद्यमानस्य अपरिमितस्य धनस्य प्राप्त्यर्थं स्वप्नान् पश्यति स्म।

इत्थं व्यर्थाः कल्पनाः कुर्वन् तथा च पुस्तकक्रयणार्थं प्राप्तात् धनात् एकं रूप्यकं व्ययीकृत्य रामुः गृहं प्रत्यागतः। माता रिक्तहस्तं तं दृष्ट्वा अपृच्छत्- "पुस्तकानि न आनीतवान्?"

"अद्य जनानां बहुः सम्मर्दः आसीत्। श्वः क्रेष्यामि"।

दिनद्वयम् अतीतम्। रामोः कृते पुस्तकक्रयणस्य आवश्यकता एव न अभवत्। प्रमादवशात् माता अपि एतं विषयं विस्मृतवती। विद्यालयशुल्कं यत् गृहात् स्वीकृतं तदपि विद्यालयं प्रति न दत्तम्। अन्ततोगत्वा सः विद्यालयगमनम् एव अत्यजत्। स्यूते पुरातनानि पुस्तकानि एव प्रपूर्य नयति स्म। सः गृहात् विद्यालयं प्रति प्रस्थितः भवति स्म, किन्तु किञ्चित् दूरं गत्वा तत्र क्रीडद्भिः अशिष्टैः बालैः सह गुलीदण्डक्रीडा कबड्डी अक्षिमेषणी इत्यादीः क्रीडाः क्रीडति स्म।

अथ एकदा सः क्रीडायाम् अत्यन्तं मग्नः आसीत्। तत्क्षणे एव तस्य पुस्तकस्यूतं कोऽपि नीतवान्। सः गृहं गत्वा पुस्तकस्य विषये मातरं न उक्तवान्। अन्येद्युः यदा सः विद्यालयं गन्तुकामः आसीत् तदा माता अपृच्छत्- "रामो, अद्य पुस्तकानि न नयसि।"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"मातः, ह्यः आरभ्य पुस्तकानि विद्यालये एव स्थाप्यन्ते मया"।

मातुः किञ्चित् आश्चर्यं जातम्। किन्तु मौनम् आश्रितवती।

कस्मिंश्चित् दिने यदा सः क्रीडाङ्गणं गतवान् तदा तस्य सहचराः न आगताः आसन्। सः एकाकी एव तत्र उपविश्य चिन्तनं कुर्वन् आसीत् 'माता कदाचित् मम विद्यालयं प्रति अगमनस्य विषयं जानीयात् एव। तस्मिन् समये मम कियान् सङ्कोचः भवेत्। मम ज्येष्ठा भगिनी किं वदेत्। आवुत्तः तु मां ताडयेत् एव। सर्वे मां तर्जयेयुः' इति। एवं विचार्य सः स्वस्य भविष्यतः विषये चिन्तितवान्- 'इदानीं पठने मम मनः न रमते। तथापि किमपि कार्यं तु करणीयम् एव। किं करवाणि?" इति। यदा एते प्रश्नाः मनसि समुदिताः तदा स्वयम् एव उत्तरति स्म 'वाणिज्यं तु कर्तुं न शक्नोमि। कृषिकार्ये तु बहुः परिश्रमः आवश्यकः भवति। तदर्थं ग्रामः अपि गन्तव्यः भवेत्। उद्योगः! तदर्थम् अहं शिक्षितः न अस्मि। आदेशपालस्य उद्योगे वेतनं बहु न्यूनं भवति। तर्हि अहं किं करवाणि?" इति। एतस्य प्रश्नस्य सः उत्तरं न प्राप्नोत्। अद्य तस्य मनसि समुदितानां विचाराणां कारणतः खिन्नता समुद्गता आसीत्। तस्मात् तस्य मनः ततः प्रस्थातुम् उद्यतम् अभवत्। सः ततः उत्थाय मार्गे अटनं कर्तुम् आरब्धवान्।

अद्य रामोः मनसि भयं व्याप्तम् आसीत्। सः चिन्तयति स्म 'अहं मासान् यावत् मातरं भगिनीं च वञ्चितवान्। अतः ताडितः अपि भवेयम्' इति। सः एतस्मात् व्यर्थजीवनात् उदासीनः आसीत्। कार्यं विना नित्यम् अटनम् इति तस्य कृते भाराय जातम्। इदानीं किं करणीयम् इति किञ्चन अस्पष्टं चित्रम् इव तस्य मनसि निर्मीयमाणम् आसीत्। यद्यपि एतस्य चित्रस्य रेखाः स्पष्टाः न आसन् तथापि सः चिन्तयति स्म यत् तस्य वर्तमानजीवनस्य अनुवर्तनम् अधिककालं यावत् न तिष्ठेत् इति।

मार्गेषु अटन् सः रेलस्थानकं प्राप्तवान्। किञ्चन रेलयानं तत्र स्थितम् आसीत्। तद् यानं दृष्ट्वा तस्य मनसि कश्चन उपायः स्फुरितः। सः चिन्तितवान् यत् ततः प्रस्थानं करणीयम्। किन्तु कुत्र? ...... यत्र रेलयानं नयति। तस्य समीपे चिटिकायाः कृते पर्याप्तं धनम् अपि न आसीत्। केवलानि चत्वारि नाणकानि आसन्। एतैः नाणकैः किं भवेत्? तथापि तस्य मनः ततः प्रस्थातुं प्रेरयति स्म। सः स्थानकस्य अन्तः गन्तुम् उद्यतः जातः। किन्तु द्वारस्य अग्रे स्थितं चिटिकानिरीक्षकं दृष्ट्वा सः आशङ्कितः जातः। अग्नौ घृतक्षेपणम् इव तस्य गमनस्य इच्छा बाधिता जाता। सः रेलस्थानकतः बहिः आगत्य अन्येन मार्गेण किञ्चिद् दूरं गत्वा स्थानकस्य अन्तः प्रविष्टवान्। तत्र यत् यानं स्थितम् आसीत् तस्मिन् उपविष्टवान्। तत् रेलयानं कुत्र गच्छति इति अज्ञात्वा एव उपविष्टः। सः प्रकोष्ठः तृतीयश्रेण्याः आसीत्। रामोः प्राप्तेः पूर्वं केवलाः त्रयः जनाः उपविष्टाः आसन्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रेलयानस्य प्रस्थानात् पूर्वं केचन जनाः इतोऽपि आगत्य तत्र उपविष्टवन्तः। यानं यदा प्रस्थितं तदा सः चिन्तयन् आसीत्- 'यदि निरीक्षकः चिटिकापरीक्षणं कर्तुम् आगच्छेत् तर्हि किं भवेत्? पार्श्वे तु किमपि नास्ति। किं दास्यामि'? इति। एतस्य परिहारे असमर्थः सन् सः अस्मिन् विषये चिन्तनम् एव अत्यजत्।

सः वातायनस्य पार्श्वे उपविष्टवान् आसीत्। यदा यानं प्रस्थितं तदा मार्गम् उभयतः विद्यमानाः वृक्षाः विद्युतः तन्त्रीणां स्तम्भाः च यानवेगेन पृष्ठतः गच्छन्तः आसन्। तद् दृश्यं दृष्ट्वा रामोः महत् आश्चर्यं जातम्। सः शीघ्रं परिवर्तमानस्य दृश्यस्य दर्शने तथा मग्नः जातः येन गृहं मातरं भगिनीं चत्वारि नाणकानि च सर्वाणि विस्मृतवान् एव।

बहूनि स्थानकानि आगतानि गतानि च। रामुः निद्राम् अकरोत्। यदा रात्रिः सञ्जाता तदा तस्य निद्राभङ्गः अभवत्। कस्मिंश्चित् स्थानके यानतः अवतीर्य नाणकद्वयेन किमपि क्रीत्वा खादितवान्। तेन तस्य उदरं पूर्णं न जातम्। सः सर्वस्य धनस्य व्ययं कर्तुं न इच्छति स्म। पुनः यानं प्रस्थितम्। सः निद्रां कृतवान्। प्रातः कालः जायमानः आसीत्। निरीक्षकः आगतः। सः रामोः शरीरं कम्पितवान्। कम्पनेन तस्य निद्राभङ्गः अभवत्। सः तं निरीक्षकं पश्यन् आसीत्। निरीक्षकः अवदत्- "चिटिकां दर्शयतु!" इति।

रामुः तूष्णीम् उपविष्टः आसीत्। निरीक्षकः पुनः अपृच्छत्- "चिटिका अस्ति?"

रामुः शिरश्चालनेन निराकरणं असूचयत्।

सः अपृच्छत्- "कुत्र गच्छसि?"

रामुः पुनः शिरश्चालनम् अकरोत्।

"कः अभिप्रायः?"

"अहं न जानामि।"

"कुतः आगच्छसि?"

रामुः स्वस्य गृहस्य सङ्केतं वक्तुं न इच्छति स्म। अतः सः तूष्णीम् अतिष्ठत्। तस्मात् आगामिनि स्थानके निरीक्षकः तम् यानात् अवतारितवान्। अपरस्य स्थानकस्य अधिकारिणः पुरतः नीतवान् च। सः अधिकारी रामुम् आदेशपालस्य समीपे उपवेशितवान्। यदा रेलयानं ततः अग्रे गतं तदा अधिकारी तस्य समीपम् आगत्य अपृच्छत्- "बालक! कुतः आगच्छसि"?

रामुः जम्मुनगरस्य विषये श्रुतवान् आसीत्। अतः सः "जम्मुतः" इति उक्तवान्।

"पितुः नाम किम्?"

"सः दिवङ्गतः"

"मातुः भ्रातुः भगिन्याः वा कस्यचित् अपि स्थानसङ्केतं वदतु"

Funding by IKS-MoE

"कोऽपि नास्ति"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"असत्यं वदसि? एतत् कौशेयं करांशुकं कुतः धारितम्?"

"कस्यचित् धनिकस्य पार्श्वे उद्योगं करोमि स्म। तस्य बालकस्य करांशुकम् अस्ति"।

"कीदृशम् उद्योगं करोषि स्म?"

"शाकापणतः शाकानि आनयामि स्म। तस्य बालान् क्रीडयामि स्म"।

"ततः?"

"ह्यः गृहस्वामिनी मां ताडितवती। अतः गृहात् पलायितः। अन्यत्र कुत्रचित् उद्योगं कर्तुं प्रस्थितः अस्मि। कोशे नाणकद्वयात् ऋते अन्यत् किमपि नास्ति"।

"कुत्र गच्छसि स्म?"

"यत्र यानं नयेत्। पार्श्वे तु चिटिकायाः कृते धनम् अपि नास्ति"।

रामोः वचनं श्रुत्वा अधिकारिणः हृदये करुणा उद्भूता। 'चिटिकाभावः इति एकस्मात् एव कारणात् एषः बालकः आरक्षकाय न समर्पणीयः। कदाचित् तस्य जीवनं नष्टम् अपि भवेत्' इति चिन्तयन्- "उद्योगं करिष्यसि?" इति अधिकारी तम् अपृच्छत्।

अहं सुरक्षितः अस्मि इति रामुः अचिन्तयत्। अतः शीघ्रम् एव उत्तरम् प्रादात्- "आम्!"

"किं कार्यं करिष्यसि?"

"पात्रक्षालनात् ऋते सर्वं कार्यं कर्तुं शक्नोमि।"

"पलायनं तु न करिष्यसि?"

"यदि ताडनं न करिष्यति तर्हि पलायनम् अपि न करिष्यामि"।

"चौर्यं तु न करिष्यसि?"

"नैव!"

"उत्तमम्। तर्हि इदानीं निद्रां कुरु। प्रातः काले त्वां नगरं प्रति प्रेषयिष्यामि। अहं तत्र वसामि। तत्र त्वया गृहस्य कार्यं करणीयम्। पञ्चरूप्यकाणां मासिकं वेतनं दास्यामि। भोजनं वस्त्रम् च अपि प्राप्स्यति"।

रामुः तूष्णीम् अतिष्ठत्। सः चिन्तयन् आसीत् 'यद्यपि पञ्चरूप्यकैः जीवनयापनं तु कठिनं कार्यम् अस्ति तथापि एतस्मात् कष्टमयात् जीवनात् आत्मानं रक्षितुम् अन्यः मार्गः नास्ति' इति। अतः सः तस्य वचनम् अङ्गीकृतवान्।

५

'ऐमिनाबाद' रेलस्थानकस्य अधिकारिणः रामेश्वरदासस्य कुटुम्बं गुजराँवाला इति नामके स्थाने वसति स्म। यद्यपि ऐमिनाबादे एव रेलविविभागस्य द्वारा रामेश्वरदासः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गृहं प्राप्तुम् अशक्ष्यत्, तथापि गुजराँवालायां तस्य पैतृकं गृहम् आसीत्, इत्यतः तस्य कुटुम्बं तत्रैव वसति स्म। रामेश्वरदासः रामुं तत्रैव प्रेषितवान्।

दिनद्वयस्य पश्चात् एव रामुः तस्मात् उद्योगात् उदासीनः जातः। यादृशं लालनं पालनं च मातुः समीपे भवति स्म तादृशम् अत्र कुतः? सः स्वस्मिन् गृहे रुचिकरं भोजनं उत्तमं वस्त्रं च प्राप्नोति स्म। यदा सः परीक्षायाम् अनुत्तीर्णः जातः तदा आरभ्य आदिनं मित्रैः सह अटनात् ऋते अन्यत् किमपि कार्यं न आसीत्। अत्र प्रातः काले उत्थानसमनन्तरमेव सायं यावत् किमपि कार्यं करणीयं भवति स्म। यथा प्रातः दुग्धस्य आनयनम्, बालानां गृहस्वामिन्याः स्वस्य च वस्त्रक्षालनं, तेषां निष्पीडनम्, आतपे शोषयितुं स्थापनं, विद्यालये पुस्तकस्यूतानां प्रापणम्, ततः प्रत्यागत्य रोटिकायाः भक्षणं, मध्याह्नकाले विपणौ खाद्यसामग्रीणां क्रयणं, सायंकाले विद्यालयतः बालानाम् आनयनं, तदनन्तरं शाकक्रयणं, पाकार्थम् अग्निप्रज्वालनं, रात्रौ भोजनं कृत्वा शय्यायाः सज्जीकरणं, कदाचित् गृहस्वामिन्याः पादमर्दनम् इत्यादीनि तस्य दैनन्दीनि कार्याणि आसन्।

गुजराँवालायां रामोः आगमनस्य तृतीयं दिनम् आसीत्। सः एतस्मात् उद्योगात् खिन्नः जातः आसीत्। मध्याह्नकाले यदा सः भोजनं कृत्वा शयानः आसीत् तदा एव रामेश्वरदासः गृहम् आगतः। कार्यालये स्वस्य सहायकाय कार्यदानं कृत्वा सः पूर्णं दिनं यावत् गुजराँवालायाम् एव प्रायशः कालं यापयति स्म। गृहम् आगत्य सः 'सेवकः कथम् अस्ति' इति पत्नीं रामोः विषये अपृच्छत्।

रामुः नेत्रे निमील्य शयानः आसीत्। तस्य कर्णयोः गृहस्वामिनः वचनानि श्रूयन्ते स्म। सः नेत्रे निमील्य सावधानं स्वामिनः वचनानि शृण्वन् आसीत्। स्वामिनी उक्तवती- "मम तु एवं भाति यत् सः कस्यचित् धनिकस्य पुत्रः अस्ति। सः कार्यं कर्तुम् एव न जानाति। अग्निप्रज्वालनसमये रोदनं करोति। घृतेन विना रोटिकां तु बहुकाठिन्येन कण्ठस्य अधः नयति। अहं कथयामि तस्य गृहसङ्केतं ज्ञात्वा तं प्रेषयतु" इति।

"गृहप्रेषणेन किम्?" इत्येवं वदन् रामेश्वरदासः परिहारम् उक्तवान्- "एतस्मै सम्यक् भोजनं ददातु। केषुचित् दिनेषु सः कार्यकरणम् अपि ज्ञास्यति" इति।

"अस्य पित्रोः कृते मयि करुणा उत्पन्ना भवति"।

"किन्तु अहं पुण्यार्थं गृहे धर्मशालां न निर्मितवान् अस्मि। भ्रान्तजनानां गृहप्रापणं मम दायित्त्वं नास्ति। उद्योगम् इच्छति चेत् सः कार्यं कुर्यात् एव, नोचेत् इतः गच्छेत्। एषः यावत् अत्र स्थास्यति तावत् कालम् एव अन्नवस्त्रं प्राप्स्यति" इति रामेश्वरदासः अवदत्।

रामुः पार्श्वपरिवर्तनं कृत्वा पुनः निद्रातुं प्रयत्नं कृतवान्। किन्तु रामेश्वरदासः तत्क्षणम् एव- "रे रामो .... उत्तिष्ठ रामो" इति आह्वानशब्दम् अकरोत्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रामुः नेत्रे आस्पृश्य उत्थितवान्। रामेश्वरदासः- "चषकमितं जलम् आनय" इति आदिशत्।

रामुः यदा जलम् आनेतुं गतः तदा रामेश्वरदासः तस्य पत्नी च बहिः अटितुं सन्नद्धौ जातौ। रामुः जलम् आनयत्। रामेश्वरदासः जलं पीत्वा पत्न्या सह अटितुं बहिः गतः। बालाः तु विद्यालयं गतवन्तः आसन्। रामुः तत्रैव गृहरक्षणं करोति स्म।

एकान्ते उपविश्य सः स्वस्याः अवस्थायाः विषये विचारं कर्तुम् आरब्धवान्। तेन कृतस्य दोषस्य कृते पाश्चात्तापः अनुभूयमानः आसीत्। 'किम् अहं गृहं गच्छेयम्' इति चिन्तयन् मातुः स्मरणकारणात् तस्य नेत्राभ्याम् अश्रूणि निर्गतानि। सः ततः उत्थाय गृहस्य द्वारपिधानं कृत्वा विपणिं गतवान्। तत्र कस्यचित् रेलस्थानकस्य विषये ज्ञात्वा तां दिशं प्रति प्रस्थितः।

रेलस्थानकं प्राप्य, तस्य अन्तः प्रवेष्टुं तादृशम् एव काठिन्यम् अनुभूतं यादृशं स्वस्मिन् नगरे अनुभूतम् आसीत्। एतं काठिन्यम् अपि तथैव तेन दूरीकृतं यथा तत्र कृतम् आसीत्। स्थानकस्य अन्तः प्रविश्य तत्र यत् यानं स्थितम् आसीत् तस्मिन् उपविष्टवान्।

तस्य उपवेशनस्य समनन्तरम् एव यानं प्रस्थितम्। तद् यानं कुत्र गच्छति इति तस्य अवगमनं न आसीत्। घण्टाद्वयस्य प्रयाणस्य पश्चात् रामुः लाहौरनगरं प्राप्तवान्। लाहौरसदृशं बृहत् स्थानकं दृष्ट्वा सः विस्मितः जातः। तत्र कतिचन रेलयानानि स्थितानि आसन्। शतशः जनाः इतस्ततः गमनागमनं कुर्वन्ति स्म। यस्मिन् रेलयाने रामुः आसीत् तत् लाहौरनगरं प्राप्य रिक्तं जातम्। विवशः सन् सः तत्रैव अवतीर्य स्थानकात् बहिः गन्तुम् उपायं चिन्तयितुम् आरब्धवान्।

लाहौरनगरस्य विषये सः पूर्वमेव श्रुतवान् आसीत्। अधुना तस्य मनसि नगरदर्शनस्य प्रबला इच्छा जागरिता अभवत्। तस्य कोशे इदानीं नाणकद्वयम् अपि न आसीत् यत् गुजराँवालायां प्राप्तिकाले अवशिष्टम् आसीत्। गतदिने सः तेन नाणकद्वयेन मधुरं क्रीत्वा खादितवान् आसीत्। वस्त्राणि अपि मलिनानि आसन्। एतादृशस्थितेः कारणतः तस्य मुखं रुदत् इव जातम्। सः स्थानके एव इतस्ततः अटनं कर्तुम् आरब्धवान्। यदा सः स्थानकात् बहिः गन्तुम् उद्यतः भवति स्म तदा मुख्यद्वारे चिटिकानिरीक्षकं दृष्ट्वा प्रत्यागच्छति स्म। इदानीं तेन बुभुक्षा अपि अनुभूयमाना आसीत्। एवं सः खिन्नः सन् कस्मिंश्चित् पीठे उपविष्टवान्।

बहुकालं यावत् सः तत्र उपविष्टः आसीत्। अन्ततोगत्वा कमपि परिहारम् अप्राप्नुवन् सः निरीक्षकस्य समीपं गत्वा सर्वां स्थितिं वक्तुं निर्णयम् अकरोत्। एवं चिन्तयन् सः गन्तुकामः एव आसीत् तत्समये एव अपरं किञ्चित् रेलयानं तत्र

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आगतम्। अस्मिन् रेलयाने उपवेष्टुं जनानां सम्मर्दः तत्र उपस्थितः आसीत्। तिष्ठतः यानतः बहवः जनाः अवतरन्तः अपि आसन्। 'अहम् अपि याने उपविशेयम्। तत् यत्र गच्छति, मया अपि गन्तव्यम्। किन्तु एतेन उपायेन मदीया बुभुक्षा तु शान्ता न भविष्यति' इति रामुः तदा अचिन्तयत्।

अस्मिन् समये यानतः अवतीर्णतवन्तः जनाः भारवाहानां साहाय्येन स्वस्य वस्तूनि बहिः नयन्ति स्म। सम्मर्दकारणतः जनानां परस्परं स्कन्धघट्टनं भवति स्म। रामुः एतत् दृश्यं पश्यन् एव आसीत्। तत्क्षणम् एव द्वौ भारवाहौ बृहद् पेटिकाद्वयं तस्य पार्श्वभागतः एव नीतवन्तौ। तयोः पृष्ठतः कौचन दम्पती शिशुना सह आगच्छन्तौ आस्ताम्। शिशोः माता तं स्कन्धेन आलिङ्ग्य गच्छन्ती आसीत्। सा किञ्चित् अग्रे एव गतवती आसीत् तावता एव तस्याः अञ्चलतः करवस्त्रेण बद्धा काचित् लध्वी पोटलिका रामोः पार्श्वे पतिता। रामुः तां महिलां पश्यन् आसीत्। तस्य अवधानं पोटलिकायाः दिशि गतम्। सः तां उत्थापितवान्। पूर्वं तु तस्मिन् विचारः स्फुरितः 'सा पोटलिका प्रत्यर्पणीया' इति। किन्तु अपरस्मिन् क्षणे एव पृष्ठतः आगच्छन्तः जनाः तं तर्जयन्तः- "मार्गम् अवरुध्य किमर्थं स्थितः असि? इतः अपसर!" इति उक्तवन्तः।

रामुः पोटलिकां स्वीकृत्य ततः समीपे कुत्रचित् अतिष्ठत्। तौ दम्पती तस्य दृष्टितः दूरं गतवन्तौ आस्ताम्। रामुः दम्पतीम् अनुसरन् किञ्चिद् अग्रे गतवान्। किन्तु जनसम्मर्दकारणात् तयोः समीपं गन्तुम् असमर्थः जातः।

रामुः जनसम्मर्देन सह द्वारतः बहिः निर्गन्तुम् इच्छति स्म, किन्तु निर्गमनं दुष्करं जातम्। तावता एव कस्यचन कुटुम्बस्य बहवः जनाः बालाः च प्रमुखद्वारतः बहिः गच्छन्ति स्म। रामुः अपि तैः जनैः नुण्णः सन् बहिः निर्गतः। निरीक्षकेण यदा 'चिटिकां दर्शयतु' इति उक्तं तदा सः पृष्ठतः इङ्गितम् अकरोत्। निरीक्षकः एतस्य कुटुम्बस्य बालान् गणयितुम् आरब्धवान्। तावता रामुः तद् द्वारतः दूरं गतवान् आसीत्। मार्गं प्राप्य तस्य अवधानं पोटलिकायां जातम्। सः सकृत् तौ दम्पतीं द्रष्टुं यत्नं कृतवान्। किन्तु तौ अदृश्यौ जातौ आस्ताम्।

'पोटलिकायां किम् अस्ति?' इति रामोः कौतूहलं जातम्। सः तस्याः बहिर्भागतः एव परिशीलनम् अकरोत्। एवं भाति स्म यत् तत्र किञ्चित् कागदं कतिचन रूप्यकाणि च सन्ति। सः पोटलिकाम् उद्घाटितवान्। तत्र अष्टात्रिंशत् रूप्यकाणि त्रिंशत् पैसाः च आसन्। रामुः सर्वं धनं कोशे संस्थाप्य कान्दविकस्य आपणं गत्वा मधुरं शष्कुलीः च खादितवान्।

रामुः रात्रियापनार्थं चिन्तामग्नः आसीत्। सः कान्दविकेन निर्दिष्टायाः कस्याश्चन धर्मशालायाः सङ्केतं प्राप्तवान्। रामुः तत्र प्राप्य धर्मशालास्वामिनं प्रकोष्ठविषये विचारितवान्।

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वामी आदौ तं आपादमस्तकम् अपश्यत्। मलिनं वस्त्रं धृतवन्तं रामुं- "तव नाम किम्?" इति सः अपृच्छत्।

"रामदासः" इति तेन असत्यम् उक्तम्।

"कुतः आगतः?"

रामुः पुनः असत्यम् अवदत्- "जम्मुतः" इति।

"किमर्थम् आगतः?"

"उद्योगार्थम् आगतः।"

"रात्रियापनाय भाटकम्?"

"कति आवश्यकानि?"

"प्रकोष्ठस्य भाटकं तु प्रतिदिनं पञ्चाशत् पैसाः। खट्वा आवश्यकी चेत् षट्पैसाः इतोऽपि अधिकं दातव्याः" इति विवृतवान् धर्मशालास्वामी।

रामुः कोषात् एकं रूप्यकं निष्कास्य स्वामिने दत्तवान्। ततः स्थानं प्राप्तम्। रामुः यदा प्रकोष्ठं गत्वा खट्वायायां शयितवान् तदा स्वस्याः अवस्थायाः विषये चिन्तनम् आरब्धवान्। 'मया यत् धनं प्राप्तं तत् भगवता एव दत्तम्' इति चिन्तयन् सः भगवते धन्यवादम् आर्पयत्। तस्य मनसि कश्चन विचारः स्फुरितः। 'गुजराँवालायां तु उद्योगकारणात् खादितुं केवला घृतरहिता रोटिका एव प्राप्यते स्म। किन्तु अधुना भगवतः कृपया शष्कुलीं मधुरं च प्राप्तम्। धनम् अपि प्राप्तम्। उद्योगस्य अपेक्षया एतत् एव उत्तमम् अस्ति' इति। सः भगवन्तं स्मरन् एताम् एव प्रार्थनाम् अकरोत्- 'एषः एव सम्यक् मार्गः स्यात्। इत्थम् एव यदि केचन मूर्खजनाः प्राप्येरन्, ये मम पुरतः धनं प्रक्षिप्य गच्छेयुः तर्हि मम निर्वहणं सुष्ठुरूपेण भवेत्' इति।

एवं विचिन्तयन् एव सः निद्राणवान्। रात्रौ सः धनप्राप्तिविषये स्वप्नं दृष्टवान्। पुनः कदाचित् धनस्य नष्टताविषये अपि स्वप्नं दृष्टवान्।

अन्येद्युः सः उत्थाय शौचादिकर्म समाप्य विपणितः फेनकम् आनीतवान्। ततः वस्त्राणि प्रक्षाल्य, तानि आतपे अवशोष्य धृतवान्। तदनन्तरं सः भोजनं कर्तुं विपणिं गतवान्। मार्गे अटन् सः एतत् एव चिन्तयति स्म 'भगवान् अद्य अपि बुद्धिहीनेन जनेन मम मेलनं कारयेत्, यः धनपूर्णां पोटलिकां मम पुरतः क्षिपेत्। यदि एवं स्यात् तर्हि कियान् आनन्दः' इति।

दिनं यावत् अटितवान्। किन्तु तादृशः अवसरः तेन न प्राप्तः। सः स्थानकं प्रवेष्टुं चिटिकाम् अपि क्रीतवान्। अन्तः गत्वा तस्मिन् एव पीठे बहुघण्टाः यावत् उपविष्टवान् अपि। किन्तु अद्य तादृशी घटना न प्रवृत्ता। रात्रिकाले सन्निहिते सति विवशः सन् रामुः ततः बहिः आगत्य भोजनं कृत्वा धर्मशालां प्राप्तवान्। सः धर्मशालास्वामिनम् अवदत्-

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"उद्योगः न प्राप्तः अतः अद्य रात्रौ अपि अत्रैव भविष्यामि" इत्येवं वदन् षट्पञ्चाशत् पैसाः स्वामिने दत्त्वा स्वप्रकोष्ठम् आगतः।

इत्थं कतिचन दिनानि व्यतीतानि। धनं न्यूनं जायमानम् आसीत्। तस्मिन् व्याकुलता अवर्धत। तस्य कोषे केवलानि पञ्चरूप्यकाणि किञ्चित् पैसाः च अवशिष्टाः आसन्। सः पुनः रेलस्थानकं गत्वा तस्मिन् पीठे उपविष्टवान्। अकस्मात् सः अग्रभागात् आगच्छन्तं कञ्चित् प्रभाविनं पुरुषं अपश्यत्। सः डोगरीशैल्या उष्णीषं धृतवान् आसीत्। तस्य पादयोः समीकृते चकासमाने पादत्राणे आस्ताम्। तम् अभिमुखं दृष्टवतः रामोः एवम् अभासत यत् सः कश्चन विशिष्टः पुरुषः अस्ति। तस्मात् सः तं द्रष्टुं पीठात् उत्थितः। सः पुरुषः यदा रामोः पार्श्वभागतः गच्छन् आसीत् तदा सः कञ्चुकस्य कोषतः करवस्त्रं निष्कास्य नासिकां स्वच्छां कुर्वन् आसीत्। करवस्त्रस्य निष्कासनसमये चर्मनिर्मितः धनस्यूतः अपि अधः पतितः जातः। रामुः चिन्तितवान् 'अद्य भगवान् पुनः मयि करुणां प्रदर्शयन् अस्ति' इति। यदा सः पुरुषः किञ्चित् दूरं गतः तदा रामुः अवनम्य धनस्यूतं स्व्यकरोत्। धनस्यूतं स्वीकृत्य भिन्नां दिशं प्रति प्रस्थितः। तस्य पुरुषस्य पृष्ठतः अनुसरणं, धनस्यूतस्य प्रत्यर्पणम् इत्यादिकम् अचिन्तयन् सः विपरीतदिशं प्रति एव गच्छन् आसीत्। किञ्चित् असमीचीनं कार्यम् असकृत् क्रियते चेत् अन्तरात्मनः ध्वनिः न श्रूयते।

सः रेलस्थानकस्य अन्यस्मात् द्वारात् बहिः आगतः। ततः विश्रामस्थले प्राप्ते सति स्वामिना पृष्टः-

"किं भोः! रामदास, उद्योगं प्राप्तवान्?"

"नैव! किन्तु श्वः एव लाहौरतः अन्यत्र गन्तव्यम् इति अहं चिन्तयामि। कदाचित् अमृतसरनगरे उद्योगं प्राप्येत"।

रामुः श्वस्तनस्य दिनस्य कृते षट्पञ्चाशत् पैसाः स्वामिने दत्वा स्वप्रकोष्ठं गतः। प्रकोष्ठस्य द्वारपिधानं कृत्वा धनस्यूतम् उद्घाट्य तत्र विद्यमानानि चतुश्शतं विंशतिं रूप्यकाणि रेलचिटिकां च अपश्यत्। एषा प्रयाणचिटिका सियालकोटतः मुम्बयीनगरं यावत् आसीत्। धनस्यूतस्य कस्मिंश्चित् भागे परीवर्तः अपि आसीत्। रामुः तस्मिन् दिने धनप्राप्तिकारणतः बहुः प्रसन्नः आसीत्। तस्य मनसि विचारद्वयं स्फुरितम्। प्रथमः तु चिटिकया प्रयाणं कृत्वा मुम्बईनगरं गन्तव्यम् इति। द्वितीयः 'सर्वं धनं भगवतः योगदानम्' इति मत्वा स्वसमीपे एव स्थापनीयम् इति।

घण्टां यावत् सः मनसि योजनां कुर्वन् आसीत्। पुनः तस्य चिन्तनं जातं 'अहं रेलस्थानकं गत्वा एतत् जानीयां यत् मुम्बयीयानं कदा प्रतिष्ठते'? इति। तस्मात् सः खट्वातः उत्थितः। प्रकोष्ठं तालेन पिधाय धर्मशालातः बहिः गन्तुं यदा द्वारसमीपं प्राप्तः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तदा तदेव बृहत् कञ्चुकं धृतवन्तं पुरुषं दृष्टवान्। सः पुरुषः आरक्षकैः सह स्थितः आसीत्। तं दृष्ट्वा रामुः व्याकुलः जातः। कदाचित् आरक्षकाः माम् एव ग्रहीतुम् आगताः इति तस्य मनसि भयं व्याप्तं जातम्। यदा सः मुखं विपरीतदिशि कुर्वन् विश्रामस्थलतः बहिः निर्गच्छन् आसीत् तदा तेन दृष्टं यत् कञ्चुकधारी पुरुषः एकेन आरक्षकेण गृहीतः आसीत्। तस्मात् तस्य मनसि विद्यमानं भयं नष्टं जातम्। तत्र किं प्रचलति इति अवगन्तुं रामुः तेषां समीपं गत्वा अतिष्ठत्। सः कृष्णकञ्चुकधारी धर्मशालास्वामिनं कथयन् आसीत्- "श्रीमन्! मम अङ्गुलीयकम् एतत् न्यासरूपेण भवान् स्वीकरोतु। अहं श्वः भवते दशरूप्यकाणि दास्यामि। इदानीम् एतेभ्यः सप्तरूप्यकाणि द्विषष्टिं पैसाः दत्त्वा मम प्राणान् रक्षतु" इति।

"किं प्रवृत्तम्?" इति धर्मशालास्वामिना पृष्टम्।

"अहं सियालकोटतः आगच्छन् आसम्। मम धनस्यूतः कुत्रापि लुप्तः जातः। चतुश्शताधिकानि रूप्यकाणि प्रयाणचिटिका च धनस्यूते एव आसन्। प्रयाणचिटिकया विना प्रयाणं कुर्वन्तं माम् एते आरक्षकाः गृहीतवन्तः। अहम् एतान् अवदं यत् विपणौ मम अङ्गुलीयकं विक्रीय चिटिकायाः मूल्यं प्रत्यर्पयामि इति। अस्मिन् विश्रामस्थले वासस्य मम इच्छा अस्ति। तस्मात् कारणात् एतत् भवतः पार्श्वे एव न्यासत्वेन स्थापयितुम् इच्छामि"।

धर्मशालास्वामी तत् अङ्गुलीयकं हस्ते गृहीत्वा सम्यक्तया परिशीलितवान्। करतले तत् संस्थाप्य तस्य भारम् ऊहितवान्। पुनः तत् पेटिकायां संस्थाप्य सप्तरूप्यकाणि द्विषष्टिं पैसाः आरक्षकेभ्यः प्रादात्। तदनन्तरम् आरक्षकाः तस्य हस्तौ निगडात् मोचितवन्तः। ततः तैः प्राप्तस्य धनस्य देयकं तस्मै दत्त्वा प्रतिगतम्।

'मयि कस्यापि सन्देहः नास्ति' इति अवगत्य रामुः सन्तोषम् अनुभूतवान्। सः सन्तोषेण बहिः गच्छन् आसीत्। तावता एव धर्मशालास्वामी कृष्णकञ्चुकधारिणम् "भवतः नाम किम्?" इति अपृच्छत्।

"जगदीशचन्द्रः"।

"मया दत्तं धनं कथं प्रत्यर्पयिष्यति?"

"अहं श्वः विश्रामस्थलस्य पुरतः इन्द्रजालक्रीडां दर्शयिष्यामि। तया इन्द्रजालक्रीडया धनं सम्पाद्य भवते दास्यामि"।

"इन्द्रजालक्रीडा?" इति स्वामी साश्चर्यम् अपृच्छत्।

"आं, भवान् अपि पश्यतु। भवन्तं निःशुल्कं दर्शयिष्यामि"।

"किं भवान् ऐन्द्रजालिकः अस्ति?"

"कोऽपि स्याम्। मया भवतः सकाशात् यत् धनं प्राप्तं तत् प्रतिदास्यते एव। इदानीं भवान् मह्यं विश्रामाय प्रकोष्ठं ददातु। भोजनाय किञ्चित् धनम् अपि ददातु"।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वामी द्विषष्टेः पैसात्मकस्य देयकं वासाय च प्रकोष्ठं जगदीशचन्द्राय प्रादात्। रामुः प्रवृत्तं सर्वं ज्ञात्वा ततः बहिः अगच्छत्।

६

मुम्बयीनगरं प्रति रेलयानं रात्रौ अष्टवादने प्रस्थानं करिष्यति इति रामुः पृच्छां कृत्वा अजानात्। तस्मिन् एव विश्रामस्थले कृष्णकञ्चुकधारिणः उपस्थितेः कारणतः तस्य आशङ्का आसीत् यत् कदाचित् चोरितस्य धनस्य विषये रहस्योद्घाटनं भवेत्। तस्मात् सः 'रात्रौ एव रेलयानेन प्रस्थातव्यम्' इति निश्चयं कृतवान्।

सायं सप्तवादने सः विश्रामस्थलतः स्थानकं प्राप्तवान्। प्रयाणचिटिका द्वितीयश्रेण्याः आसीत्। द्वितीयतृतीयश्रेण्योः मध्ये रामुः अन्तरं न जानाति स्म। तस्य समीपे हरितवर्णयुक्ता चिटिका आसीत्। अन्येषां प्रयाणिकानां समीपे पीतवर्णयुक्ता आसीत्। सः मनसि एव चिन्तितवान् यत् कदाचित् मुम्बयीनगरं प्रति प्रयाणचिटिका हरितवर्णयुक्ता एव स्यात् इति।

अमृतसरस्थानके चिटिकापरीक्षकः यदा तस्य हस्ते द्वितीयश्रेण्याः चिटिकां दृष्टवान् तदा सः विस्मितः जातः। सः पृष्टवान्- "कुतः आगच्छसि?" इति।

रामुः स्मृतवान् यत् तस्य चिटिका सियालकोटतः अस्ति। अतः सः अवदत्- "सियालकोटतः" इति।

"कस्य पुत्रः असि?"

"चौधरिदुर्गादासस्य"।

"चिटिका कुतः प्राप्ता?"

रामुः व्याकुलः जातः। सः एतस्य प्रश्नस्य कारणं किम् इति ज्ञातुम् असमर्थः जातः। एतावत् तु ज्ञातम् एव यत् चिटिकायां किमपि लिखितं स्यात्। तस्य मनसि कश्चन उपायः स्फुरितः। सः अवदत्- "मम आवुत्तः सियालकोटे परार्थविक्रेता अस्ति। सः मां प्रेषितवान्। एतां चिटिकां सः एव मह्यं दत्तवान्" इति।

"अरे, एषा चिटिका द्वितीयश्रेण्याः अस्ति। अत्र किमर्थम् उपविष्टः असि? उत्तिष्ठ, अहं त्वां तत्र उपवेशयामि"।

इत्थं सः मिथ्याभाषणेन अत्र अपि रक्षितः जातः। ततः द्वितीयश्रेण्याः प्रकोष्ठे तल्पमये आसने उपविश्य आनन्दम् अनुभूतवान्। किञ्चित् मिथ्याभाषणेन अहं कालमुखात् रक्षितः जातः इति यदा तेन अनुभूतं तदा तस्य साहसम् इतोऽपि अधिकं प्रवृद्धम्।

तस्मिन् प्रकोष्ठे त्रयः अन्ये प्रयाणिकाः अपि आसन्। तेषु कश्चन मारवाडीजनः आसीत् यः अमृतसरतः प्रयाणं कुर्वन् आसीत्। रामोः मुखम् आकर्षकम् अस्ति इति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कारणेन सः रामुणा सह सम्भाषणं कर्तुम् ऐच्छत्। रामुः 'परार्थविक्रेतुः श्यालः अस्मि' इति अभिमानं वहन् 'शङ्करदासस्य श्यालः' इति स्वपरिचयं तम् उक्तवान्। सः लालनत्थूमलस्य परिचयम् अपि अवदत्।

एतेन मारवाडीप्रयाणिकः इतोऽपि प्रभावितः जातः। मार्गपर्यन्तं द्वयोः मध्ये घनिष्ठः सम्बन्धः जातः। यदा रेलयानं मुम्बयीनगरं प्राप्तं तदा सूर्योदयः जातः आसीत्। सर्वे प्रयाणिकाः शौचादिकर्म समाप्य चायपानं कुर्वन्तः आसन्। रामुः मूत्रविसर्जनं कर्तुं मूत्रालयं गतवान्। यदा सः हस्तौ क्षालयन् आसीत् तदा अकस्मात् तत्र विद्यमानायां निधानिकायां स्थापिता सुवर्णघटी दृष्टिगोचरतां गता। सुवर्णघट्या सह सुवर्णशृङ्खला अपि आसीत्।

रामुः क्षणं यावत् विचिन्त्य सुवर्णघटीं कोषे स्थापितवान्। बहिः आगत्य वातायनात् मुखं निष्कास्य तत्र उपविष्टवान्। तस्य हृत्स्पन्दनं भवति स्म। भयेन मुखम् आकुञ्च्य स्वस्य भयम् अन्तः एव गोपयितुं प्रयत्नं करोति स्म।

यदा यानं मुम्बयीरेलस्थानके अतिष्ठत् तदा चायपात्राणि स्वीकर्तुं वितारकाः प्रकोष्ठम् आगच्छन्। प्रकोष्ठस्य प्रयाणिकाः तेभ्यः धनं यच्छन्तः आसन्। एतस्मिन् क्षणे एव रामुः, यस्य समीपे आच्छादकात् ऋते किमपि न आसीत्, शीघ्रम् एव यानतः बहिः आगत्य दूरं गतवान्।

बहिः आगत्य रामुः अश्वशकटे उपविश्य शाकटिकम् अवदत्- "कस्मिंश्चित् विश्रामस्थले मां नय" इति।

"विश्रामस्थलम् इतः त्रिमीलमिते दूरे अस्ति, अतः रूप्यकद्वयं भाटकं दातव्यम्"।

रामुः ततः दूरं गन्तुम् इच्छति स्म। अतः तावत् भाटकं दातुं सिद्धः अभवत्। अश्वशकटं प्रस्थितम्। शकटं यदा दूरं गतं तदा तस्य हृदयस्य स्पन्दनं न्यूनं जातम्। इदानीं सः अवगतवान् यत् अहं सुरक्षितः अस्मि इति।

वायिकलायां किञ्चन विश्रामस्थलम् आसीत्। यत्र जनेभ्यः धनं प्रदाय पुनः तेषां रक्तचोषणकर्ता कश्चन पठानः वसति स्म। यत्र नगरस्य कोशचोराः अन्ये च तादृशम् एव कार्यं कुर्वाणाः जनाः वसन्ति स्म। शाकटिकः रामुं तत्रैव प्रापितवान्। यदा रामुः तत्र स्थातुं स्थलस्वामिनं पृच्छन् आसीत् तदा शाकटिकः 'एषः अपरिचितः अस्ति' इति पक्ष्मपातनं कृत्वा किमपि असूचयत्।

स्थलस्वामी शाकटिकस्य इङ्गितं ज्ञात्वा तस्मै प्रकोष्ठं दत्तवान्। रामुः स्वस्मिन् प्रकोष्ठे विद्यमानायां खट्वायाम् उपविश्य मनसि स्वस्य भाग्यस्य प्रशंसां कुर्वन् आसीत्। 'सुवर्णघट्याः विक्रयणं कृत्वा रोकधनं कथं प्राप्तव्यम्? इति तस्य पुरतः कश्चन प्रश्नः उपस्थितः अभवत्। कदाचित् सः मारवाडीजनः यदि एवम् अटन्तं मां द्रक्ष्यति तर्हि अहम् आरक्षकैः गृहीतः भवेयम्। अन्वेषणकाले यदि मत्तः सुवर्णघटी प्राप्ता भवेत् तर्हि मम

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कारावासः अपि भवेत्' इत्यस्मात् भयात् आत्मानं मोचयितुं घटीविक्रयणस्य योजनां कुर्वन् आसीत्।

स्वस्मात् गृहात् आगतवतः रामोः अत्र विंशतिः दिनानि अतीतानि। किन्तु तस्य बुद्धेः विकासः तावान् अधिकः जातः यावान् विकासः बहुभिः वर्षैः प्राप्यते। वञ्चनामयं कापट्यमयं कार्यं तस्मै भृशम् अरोचत। एतादृशे कार्ये श्रमेण व्ययेन च विना एव धनं प्राप्यते इति चिन्तनं तस्य।

रामुः किञ्चित् विश्रम्य यदा प्रकोष्ठतः बहिः आगतः तदा स्थलस्वामी ध्यानपूर्वकं तम् अपश्यत्। रामुः चिन्तितवान्- 'किमर्थं न एतं स्थलस्वामिनम् एव पृच्छेयम्? एषः एव घटीविक्रयणस्य किञ्चन उपायं वदेत्' इति। सः तस्य समीपं गत्वा अवदत्- "भवन्तं किमपि प्रष्टुम् इच्छामि" इति।

"किम्?"

रामुः पुनः मिथ्याभाषणं कुर्वन्- "मम सर्वाणि वस्त्राणि रेलयाने केनचित् चोरितानि। अतः अहम् इच्छामि यत् स्वस्याः घट्याः विक्रयणं कृत्वा वस्त्रक्रयणं कुर्याम्। भवान् वदतु यत् एषा घटी कुत्र विक्रेतुं शक्यते?" इति अवदत्।

विश्रामस्थलस्वामी क्षणं यावत् आश्चर्यचकितः जातः। एषा घटी चौर्येण गृहीता अस्ति इति तेन अवगतम्। तथापि स्वस्य सन्देहं दृढीकर्तुम्- "एतां घटीं कुतः क्रीतवान् आसीत्?" इति पृष्टवान्।

"लाहौरनगरे"।

"कति रूप्यकैः?"

"द्विशतेन"।

एषा घटी निःसन्देहं चोरिता अस्ति इति तेन अवगतम्। एतत् अपि स्पष्टं जातं यत् सः अस्मिन् कार्ये नूतनतया शिक्षितः अस्ति। तस्मात् तस्य अनुभवहीनतायाः लाभं प्राप्तुं स्वामी- "पश्य रे बालक! अहं जानामि यत् एषा चौर्येण प्राप्ता घटी। त्वम् एतस्याः मूल्यम् अपि न जानासि। तथापि अस्याः विक्रयणे तव साहाय्यं कर्तुं शक्नोमि। किन्तु मम भागः अपि दातव्यः। पश्य, अस्याः मूल्यं पञ्चषष्टिः रूप्यकाणि। अस्याः सुवर्णशृङ्खलायाः मूल्यं पञ्चपञ्चाशत्। अहं तुभ्यं पञ्चाशत् रूप्यकाणि दातुं शक्नोमि। तव इच्छा अस्ति चेत् देहि" इति।

रामुः व्याकुलः जातः। वस्तुतः एतयोः द्वयोः अपि मूल्यं सः न जानाति स्म। सः- "भवान् कथं वक्तुं शक्नोति यत् एषा चौर्येण गृहीता?" इति तम् अपृच्छत्।

स्वामी अहसत्। सः रामोः स्कन्धे हस्तं निधाय- "पश्य, एषा घटी तव नास्ति। आकारेण तव मणिबन्धात् दीर्घा अस्ति। त्वम् एतस्याः मूल्यम् अपि न जानासि। अपि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

च त्वम् एतां मणिबन्धे बन्धुम् अपि न जानासि। यदि जानासि तर्हि मणिबन्धे बद्ध्वा दर्शय" इति अवदत्।

रामुः निरुत्तरः जातः। सः ततः उत्थाय गन्तुम् इच्छति स्म। किन्तु स्थलस्वामी तस्य मनोभावम् अवगत्य स्मितं कुर्वन्- "पश्य, बालक! अहं तव साहाय्यं करिष्यामि। यदि एतस्याः विक्रयणार्थं विपणिं गमिष्यसि तर्हि आरक्षकैः गृहीतः भविष्यसि। अहम् अत्रैव तव साहाय्यं करिष्यामि" इति अवदत्।

"किन्तु, मूल्यं तु स्वल्पम् अस्ति" इति रामुः उत्तिष्ठन् अवदत्।

"तिष्ठ! अहम् अपि चोरविपणौ एव एतस्याः विक्रयणं करिष्यामि। एतस्याः मूल्यम् एकशतं विंशतिः रूप्यकाणि। शतेन रूप्यकैः विक्रीता भविष्यति। तत्र पञ्चविंशतिं रूप्यकाणि अहं प्राप्स्यामि पञ्चविंशतिं च क्रेता स्वीकरिष्यति" इति।

रामुः अकथयत्- "मह्यं धनं नितराम् आवश्यकम्। तस्मात् तावत् एव अहं स्वीकरिष्यामि" इति।

इत्थं रामुः ऐदम्प्राथम्येन चौर्यवस्तुनः विक्रयणं कृतवान्।

७

रामुः स्वस्य कृते वस्त्राणि आच्छादकं च क्रीतवान्। एवं सः सुखेन वासं कर्तुम् आरब्धवान्। तस्मिन् विश्रामस्थले तस्य पञ्चदिनानि एव अतीतानि। तावता एव अपरेण केनचित् बालेन सह तस्य परिचयः जातः। रामुः स्वमिन् प्रकोष्ठे उपविशन् भाग्यं श्लाघयन् आसीत्। तस्य प्रकोष्ठस्य पार्श्वप्रकोष्ठे कश्चन अपरः बालकः वसति स्म। सः रामोः प्रकोष्ठद्वारम् आगत्य- "किम् अहम् अन्तः आगन्तुं शक्नोमि?" इति अपृच्छत्।

"आम्"!

रामुः तं प्रश्नदृष्ट्या पश्यन् आसीत्। आगन्तुकः बालकः खट्वायाः अग्रे विद्यमानायाम् उत्पीठिकायाम् उपाविशत्। उपविशन् एव सः अवदत्- "अहं बहुभ्यः दिनेभ्यः गमनागमनं कुर्वन्तं त्वां पश्यामि। एकाकी एव वासं कुर्वतः तव हृदयं व्याकुलं न भवति किम्?" इति।

"व्याकुलतायाः कः विषयः। दिनपर्यन्तं तु अटनं करोमि। रात्रौ श्रान्तिम् अनुभूय निद्रां करोमि"।

"केवलम् अटनम् एव करोषि, न अन्यत्?"

"अन्यत् किम्?"

"कुतश्चित् घटी न प्राप्ता?"

"कः अभिप्रायः?"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"पश्य, मित्र! अहम् अपि एतादृशं कार्यं करोमि" इति उक्त्वा सः कोशतः किञ्चन चर्मनिर्मितं धनस्यूतं निष्कासितवान्। सः स्यूतम् उद्घाट्य दर्शितवान्। तस्मिन् द्विसहस्रं रूप्यकाणि आसन्। रामुः एतावत् अधिकं धनं दृष्ट्वा आश्चर्यचकितः जातः। सः तं बालकम् अपृच्छत्- "कथम् एतावत् धनं प्राप्तम्?" इति।

"तथैव, यथा त्वं सुवर्णघटीं प्राप्तवान्"।

रामुः लोभदृष्ट्या सर्वं धनं पश्यन् आसीत्। तस्य मनोभावम् अवगत्य बालकः- "अहं चिन्तयामि यत् त्वम् इदानीं नूतनया शिक्षितः असि। अतः गतेषु पञ्चदिनेषु किमपि न प्राप्तम्" इति अवदत्।

रामुः तस्य सम्भाषणविषयं ज्ञातवान्। एषः बालकः चोरः अस्ति इत्यपि तेन अवगतम्। माम् अपि चोरं भावयति। स्वस्य रहस्योद्घाटनं, तस्य चौर्यप्रवृत्तिं च ज्ञात्वा रामोः आशङ्का अपगता जाता। सः बालकम् अवदत्- "भ्रातः! अहं चौर्यं न कृतवान्। अहं तु कस्मिंश्चित् स्थाने पतितां घटीम् आनयम्" इति।

"तर्हि कदापर्यन्तं एवम् एवं जीविष्यति?"

"यावत् शक्यं तावत्। यदा धनं समाप्तं भविष्यति तदा किमपि चिन्तयिष्यामि"।

"ऊँ .... हूँ! एवं कार्यं न सिध्यति। त्वं मया सह श्वः आगच्छ। अहं त्वाम् ईदृशीं युक्तिं शिक्षयिष्यामि येन प्रतिदिनं त्वं नूतनं वस्तु हस्तगतं कर्तुं शक्नुयाः"।

रामुः मौनेन उपविष्टः आसीत्। सः बालकः स्वस्य कथनम् एव अनुवर्तयन् उक्तवान्- "मम नाम शरणः। अहं कस्य पुत्रः इति न जानामि। मम माता मुम्बयीमार्गेषु भिक्षां याचति स्म। यदा अहं किञ्चित् एव ज्येष्ठः अभवं, तदा मम माता एकां पुत्रीं प्रसूतवती। तस्मिन् काले अहं सप्तवर्षीयः आसम्। कतिपयानां दिनानां पश्चात् माता मम लालनस्य पोषणस्य च भारं वोढुम् असमर्था जाता। तदा आरभ्य अहं स्वातन्त्र्येण सर्वत्र अटामि ....

"भिक्षाटनस्य अपेक्षया चौर्यकार्यं मह्यं बहु रोचते। प्रकृतं द्वाभ्यां वर्षाभ्याम् एतेन कार्येण एव जीविकोपार्जनं करोमि। अद्यतनीयायाः प्रवृत्तायाः घटनायाः कारणतः मम महान् आनन्दः जातः। अहं बङ्गालवित्तकोशस्य पुरतः स्थितः आसम्। कश्चन पारसीजनः ततः बहिः आगतः। तस्य प्रावारकस्य कोषे एषः धनस्यूतः आसीत्। बहिर्भागतः प्रावारकः किञ्चित् स्फीतः दृश्यते स्म। अहं तत् अपहर्तुम् ऐच्छम्। अहं तस्य पार्श्वतः गच्छन् क्षुरपत्रेण प्रावारकं विदीर्णवान्। तस्मात् प्रावारकस्य अन्तः विद्यमानः कोषः अपि नष्टः जातः। तदनन्तरं धनस्यूतः एषः मया प्राप्तः। गृहम् आगत्य धनं दृष्टवतः मम मनः प्रसन्नं जातम्" इति।

Funding by IKS-MoE

"अहं तु एतावता साहसेन कार्यं कर्तुं न शक्नोमि"।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"चिन्ता नास्ति। शिक्षणेन कर्तुं शक्नोषि।"

"कथम्?"

"पश्य, अहं तव पुरतः एव प्रात्यक्षिकं दर्शयामि" इति उक्त्वा शरणः रामोः किञ्चन मलिनं वस्त्रम् कपाटे अवलम्बितवान्। स्वयं प्रकोष्ठस्य बहिर्भागतः अन्तः प्रविष्टवान्। वस्त्रसमीपम् आगच्छन् सः दक्षिणहस्तं वामहस्तस्य पार्श्वे नीतवान्। क्षणाभ्यन्तरे एव सः वस्त्रं स्पृशन् अग्रे आगतः। ततः एकं पदम् एव अग्रे स्थापितवान् आसीत्, तावता एव वस्त्रं विदीर्णं जातम् आसीत्। अर्धं विदीर्णं सत् अधः अपि पतितम्। शरणः अहसत्। रामुः विस्मितः जातः। विदीर्णं तत् वस्त्रं दृष्टवतः तस्य दुःखम् अपि जातम्।

शरणः रामोः नेत्रयोः शोकच्छायां पश्यन्- "अरे! विदीर्णं तत् वस्त्रं दृष्ट्वा एतावती चिन्ता! अहं तु विंशत्यधिकानि वस्त्राणि विदीर्य एतत् कौशलं ज्ञातवान्। आगच्छ अत्र, अहं त्वाम् अपि एतत् कौशलं शिक्षयामि" इति अवदत्।

स्वल्पेन एव प्रयत्नेन रामुः कौशलम् एतत् अवगतवान्। अभ्यासकाले तस्य बहूनि वस्त्राणि नष्टानि जातानि। तस्मात् दिनात् शरणः तस्य प्रियं मित्रम् अभवत्। एकदा सायङ्काले उभौ अपि नूतनानि वस्त्राणि धृत्वा विपणिं गतवन्तौ। तत्र भोजनशालायां भोजनं कृत्वा समुद्रतटम् अगच्छताम्। ततः जुहूनामकम् उपनगरम् अटितुं गतवन्तौ। यद्यपि रामुशरणयोः वयः समानम् आसीत् तथापि शरणः रामोः अपेक्षया मानवानां अधमप्रकृतिम् अधिकतया जानाति स्म। सः जुहूतटे नारिकेलजलं विक्रीणानं पुरुषं दृष्ट्वा रामुम् अवदत्- "एषः पुरुषः तस्मिन् एव गृहे वसति, यस्य गृहस्य पुरतः पादपथे अहं मम माता च शयनं कुर्वन्तौ आस्ताम्। तदा आरभ्य एव एषः नारिकेलजलं अनानसफलस्य पेयं च विक्रीणीते। किन्तु अहम् एकस्मिन् वर्षे एव तावत् धनम् अर्जितवान् अस्मि येन एतादृशानां दशाधिकानाम् आपणानां स्वामित्वं प्राप्तुं शक्नुयाम्। एषः निरुपायः सन् तथैव अस्ति यथा दशवर्षेभ्यः पूर्वम् आसीत्"।

रामुः अवदत्- "किन्तु, अस्माकं चौर्यकार्यं उत्तमं कार्यं तु न। यदि वयम् आरक्षकैः गृहीताः भवेम तर्हि?"

"तदा किं? कारागृहे भोजनं तु लप्स्यते एव"।

"मम चिन्तनं भिन्नम् अस्ति। द्वित्रवारं चौर्यकार्याणि कृत्वा, ततः प्राप्तेन धनेन वयम् उत्तमं कार्यं कुर्याम"।

"तर्हि किम् एतत् कृत्यं कश्चन उद्योगः नास्ति?"

"एतत् तु चौर्यकार्यम् अस्ति"।

"त्वम् उन्मत्तः जातः असि। सर्वे चौर्यं कुर्वन्ति। वयम् अपि कुर्मः। अस्माकं कृत्यं चौर्यकार्यनाम्ना व्यवह्रियते अन्येषां कृत्यं तु उद्योगनाम्ना। अन्तरम् एतावत् एव"।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रामुः शरणेण उक्तां युक्तिम् अवगन्तुम् न अशक्नोत्। सः तु स्वादिष्टं भोजनं समुद्रतटस्य शीतलं वायुं च उपभुञ्जानः सन् परमः सन्तुष्टः आसीत्। शरणः स्वस्य कथनम् अनुवर्तयन्- "एते धनिकाः ये यन्त्रागारे कार्यालये वा द्वित्राः घण्टाः कार्यं सम्पाद्य मोटरयानेन सर्वदा अटन्तः भवन्ति, किं चौर्यकार्यं न कुर्वन्ति? मम मनः अपि एतादृशयानेन अटितुम् इच्छति" इति अवदत्।

एवं कथयन् अकस्मात् सः तूष्णीम् अभवत्। रामुः तस्य मुखं पश्यन् आसीत्। शरणः मौनभङ्गं कुर्वन्- "अद्य कस्यचन भाग्यवतः मुखं दृष्टवान् स्याम्। तस्मिन् दिने द्विसहस्रं प्राप्तम्। अद्य पश्य, किञ्चन भक्ष्यं पुरस्तात् आगच्छत् अस्ति। एतस्मात् ततोऽपि अधिकं प्राप्तुं शक्नोमि।

रामुः तस्यां दिशि अपश्यत् यत्र शरणः इङ्गितं कुर्वन् आसीत्। कश्चन शिरस्त्रधारी मारवाडीजनः पत्न्या सह समुद्रतटे अटन् आसीत्। महिलायाः हस्ते कश्चन दीर्घः वनितास्यूतः आसीत्। सा स्कन्धमूले स्यूतम् अवलम्ब्य अटन्ती आसीत्। रामुः शरणं पृष्टवान्- "वनितास्यूते महिलानां अधररागः अङ्गरागः कङ्कतम् इत्यादिभ्यः सौन्दर्य-प्रसाधनवस्तुभ्यः ऋते अन्यत् किं भवेत्? तेन चौर्येण किं प्रयोजनम्?" इति।

"यदा अहं त्वया सह सम्भाषमाणः आसं तदा सा महिला पयोहिमं क्रीणाति स्म। परीवर्तः न आसीत् इत्यतः सा रूप्यकाणां बन्धतः एकं कागदरूप्यकं पयोहिमविक्रेत्रे दत्तवती। सः एव बन्धः तस्याः वनितास्यूते अस्ति"।

"कदाचित् एकरूप्यकात्मकस्य बन्धः स्यात्"।

"नैव मित्र! दशरूप्यकाणां बन्धः अस्ति"।

"किन्तु तस्य स्वायत्तीकरणं कथं करिष्यति?"

"पश्य, अहं तुभ्यं विंशतिं रूप्यकाणि ददामि। त्वम् एकं कार्यं कुरु। सावधानतया एतत् कार्यं करणीयम्। यदा सः बन्धः मम हस्तगतः भविष्यति तदा त्वया पलायनं करणीयम्। एवं सर्वेषाम् अवधानं त्वयि भविष्यति। त्वया टैक्सीयानेन पलायनस्य प्रयत्नः करणीयः। कदाचित् तव ग्रहणस्य अपि प्रयत्नः भवेत्। किन्तु ते त्वत्तः किमपि प्राप्तुं न शक्नुवन्ति। तव अनुसरणं दोषाय जातम् इति यावत् तेषां बोधः भविष्यति तावत् अपहृतं धनं सुरक्षितस्थलं प्रापयिष्यामि। त्वं स्वस्मिन् कोषे केवलानि विंशतिं रूप्यकाणि एव स्थापय"।

रामुः अवदत्- "मम समीपे तु रूप्यकद्वयं षट्पैसाः च सन्ति" इति। "चिन्ता मास्तु, आगच्छ चलाव" इत्थं सम्भाषमानौ तौ दम्पतेः पृष्ठतः आगतौ। शरणः रामुं त्यक्त्वा तयोः पार्श्वभागेन गच्छन् आसीत्। क्षणाभ्यन्तरे एव छुरिकया स्यूतं विदार्य रूप्यकाणां बन्धं सः हस्तगतं कृतवान्। ततः सः विपरीतदिशं प्रति प्रस्थितः। महिला स्यूतस्य भारं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न्यूनं जातम् इति ऊहित्वा स्यूतं परिशीलितवती। तत्र धनं न आसीत्। इतस्ततः अन्वेषणेन अपि न प्राप्तम्। तावता एव रामुः ततः पलायनम् अकरोत्। मारवाडीजनः तत्पत्नी च 'चोरः - चोरः' इति कोलाहलं कुर्वन्तौ पलायनं कुर्वतः रामोः पृष्ठतः धावि-न्तवन्तौ। रामुः टैक्सीस्थानकं प्रति धावितवान्। स्थानकं प्राप्य स्थितः अभवत्। तावता एव दीर्घोच्छ्वासं कुर्वन्तौ तत्र दम्पती आगतौ। समुद्रतटे अटन्तः केचन जनाः अपि कोलाहलं श्रुत्वा उपस्थिताः अभवन्। मारवाडीजनस्य पत्नी उक्तवती- "एतस्य अन्वेषणा क्रियताम्" इति।

रामुः अपृच्छत्- "किमर्थम्? अहं किं कृतवान्?" इति।

"त्वं धनम् अचोरयः"।

"धनम्? उन्मत्ता जाता किम्? अहं चोरः न अस्मि" इति उक्त्वा सः स्वस्मिन् वचने दृढः जातः।

जनाः तस्य कोषान् परिशीलितवन्तः। तस्य कोषतः द्वाविंशतिः रूप्यकाणि निष्कासितानि। अन्वेषणां कृतवान् जनः महिलां पृष्टवान्- "स्यूते कति रूप्यकाणि आसन्?" इति।

सा महिला स्यूतं पश्यन्ती अवदत्- "षट्शताधिकानि आसन्" इति।

"एतस्य पार्श्वे तावत् धनं नास्ति"।

"तर्हि, एषः तत् धनं क्षिप्तवान् स्यात्"।

"मदीयं वचनं श्रूयताम्। तत् धनम् अहं न स्वीकृतवान्" इति पुनः रामुः अवदत्।

"तर्हि, त्वं किमर्थं अधावः?"

"मम गृहस्मरणं जातम् आसीत्। अहं लोकयानेन शीघ्रं गृहं गन्तुं धावितवान् आसम्। भवतां मुखात् 'चोरः - चोरः' इति शब्दं श्रुत्वा अहं स्थितवान् अस्मि"।

समुद्रतटे अटितुम् आगताः अन्येऽपि जनाः सुष्ठुरूपेण अन्वेषणां कृतवन्तः। किन्तु रामोः समीपे तावत् धनं न प्राप्तम्। अतः ते रामुं मोचितवन्तः। रामुः टैक्सीयानेन वासस्थलं प्रति प्रस्थितः।

८

तदा आरभ्य रामुशरणयोः मध्ये सामञ्जस्यं प्रवृद्धम्। यः कोऽपि यावत् धनं चोरयित्वा आनयति स्म, तस्मात् अर्धं विभज्य परस्परं स्वीकुरुतः स्म। तौ युगपत् खादन्तौ अटन्तौ चलच्चित्रं पश्यन्तौ च कालं यापयतः स्म। एवम्प्रकारेण रामोः जीवनं सुखमयं जातम्। रामुः शरणः च उभौ अपि पृथक् वासं कुरुतः स्म। शरणः धर्मशालायां

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रामुः च कस्याञ्चित् पथिशालायां वसति स्म। उभौ सायं प्रातः च मेलनं कुरुतः स्म। कदाचित् मिलित्वा कदाचित् च पृथक् कार्यं कुरुतः स्म। शरणः मद्यपाने अभ्यस्तः आसीत्। रामुः एतावत् पर्यन्तं मद्यपानात् रक्षितः आसीत्। किन्तु डयमानस्य पक्षिणः इव तस्य अपि पक्षद्वयम् जातम् आसीत्। न्यायविरुद्धेन कार्येण प्राप्यमाणस्य धनस्य एवम् एव असमीचीनकार्येषु व्ययः भवति।

'अहं सियालकोटस्य पदार्थविक्रेतॄणां प्रतिनिधिः अस्मि। तेषां परतया एव कार्यार्थं प्रतिदिनं मया विपणिं प्रति गन्तव्यं भवति' इति रामुः विश्रामस्थले सूचितवान् आसीत्। इत्थं तस्य कार्यम् अनुवर्तते स्म। तस्य पार्श्वे द्विसहस्राधिकानि रूप्यकाणि सङ्गृहीतानि जातानि। कदाचित् सः चिन्तयति स्म- 'एतावत् धनं सियालकोटं नीत्वा किञ्चित् लघुं वाणिज्यं कुर्याम्। स्वस्य जीविकोपार्जनं कुर्वन् मातुः अपि सेवां कुर्याम्' इति। किन्तु इतोऽपि किञ्चित् धनं सङ्गृहीतं भवतु इति इच्छया तत्रैव वासं कुर्वन् आसीत्।

एकदा शरणः तस्य समीपम् आगतः। प्रकोष्ठस्य द्वारं पिधाय- "वयं किञ्चन सङ्कटयुक्तं साहसमयं च कार्यं कर्तुं निश्चितवन्तः स्मः। अहम् इच्छामि यत् त्वम् अपि अस्मिन् कार्ये साहाय्यं कुरु" इति रामुम् अवदत्।

"कीदृशं कार्यम् अस्ति?"

"एकलक्षं दशसहस्रं रूप्यकाणि रेलवेविभागस्य वित्तकोषे न्यस्तुं नीयमानानि सन्ति। रूप्यकाणां पेटिका विक्टोरियास्थानके अवतरिष्यति। सर्वकारीयं भारवाहकं तां नेतुम् आगमिष्यति। वयम् एतत् धनं स्वायत्तीकर्तुम् इच्छामः"।

"एतत् कथं शक्यते?"

"वयं पञ्चजनाः भारवाहस्य समवस्त्रं धृत्वा स्थानकं गमिष्यामः। तत्रत्यः भारवाहानां नायकः अस्मान् धनपेटिकां वोढुं नियोजयिष्यति। वयं धनपेटिकां वहन्तः तस्मिन् भारवाहके स्थापयिष्यामः यत् भारवाहकं अस्मत्सु कश्चन चालयेत्। सर्वकारीयं भारवाहकं यथा विलम्बेन तत्र प्राप्येत तथा व्यवस्था अस्माभिः कृता अस्ति। अस्माकं भारवाहकं छद्मवेशिनाम् आरक्षकाणां नेतृत्वे वित्तकोषगमनम् अकृत्वा विपरीतदिशि त्रिंशत्मीलमितं दूरं गमिष्यति। तत्र वयं रूप्यकाणां परस्परं विभजनं करिष्यामः"।

"योजना तु अतीव उत्तमा अस्ति"।

"एषा सफला अपि भविष्यति। एतस्याः योजनायाः सर्वविधं प्रबन्धनं पीरुः नामकः अस्माकं शिक्षकः कुर्वन् अस्ति। रेलस्थानके पञ्चसु भारवाहेषु त्वम् अपि अन्यतमः भविष्यसि। भारवाहकस्य गमनानन्तरं वयम् अपि रेलयानेन गन्तव्यं स्थानं प्रति प्राप्स्यामः"।

Funding by IKS-MoE

सर्वं निश्चितं जातम्। रामुः शरणः च विश्रामगृहतः बहिः आगत्य रेलस्थानके

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भारवाहानां समवस्त्रं धर्तुं तत्रत्यं विद्यमानं प्रकोष्ठं प्रविष्टवन्तौ। तयोः त्रयः सहभागिनः प्राक् एव तत्र प्रतीक्षमाणाः आसन्। भारवाहानां नायकः तेभ्यः समवस्त्राणि तथा च भारवाहसंख्याः दत्तवान्। सर्वे समवस्त्रं धृत्वा स्थानके उपस्थिताः अभवन्। रेलयानम् आगतम्। भारवाहनायकः रेलविभागस्य अधिकारिणः स्वीकृतिं प्राप्य शरणम् इत्यादीन् भारवाहान् ततः वस्तूनि अवतारयितुम् उक्तवान्। धनपेटिका अधः आगता। द्वयोः आरक्षकयोः नेतृत्वे सा पेटिका भारवाहके आरोपिता जाता। यदा उभौ आरक्षकौ भारवाहकम् आरोढुम् इच्छतः स्म तदा चालकः अवदत्- "किञ्चित् दूरम् अपसरतम्। यानं पृष्ठतः कृत्वा पुरतः चालयितुं सम्यक् करोमि" इति। आरक्षकौ किञ्चित् पार्श्वे एव स्थितवन्तौ। तावता एव चालकः यानं पृष्ठतः करणस्य स्थाने महता वेगेन अग्रे एव नीतवान्। भारवाहके पूर्वतः एव त्रयः कृतकाः आरक्षकाः उपविष्टाः आसन्। आरक्षकालयतः आगताः आरक्षकाः परस्परम् आश्चर्येण मुखं पश्यन्तः आसन्।

वित्तकोशे धनं प्रापयितुं यस्य रेलप्रमुखस्य दायित्त्वम् आसीत् सः व्याकुलः जातः। निमेषद्वयं यावत् सः भारवाहकस्य प्रत्यागमनाय प्रतीक्षाम् अपि कृतवान्। तस्य अनागमनेन सः स्थानकप्रमुखस्य प्रकोष्ठं गत्वा एतस्याः अपहरणघटनायाः विषये दूरवाणीद्वारा वित्तकोशे सूचनां दातुम् अवदत्।

स्थानकप्रमुखः अपि एतं विषयं ज्ञात्वा व्याकुलः जातः। सः वित्तकोषे दूरवाणीद्वारा सूचितवान्। वित्तकोषेण सूचितं यत् 'भारवाहकं तु वित्तकोषस्य पुरतः एव स्थितम् अस्ति। तस्य चक्रतः वायुः निर्गतः अस्ति। इदानीं समीक्रियमाणम् अस्ति' इति। एतत् श्रुत्वा रेलप्रमुखस्य पदतले भूमिकम्पनम् इव जातम्। ततः स्थानकप्रमुखः आरक्षकालये दूरवाणीं कृतवान्। तत्र दूरवाणीद्वारा प्रवृत्तं सर्वं बोधयितुम् अधिकः एव कालः अपेक्षितः जातः। यदा आरक्षकालयप्रमुखः प्रवृत्तं सर्वं ज्ञातवान् तदा सः उक्तवान्- "अहम् आरक्षकान् अपहृतस्य भारवाहकस्य पृष्ठतः प्रेषयामि, किन्तु सद्यः एव रेलप्रमुखः अत्र आगत्य प्रवृत्तस्य सूचनां लेखयेत्" इति।

रेलप्रमुखः विक्टोरियारेलयानेन आरक्षकालयं प्राप्तवान्। रामुः तथा च अन्ये सहभागिनः भारवाहप्रकोष्ठं गत्वा समवस्त्रं परिवर्त्य स्थानकम् आगत्य सबर्बनरेलयाने उपविश्य थाणेस्थानकं प्राप्तवन्तः। ततः शरणः सर्वान् सहभागिनः कस्यचित् गृहं नीतवान्। तत्र अनुमतिं प्राप्य गृहस्य अन्तः प्रविष्टवन्तः। पूर्वमेव तद्गृहं प्राप्तवद्भिः जनैः धनपेटिकातः धनं निष्कास्य गणना क्रियमाणा आसीत्। सहस्ररूप्यकाणां बहवः बन्धाः आसन्। किञ्चित् परीवर्तः अपि आसीत्। आहत्य धनपेटिकातः एकलक्षं दशसहस्रं पञ्चशतं विंशतिः रूप्यकाणि षट्त्रिंशत् पैसाः प्राप्ताः।

कश्चन प्रौढवयस्कः जनः यस्य एकं नेत्रं न आसीत्, सः अपि तत्र उपस्थितेषु

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पञ्चजनेषु अन्यतमः। एतेषु एकः चालकः अपि आसीत्। चत्वारः छद्मवेषिणः आरक्षकाः आसन्। तदा काणः अवदत्- "एते बालाः तु आगताः, किन्तु भारवाहकनायकः वित्तकोषस्य त्रयः अधिकारणः चापि अत्र उपस्थिताः भवेयुः। ते आगमिष्यन्ति उत न?" इति।

तत्क्षणम् एव भारवाहनायकः उपस्थितः जातः। तेन सह गुजरातीशैल्या वस्त्रं धृतवान् कश्चन पुरुषः अपि आसीत्। भारवाहकप्रमुखः आगत्य अनुक्षणम् अवदत्- "गुरो! एषः वित्तकोषस्य अधिकारिणां प्रतिनिधिः अस्ति। तेभ्यः अधिकारिभ्यः दीयमानः भागः एतस्मै दातव्यः। अधिकारिणः आगन्तुं न शक्नुवन्ति, यतः वित्तकोषे प्रवृत्तायाः घटनायाः विचारणा आरब्धा अस्ति" इति।

सः काणः जनः यस्य नाम पीरुः आसीत्, क्षणं यावत् विस्मयेन तं गुजरातीमहाशयं पश्यन् आसीत्। ततः सः भारवाहनायकम् अपृच्छत्- "एषः स्वस्य कूटसंख्याम् उक्तवान् किम्?"

"आम्, गुरो"!

"समीचीनम्! तर्हि त्रयः अधिकारिणः प्रत्येकं पञ्चदशसहस्रं प्राप्स्यन्ति। छद्मवेशधारिणां चतुर्णाम् आरक्षकाणां कृते दश-दशसहस्रम्। पञ्चशतं चालकस्य कृते। भारवाहत्वेन कार्यं कृतवन्तः प्रत्येकं त्रिसहस्रं प्राप्स्यति। अहं द्विसहस्रं स्वीकरोमि। वदन्तु, कस्यचित् अपि एतस्मिन् विभजने आपत्तिः अस्ति?" इति। पीरोः एतत् एव चातुर्यम् अस्ति यत् तस्य विभजनसन्दर्भे कस्यचित् अपि आपत्तिः न भवति स्म। सर्वे प्रसन्नाः आसन्। सर्वं धनं वितीर्णम्। 'सर्वे धनं गोपयित्वा अहमहमिकया इतः प्रस्थानं कुर्युः' इति पीरुः स्थितान् सर्वान् आदिशत्।

सर्वे ततः प्रस्थिताः। रामोः पर्यायः अन्ते आसीत्। तत् गृहं पीरोः एव आसीत्। तावता एव द्वारपालः आगत्य "द्वौ जनौ बहिः स्थितौ स्तः। एवं भाति यत् तौ गुप्तविभागस्य आरक्षकौ स्तः" इति पीरुम् असूचयत्।

पीरुः किञ्चित् विचिन्त्य रामोः स्कन्धे हस्तं निधाय अवदत्- "शृणु रे बालक! अहं त्वयि विश्वसिमि। त्वं मदीयम् अपि धनम् इतः नय। गृहस्य छदितः कूर्दित्वा अपरस्मात् गृहात् निर्गच्छ। एषः द्वारपालः त्वां निर्गमनमार्गं दर्शयिष्यति। श्वः अहं मम धनं स्वीकर्तुम् आगमिष्यामि। दास्यसि खलु?" इति।

"गुरो! निश्चिन्तः भवतु। स्वस्य जनस्य कृते कापट्यं न आचर्यते मया"।

रामुः गृहछदितः कूर्दित्वा अपरं गृहं गतवान्। ततः वीथीमार्गेण अग्रे प्रस्थितवान्।

रामुः वीथीमार्गतः निर्गत्य रेलस्थानकं प्रति प्रस्थितः। स्थानकं प्राप्य तेन अनुभूतं 'मम कोऽपि अनुसरणं कुर्वन् अस्ति' इति। अनुसरणकर्ता तं वक्रदृष्ट्या पश्यन् आसीत्। एतेन रामोः सन्देहः जातः। किन्तु एतत् विचिन्त्य शान्तः आसीत् 'अहं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मुम्बयीनगरं गत्वा जनसम्मर्दे अन्तर्हितः भविष्यामि' इति।

यदा सः रेलयाने उपविष्टः तदा तस्य पार्श्वे अनुसरणकर्ता अपि उपाविशत्। इदानीम् अपि रामुः चिन्तयति- 'अहम् एतं वञ्चयित्वा निर्गन्तुं शक्नोमि' इति। अतः सः शान्तः आसीत्। तस्य अनुसरणं कृतवान् जनः अपि मौनेन उपविष्टः आसीत्। आगामिस्थानके द्वौ जनौ इतोऽपि रेलयानम् आरुह्य रामोः पार्श्वभागे उपविष्टवन्तौ। विक्टोरियास्थानके रामुः अवतीर्णवान्। अनुसरणकर्तारः अपि तस्य पृष्ठतः आगच्छन्तः आसन्। रामुः चिन्तितवान्- 'अद्य अहम् एतैः गृहीतः भविष्यामि' इति। किन्तु पुनः सः अचिन्तयत्- 'इदानीम् एतेषां मयि सन्देहः एव अस्ति। नोचेत् एतावता एव मां ग्रहीतुम् अशक्ष्यन्। एवं भासते यत् एते मम निवासस्थानं गन्तुम् इच्छन्ति। एतस्मात् कारणात् मम अनुसरणं कुर्वन्तः सन्ति' इति। विश्रामस्थलस्य प्राप्तेः पूर्वम् एव एते वञ्चनीयाः इति रामोः मनः चिन्तयति स्म। इदानीं सः एतद् अपि निश्चितवान्- 'यदि अहं सुरक्षितः भवेयं तर्हि अनुक्षणं सियालकोटं गत्वा प्राप्तेन धनेन उत्तमं वाणिज्यं कर्तुं शक्नुयाम्' इति।

रामुः स्थानकात् बहिः आगत्य पद्भ्याम् एव गच्छन् आसीत्। स्वस्य विश्रामस्थलम् अगत्वा सः ताजविश्रामस्थलं गच्छन् आसीत्। तत्र सः द्वित्रवारं पूर्वं चायं पीतवान् आसीत्। तस्मात् निर्भयं तस्य अन्तः प्रविष्टः। अनुसरणकर्तारः किञ्चित् बहिः एव प्रतीक्षां कृत्वा अन्तः प्रविष्टवन्तः। रामुः तत्र अल्पाहारप्रकोष्ठं गतवान्। तत्र द्विशताधिकाः जनाः अल्पाहारं कुर्वन्तः आसन्। रामुः तेषां पार्श्वभागतः बृहद्कक्षम् अतिक्रम्य अपरस्मात् द्वारात् बहिः निर्गतः। अनुसरणकर्तारः अल्पाहारप्रकोष्ठं प्रवेष्टुं सङ्कोचं कुर्वाणाः आसन्। तेषां चिन्तनम् आसीत्- 'रामुः तत्र उपविश्य चायं पिबेत्। तदनन्तरं चिन्तयिष्यामः यत् अग्रे किं करणीयम्' इति। सभागारात् बहिः गच्छन्तं रामुं दृष्ट्वा ते अपि भवनं परिभ्रम्य तं ग्रहीतुं ततः धाविताः।

रामुः तेषाम् एतादृशस्य एव आचरणस्य आशां करोति स्म। तस्मात् सः पुनः अन्यस्मात् द्वारात् प्रविश्य समयं यापयितुं स्वागतप्रकोष्ठस्य पुरतः विद्यमानं प्रकोष्ठं प्रविष्टवान्। प्रकोष्ठः रिक्तः आसीत्। तत्र सः मञ्चस्य अधः प्रविश्य उत्तानमुखः सन् शयितवान्।

अनुसरणकर्तारः इतस्ततः रामुम् अन्विष्यन्तः आसन्। अन्वेषणां कुर्वतः तान् दृष्ट्वा कस्यचित् ताजकर्मचारिणः मनसि सन्देहः जातः। सः तान् प्रबन्धकस्य समीपं नीतवान्। तेषु कश्चन प्रबन्धकम् उक्तवान्- "अहं गुप्तविभागस्य आरक्षकः अस्मि। कस्यचन चोरस्य अन्वेषणां कुर्वन्तः वयम् अत्र आगताः। वयं तम् एव अन्विष्यामः" इति।

Funding by IKS-MoE

"तं ग्रहीतुम् अधिपत्रम् अस्ति किम्?"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"नैव"।

"तर्हि बहिः एव निर्गत्य द्वारसमीपं प्रतीक्षां कुरुत। यदा सः निर्गमिष्यति तदा तं गृह्णीत"।

आरक्षकः किमपि वक्तुम् इच्छति स्म। किन्तु प्रबन्धकः कश्चन ब्रिटिशजनः आसीत्। सः उक्तवान्- "अहं किमपि श्रोतुम् न इच्छामि। इतः बहिः गच्छत"।

आरक्षकाः तत्क्षणम् एव बहिः आगत्य ताजगृहं परिवार्य स्थितवन्तः।

६

मञ्चस्य अधः शयितस्य रामोः मनसि एवं निश्चयः जातः- 'मम इतः निर्गमनम् अशक्यम् अस्ति। मम कोषे यत् धनम् अस्ति तत् किं प्रक्षिप्य इतः धावनीयम्? तथापि यदि गृहीतः भवेयं तथा च एतस्य प्रकोष्ठस्य निवासी प्रबन्धकाय क्षिप्तं धनं दद्यात् तर्हि मम रक्षणम् अशक्यम् एव स्यात्' इति।

चोरकार्यं प्रति तस्य मनसि जुगुप्साभावः उत्पन्नः। पश्चात्तापः अपि तेन अनुभूतः।

प्रकोष्ठस्य स्वामी चिरं यावत् प्रकोष्ठं न आगतः। अन्धकारः प्रसृतः आसीत्। रामुः शयनं कुर्वन् निद्राणवान्। मध्यरात्रे तस्य निद्राभङ्गः जातः। प्रकोष्ठः प्रकाशयुक्तः जातः आसीत्। चिन्तितः परिणामः यदा तेन स्मृतः तदा किं करणीयम् इति विचारः समुद्भूतः। सः इतोऽपि अवनम्य अपश्यत्। कश्चन दर्पणस्य पुरतः स्थित्वा वस्त्रपरिवर्तनं कुर्वन् आसीत्। रामोः मनसि कश्चन उपायः स्फुरितः। सः कोशतः धनं निष्कास्य मञ्चस्य अधः एव राशिरूपेण स्थापितवान्। ततः मञ्चतः बहिः आग स्थितः अभवत्। तावता एव वस्त्रपरिवर्तनं कृतवान् जनः तं निर्निमेषदृष्ट्या दर्पणे तस्य प्रतिबिम्बम् अपश्यत्। रामुः तम् अभिज्ञातवान्। 'एषः सः एव कृष्णकञ्चुकधारकः अस्ति यस्य धनस्यूतं प्रयाणचिटिकां च अहं लाहौरस्थानके चोरितवान् आसम्' इति सः अचिन्तयत्। कृष्णकञ्चुकधारी- "त्वं कः असि?" इति साश्चर्यं पृष्टवान्।

"कश्चन भाग्यहीनः"।

"कः अभिप्रायः?"

"आरक्षकभयात् पलायनं कृतवान् चोरः"।

सः ध्यानेन रामोः मुखं पश्यन् आसीत्। रामुः भीतः आसीत्। सः चिन्तयति स्म- 'कदाचित् कृष्णकञ्चुकधारी आरक्षकम् आहूय मां तस्मै अर्पयेत्' इति। सः किमपि वदेत् तस्मात् पूर्वं रामुः एव- "अहम् इच्छामि यत् भवान् मां रक्षेत्। आरक्षकाय मां न समर्पयेत् च" इति तम् अवदत्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"किमर्थम्?"

"मया कश्चन महान् अपराधः न कृतः"।

सः पुरुषः स्मितं कुर्वन् मञ्चे उपविश्य रामोः नेत्रयोः पश्यन्- "त्वं कीदृशं स्वल्पम् अपराधम् अकरोः?" इति पृष्टवान्।

महतः स्वल्पस्य च अपराधस्य भेदं वक्तुम् असमर्थः रामुः मन्दहासम् अकरोत्। तथापि किमपि वक्तुम् इच्छन्- "यदा अहं कमपि पश्यामि तदा चिन्तयामि 'यथा अन्ये मोटरयानेन भ्रमन्ति, विमानेन प्रयाणं कुर्वन्ति, रुचिकरं भोजनं कुर्वन्ति च तथैव अहम् अपि एतत् सर्वं कुर्याम्। यथा ते तल्पमये सुखासने उपविशन्ति तथैव अहम् अपि उपविशेयम्। किन्तु एतत् सर्वं धनेन विना तु न सिद्ध्यति, अतः यत्र धनं पश्यामि ततः स्वीकरोमि" इति अवदत्।

एतादृशीं विवरणशैलीं शरणः तम् बोधितवान् आसीत्।

रामुः स्वकथनम् अनुवर्तयन्- "संसारे सर्वे एवम् एव व्यवहरन्ति। संसारे पञ्चाशत् प्रतिशतं जनाः अन्यैः अर्जितं
धनम् एव उपयुञ्जते। किमर्थम् इत्युक्ते, धनार्जनं कृतवन्तः जनाः धनस्य उपयोगं कर्तुम् एव न जानन्ति। अतः एव अन्ये जनाः तेषाम् असावधानतायाः लाभं स्वीकृत्य स्वस्य प्रयोगे आनयन्ति" इति अवदत्।

यस्य मुखे इदानीं श्मश्रु अपि न आगतं तस्य बालकस्य एतादृशीं विवरणशैलीं श्रुत्वा प्रकोष्ठस्वामी आश्चर्य चकितः जातः। सः अवदत्- "पश्य, अहं त्वां रक्षिष्यामि। किन्तु पूर्वं प्रवृत्तं सर्वं कथय। त्वं किम् अपराधम् अकरोः? येन आरक्षकाः त्वां ग्रहीतुम् इच्छन्ति" इति।

रामुः सर्वकारीयस्य धनस्य लुण्ठनविषयकं सर्वं वृत्तान्तं तस्मै न्यवेदयत्।

"त्वं सर्वकारीयं धनं लुण्ठयित्वा उत्तमं कार्यं न अकरोः"।

"अहं मम मनोगतं सर्वं विषयं भवते निवेदितवान्। मदीयं मनः अपि सुखं प्राप्तुम् इच्छति। तदर्थम् एव कुतश्चित् अपि धनसङ्ग्रहणं करोमि"।

"किन्तु परिश्रमेण विना धनं स्वीकरणीयम्?"

"परिश्रमं तु कृतवान्। अद्य प्रातः आरभ्य एव धावनं करोमि"।

"परिश्रमः नाम योग्यतायाः वर्धनम् इति मम अभिप्रायः अस्ति"।

"योग्यतायाः वर्धनं कथं करणीयम् इति अहं न जानामि"।

"तव पिता कुत्र वसति?"

"सः नास्ति। सः दिवङ्गतः"।

"त्वं किमपि पठितवान् आसीः?"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"सप्तमकक्षां यावत्। माता निर्धना अस्ति। अहम् इतोऽपि अधिकं पठितुं न शक्तवान्"।

रामोः एतत् वचनं श्रुत्वा तस्य पुरुषस्य मनः नितरां खिन्नं जातम्। सः गभीरं विचारं कुर्वन् आसीत्- 'एषः बालकः कियता प्रमाणेन सत्यस्य प्रतिपादनं सरलैः शब्दैः करोति। अस्य बालस्य मनः डयितुम् इच्छति। किन्तु डयनार्थं पक्षौ एव न स्तः' इति। मौनम् आश्रितवन्तं तं पुरुषं दृष्ट्वा रामोः विश्वासः जातः- 'प्रायशः अहं रक्षितः भवेयम्' इति। ततः सः विनम्रतया- "अहं भवन्तम् इतः पूर्वं दृष्टवान् अस्मि" इति उक्तवान्।

"कुत्र?"

"लाहौरनगरे। विश्रामस्थलस्वामीतः ऋणरूपेण धनस्वीकरणसमये"।

"तदा मम वस्तूनि चोरितानि आसन्"।

"अहं जानामि। चोरितानि न जातानि। लाहौरस्थानके भवतः कोशतः धनस्यूतः पतितः जातः आसीत्। तस्मिन् स्यूते मुम्बयीनगरं प्रति आगमनस्य प्रयाणचिटिका अपि आसीत्"।

"त्वम् एतत् सर्वं कथं जानासि?

"तस्मिन् स्यूते चतुश्शतं विंशतिः रूप्यकाणि अपि आसन्। सः स्यूतः मया भूमौ दृष्टः"।

"त्वं मह्यं किमर्थं न प्रत्यर्पितवान्?"

"मह्यम् अपि धनम् आवश्यकम् आसीत्। अतः लब्धं धनं स्वस्य समीपम् एव स्थापितम्"।

"एतत् अनुचितम्। त्वं परिश्रमेण विना एव अन्यस्य धनं प्राप्नोः। एतत् तु पापम् अस्ति"।

"पापं पुण्यं च अहं न जानामि। अहं अन्यप्रकारेण धनार्जनस्य कौशलम् अपि न जानामि। यदि अहम् एवं न अकरिष्यं तर्हि बुभुक्षितः सन् अमरिष्यम्"।

"किन्तु, अद्य त्वं दिने एव लुण्ठनम् अकरोः। एतत् कथं विस्मर्तुं शक्यते"।

रामुः पुनः शरणेन पूर्वं उक्तानि वचनानि एव उक्तवान्- "प्रायशः मुम्बयीनगरस्य हर्म्याणि सन्दिग्धकर्मकर्तृणाम् एव सन्ति। अपरत्र श्रमिकाः अत्र निर्धनतया जीवनं यापयन्ति। एतत् किं पुण्यकर्म? सन्दिग्धकार्यकरणं तु लुण्ठनस्य अपेक्षया अपि पापतरं कार्यं खलु?"

"पश्य, एतं विषयं त्वम् अल्पे एव वयसि स्वल्पशिक्षया अवगन्तुं न शक्नोषि। यदि त्वं मम वचनं पालयेः तर्हि अहं त्वाम् एतस्याः विपत्तेः जालात् मोचयितुं शक्नोमि। तथा च त्वां धनस्य सम्पादनार्थं युक्तिम् अपि वदिष्यामि"।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"किमर्थं न पालयेयम्। अहं भवति विश्वसिमि। यः पुरुषः द्वित्रमासात् पूर्वम् इन्द्रजालक्रीडां प्रदर्श्य आजीविकां निर्वहति स्म, सः अद्य एतावत्याः सम्पत्तेः स्वामी अस्ति। एतादृशं चमत्कारं दृष्ट्वा अहम् अवगच्छन् अस्मि यदि भवान् इच्छां कुर्यात् तर्हि माम् अपि धनिकं कारयेत्"।

सः पुरुषः स्मितम् अकरोत्। पुरतः स्थितं रामुं किञ्चित्कालं दृष्ट्वा उक्तवान्- "समीचीनम्। अहं तव साहाय्यं करिष्यामि। तथापि समीचीनम् असमीचीनं वा मार्गं गन्तुं तव स्वातन्त्र्यं भविष्यति। त्वम् इदानीम् आरभ्य मदीयः शिष्यः जातः असि। मम नाम जगदीशचन्द्रः। किन्तु त्वं मां 'गुरुदेव' इत्येव सम्बोधय। अहं यत् कथयिष्यामि तत् त्वम् अङ्गीकुर्याः। अस्तु, तव नाम किम्?" इति।

"रामदासः! किन्तु सर्वे मां रामु इति सम्बोधयन्ति। मह्यम् एतत् सम्बोधनं भृशं रोचते"।

"अस्तु रामो, त्वया चोरितं धनं कुत्र अस्ति?"

रामुः मञ्चस्य अधः प्रविश्य रूप्यकाणां बन्धम् आनीतवान्।

जगदीशचन्द्रः अपृच्छत्- "कति सन्ति?" इति।

"एतेषु सहस्रद्वयं पीरोः अस्ति। सहस्रत्रयं मम अस्ति"।

"एतत् सर्वं श्वः पर्यन्तं तव समीपे न भवेत्। त्वम् एतत् स्वस्य पार्श्वे स्थापयित्वा मम शिष्यः भवितुं न अर्हसि"।

"किमर्थम्?"

"एतानि रुप्यकाणि अन्येषाम् अनिच्छया प्राप्तानि सन्ति। अतः पापधनम् एतत्। एतस्य पार्श्वे स्थापनेन मनः मलिनं भविष्यति। मलिनेन मनसा त्वं मम वचनं पालयितुं न अर्हसि"।

"तर्हि एतानि रूप्यकाणि कुत्र क्षिपानि?"

"अहं वदिष्यामि। अधुना त्वम् एतत् धनं तस्याः उत्पीठिकायाः निधानिकायां स्थापय" इति उत्पीठिकां प्रति अङ्गुल्या सङ्केतम् अकरोत् जगदीशचन्द्रः।

रामुः यदा धनम् अस्थापयत् तदा जगदीशचन्द्रः- "त्वं प्रकोष्ठात् बहिः भूमौ निद्रां कुरु। प्रातःकाले तव उत्थानात् पूर्वम् उत स्नानात् पूर्वं नूतनं वस्त्रं तव कृते निर्मितं भविष्यति। तेन कोऽपि त्वाम् अभिज्ञातुं न शक्नुयात्" इति तम् अवदत्।

१०

रामुः एतत् दृष्ट्वा विस्मितः जातः यत् तस्य उत्थानात् पूर्वम् एव तस्य कृते नूतनं वस्त्रं सुसज्जितम् आसीत्। यदा सः शौचादिकर्म समाप्य सिद्धः जातः तदा सेवकैः ध्रियमाणं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समवस्त्रं तस्य कृते सज्जम् आसीत्। सः गुरुदेवम् अपृच्छत्- "एतत् कदा निर्मितम्? मम शरीरस्य मापनं तु न जातम्। कदाचित् बहु दृढं शिथिलं वा भवेत् खलु?" इति।

"धृत्वा पश्य"!

रामुः वस्त्रं धृतवान्। वस्त्रं तु सेवकशैल्या एव निर्मितम् आसीत्। तथापि स्वच्छं, तस्य शरीरानुसारम् एव आसीत्। एतावत्पर्यन्तं भीतः रामुः 'अहं रक्षितः एव भवेयम्' इति विश्वस्तमनः जातः। सः समवस्त्रं धृत्वा- "गुरुदेव मया किं कार्यं करणीयम्?" इति अपृच्छत्।

"कतिचन दिनानि, यावत्पर्यन्तं पठनलेखनयोः सम्यक् अभ्यासः न भवति तावत् मम सेवकरूपेण एव कार्यं करिष्यसि। तत्पश्चात् यदि पठने त्वं दत्तचित्तः भवेः तर्हि शिष्यरूपेण प्रथितः भविष्यसि। शिष्यत्वसम्पादनाय मासत्रयम् एव आवश्यकम्। तदनन्तरं मम इन्द्रजालविद्याम् अवगन्तुं दशवर्षाणि अपेक्षन्ते। दशवर्षाणां पश्चात् त्वं मम सहभागी भविष्यसि। ततः त्वं न सेवकः न वा शिष्यः ....

"इदानीं त्वं सज्जो भव। यावत् अहम् अल्पाहारं करोमि तावत् मम आसन्दस्य पृष्ठतः एव स्थितो भव। तत्पश्चात् त्वम् अपि अहम् इव अल्पाहारं कुर्याः। यदा अहम् अटितुं गमिष्यामि तदा त्वम् अपि मया सह गच्छेः। अद्य सायङ्काले अत्र सभागारे अहम् इन्द्रजालक्रीडायाः कौशलं दर्शयिष्यामि, तदा मम कथनानुगुणम् त्वं कार्यं कुर्याः"।

"बहिः स्थिताः आरक्षकाः मां ग्रहीतुं प्रयत्नं न करिष्यन्ति किम्?"

"ते तु त्वाम् अभिज्ञातुम् एव न शक्नुवन्ति"।

"एतस्य समवस्त्रस्य कारणतः?"

"नैव! अत्र किमपि विशेषं रहस्यम् अस्ति। त्वं भयं मा कुरु। संसारे केचन तादृशाः विषयाः भवन्ति येषां बोधः मानवानां न भवति। त्वम् एतत् अवगच्छ यत् किञ्चित् विषयं लक्ष्यीकर्तुं यत्नस्य आवश्यकता भवति। सः यत्नः यथार्थं सम्यक् प्रकारेण च भवेत्। चिन्तनं कुरु, त्वं किञ्चन गृहं निर्मितवान् असि। तत्र सुखोपेतानि सर्वाणि वस्तूनि तव द्वारा स्थापितानि सन्ति। यदि कोऽपि अन्यः, यः तव अपेक्षया अधिकः बलवान् अथवा चतुरः अस्ति सः त्वां गृहात् निष्कास्य स्वयं सुखस्य उपभोगं कुर्यात् तर्हि किं दुःखम् न अनुभविष्यसि? एवमेव तव अनुचितैः व्यवहारैः अपि अन्येषां कष्टं भवेत्। अतः अन्यस्मै दुःखजननं नाम पापतरं कार्यम्"।

यदा वितारकः अल्पाहारम् आनीतवान् तदा रामुः जगदीशचन्द्रस्य कथनानुसारं तस्य पृष्ठतः स्थितः अभवत्। कण्टकछुरिकाभ्यां चमसाभ्यां खादन्तं जगदीशचन्द्रं दृष्ट्वा सः विस्मितः जातः। इतः पूर्वं सः एवं खादन्तं कमपि न दृष्टवान् आसीत्।

रामोः कृते अपि अल्पाहारम् आनेतुं जगदीशचन्द्रेण वितारकः आदिष्टः। रामुः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपि अल्पाहारम् अकरोत्। एतादृशम् अल्पाहारं सः इतः पूर्वं कुत्रापि न कृतवान् आसीत्।

तदनन्तरं जगदीशचन्द्रः चौर्येण प्राप्तस्य धनस्य एकं बन्धं निर्माय तदुपरि बङ्गालवित्तकोषस्य सङ्केतम् अलिखत्। ततः सः प्रकोष्ठतः एव दूरभाषं कृत्वा टैक्सीयानम् आनायितवान्। तथा च बन्धं स्वीकुर्वता रामुणा सह विश्रामगृहतः बहिः आगतः। टैक्सीयानं तत्र स्थितम् आसीत्।

ताजविश्रामगृहस्य मुख्ये द्वारे गुप्तविभागस्य आरक्षकाः स्थिताः आसन्। रामुः तेषु स्थितेषु कञ्चित् आरक्षकम् अभिज्ञातवान्। सः एव थाणेस्थानकतः अत्रपर्यन्तम् अनुसरन् आसीत्। रामोः भयम् आसीत् यत् कदाचित् तेन सः अभिज्ञायेत। किन्तु आरक्षकाः जगदीशचन्द्रम् एव सकृत् अपश्यन्। रामुं तु कोऽपि न दृष्टवान्।

एतेन रामोः साहसं द्विगुणितं जातम्। उभौ टैक्सीयाने उपविष्टवन्तौ। जगदीशचन्द्रः टैक्सीचालकं जुहूस्थानं गन्तुम् आदिष्टवान्। टैक्सीयानं प्रस्थितम्। तत् मुम्बयीनगरस्य विपणीषु विद्यमानं जनसम्मर्दम् अतिक्रम्य बहु दूरं गतम्। जुहूसमुद्रतटे तत् यानं स्थितं जातम्। उभौ अपि समुद्रतटे अटितुम् यानतः अवतीर्णवन्तौ।

इदानीम् अपि केचन जनाः महिलाः पुरुषाः च समुद्रे स्नानं कुर्वन्ति स्म। रामुः रूप्यकाणां बन्धं हस्ते स्थापयित्वा अटन् एव- "गुरुदेव! यः आरक्षकः ह्यः विंशतिमीलमितात् दूरात् माम् अनुसरति स्म सः अद्य माम् अभिज्ञातुम् एव न शक्तवान्?" इति अपृच्छत्।

"अहं तु पूर्वम् एव त्वाम् उक्तवान् आसम्"।

"एषः तु चमत्कारः एव जातः। अधुना एतस्य बन्धस्य किं करवाव?"

"एषः बन्धः यस्य कस्यचित् स्यात्, अहं तस्य पार्श्वे पत्रालयद्वारा प्रेषयिष्यामि"।

"एवं करणेन आवयोः सङ्केतः अपि ज्ञातः स्यात्"।

"यस्य एषः बन्धः अस्ति तस्य समीपे प्राप्नुयात् एव। आवयोः निग्रहणं भवेत् उत न इति तु अन्यः विषयः"।

किञ्चित् कालम् अटित्वा उभौ जुहूपत्रालयं गतवन्तौ। ततः पार्सलद्वारा बन्धं प्रेषितवन्तौ। पार्सलबन्धे स्वस्य अन्यत् किमपि सङ्केतं लिखितवन्तौ।

ततः प्रत्यागत्य विश्रामगृहम् आगतौ। इदानीम् अपि केचन आरक्षकाः स्थिताः आसन्। यद्यपि एतौ उभौ अपि तेषां पार्श्वभागतः निर्गतवन्तौ तथापि कोऽपि अभिज्ञातुं न शक्तवान्।

ताजविश्रामगृहस्य द्वारस्य पार्श्वे किञ्चन भित्तिपत्रम् अवलम्बितम् आसीत्। तत्र लिखितम् आसीत्- 'काश्मीरस्य प्रख्यातः ऐन्द्रजालिकः श्रीजगदीशचन्द्रः अद्य सायं नववादने ताजगृहस्य सभागारे इन्द्रजालस्य कौशलं दर्शयिष्यति .... एतत् कौशलं तादृशं भविष्यति यादृशं कौशलं एतावत्पर्यन्तं कोऽपि संसारे दृष्टवान् न स्यात् ......

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीजगदीशचन्द्रः एतादृशं कौशलं तिब्बते कस्माच्चित् लामातः शिक्षित्वा आगतवान् अस्ति .... इन्द्रजालविद्यायाः चमत्कारं द्रष्टुम् इच्छुकेभ्यः निमन्त्रणम् अस्ति। ते आगत्य निश्चयेन पश्येयुः। .... प्रवेशशुल्कं केवलं रूप्यकद्वयम्। प्रवेशपत्रं ताजगृहस्य प्रबन्धकात् स्वीकर्तुं शक्नुवन्ति' इति।

जगदीशचन्द्रः तां विज्ञापिकां दृष्ट्वा सन्तुष्टः जातः। अन्ये अपि तां विज्ञापिकां पठन्तः आसन्। केचन प्रवेशपत्रं क्रीणन्तः अपि आसन्। जगदीशचन्द्रः ततः स्वप्रकोष्ठं गतः। रामुः तदा अत्यन्तं विस्मितः जातः आसीत्। यदा सः तस्य पार्श्वे एव विज्ञापिकां पठन्तं आरक्षकं दृष्टवान् आसीत्। तथापि सः रामुम् न अभिज्ञातवान्। प्रकोष्ठं गत्वा रामुः- "गुरुदेव! अस्यां विज्ञापिकायां भवतः केवलं नाम लिखितम् आसीत् किम्?"

रामुः नामपठनात् ऋते किमपि पठितुम् असमर्थः जातः आसीत्। अतः एव जगदीशचन्द्रः तं विज्ञापिकायाः अर्थं बोधितवान्। अर्थम् अवगतवतः रामोः मुखम् औत्सुक्येन अपश्यत् जगदीशचन्द्रः।

मध्याह्नभोजनस्य पश्चात् ताजगृहस्य प्रबन्धकः जगदीशचन्द्रेण मेलितुम् आगतः। जगदीशचन्द्रः प्रबन्धकं रामोः परिचयं वदन्- "अहं सेवार्थम् एतं बालकं सेवकरूपेण मम समीपे स्थापितवान् अस्मि। एतस्य भोजनम् अपि ताजगृहे एव भवेत्" इति उक्तवान्।

"अस्माकं सभागृहे सहस्राधिकानां जनानाम् कृते उपवेष्टुं स्थानं नास्ति। एतावता सहस्रं चिटिकाः विक्रीताः अभवन्" इति प्रबन्धकेन उक्तम्।

"तर्हि एकं दिनम् इतोऽपि प्रदर्शनार्थं निश्चिनोतु"।

"अहम् अपि एतत् एव इच्छामि स्म। द्वितीयस्य प्रदर्शनस्य कृते श्वस्तनविज्ञापिका भवतु अथवा अन्यस्य दिनस्य कृते?" इति प्रबन्धकेन पृष्टम्।

"मम विचारः तु श्वस्तनस्य कृते एव भवतु"।

"किन्तु अत्र एकः विषयः अस्ति। यदि अद्यतनीयं प्रदर्शनं जनेभ्यः न रोचते तर्हि श्वस्तनं प्रदर्शनं हास्यास्पदं भवेत्"।

"यदि एवं भविष्यति तर्हि सर्वेभ्यः धनम् अहं प्रत्यर्पयिष्यामि"।

"स्वस्य सफलतायाः विषये भवतः तावान् विश्वासः अस्ति किम्?"

"आम्। भवान् पश्यतु, बहूनि दिनानि यावत् रिक्तं तत् सभागृहम् अद्य प्रदर्शनस्य अनन्तरम् अपि पूर्णं भविष्यति। अनन्तरम् अपि तथैव"।

"तर्हि प्रवेशशुल्कम् अधिकं करणीयं भवेत्?"

"एतस्मिन् विषये पश्चात् चिन्तयिष्यामः"।

प्रबन्धकः जगदीशचन्द्रेण मेलनं कृत्वा बहिः गतः। द्वयोः मध्ये अंग्रेजीभाषया क्रियमाणं सम्भाषणं रामुः न अवागच्छत्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जगदीशचन्द्रः हिन्दीभाषया लिखितं किञ्चन पुस्तकं रामोः कृते पठनार्थं दत्तवान्। पुस्तकेन सह काञ्चित् लेखनीं यच्छन् सः- "यत्र पठितुम् काठिन्यम् अनुभविष्यसि तत्र अङ्कन्या रेखाङ्कितं कुरु। अहं त्रिवादने सर्वं पाठं श्रोष्यामि" इति अवदत्।

११

रात्रौ भोजनस्य पश्चात् सहस्राधिकाः जनाः इन्द्रजालं द्रष्टुं सभागृहं प्राप्तवन्तः। सर्वेषाम् उपवेशनार्थम् आसन्दाः स्थापिताः आसन्। प्रबन्धकः तत्र कस्मिंश्चित् भागे वेदिकां निर्मापितवान् आसीत्। वेदिकायां काचित् उत्पीठिका तथा च तस्याम् उत्पीठिकायां जगदीशचन्द्रस्य कश्चन दण्डः स्थापितः आसीत्। वेदिकायां स्थित्वा जगदीशचन्द्रः किञ्चित् लघु भाषणं कुर्वन्- "एषा मायाविनी विद्या अस्ति। अहम् एतां विद्यां तिब्बते कस्माच्चित् लामातः शिक्षितवान् अस्मि। एतया विद्यया अहं तावत् मायाजालं प्रसारयितुं शक्नोमि येन भवद्भिः इष्टं वस्तु प्राप्येत एव। भवत्सु कोऽपि वदेत् सः किम् इच्छति? इति। किमपि वस्तु याच्यताम्। यत् अत्र प्राप्तुम् अशक्यं, तत् अपि याचितुं शक्नोति" इति अवदत्। सः ताजप्रबन्धकं पृष्टवान्- "वदतु महोदय, भवान् किम् इच्छति?" इति।

"काश्मीरस्य सेवफलम्"।

"जूनमासे? अस्तु, स्थालिकाम् आनाययतु"।

पाकशालातः स्थालिका आनायिता। ताम् उत्पीठिकायां स्थापयित्वा, तस्याः उपरि आच्छादकं प्रसार्य स्वकीयं दण्डं भ्रामयन् अन्यं कञ्चित् पृष्टवान् जगदीशचन्द्रः- "महोदय, भवान् किम् इच्छति?" इति।

"इलाहाबादस्य बीजपूरम्"।

"ओह! .... अस्तु"। सः अपरं कञ्चन पृष्टवान्- "भवान् अपि किमपि इच्छति वा?" इति।

"शैंपेनकूपीम् इच्छामि"।

इत्थं बहवः जनाः भिन्नभिन्नवस्तूनाम् अभियाचनां कृतवन्तः। किञ्चित् कालानन्तरं जगदीशचन्द्रः अवदत्- "स्वीकुर्वन्तु, भवन्तः सिद्धाः भवन्तु। यत् किमपि भवन्तः इच्छन्ति तत् प्राप्तुम् अर्हन्ति" इति।

एवम् उक्त्वा सः उत्पीठिकातः आच्छादकम् अपसारितवान्। दर्शकानां महत् आश्चर्यं जातं यदा तैः सर्वाणि अभीप्सितानि वस्तूनि स्थालिकायां दृष्टानि। वस्तूनां मध्ये महाकूपी अपि आसीत्। जनाः आश्चर्येण करताडनम् अकुर्वन्।

जगदीशचन्द्रः सेवफलं स्वीकृत्य रामोः हस्ते यच्छन्- "एतत् प्रबन्धकमहोदयाय यच्छ। सः परीक्षणं कुर्यात् यत् एतत् यथार्थम् एव सेवफलम् अस्ति उत क्रीडनकम्"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति अवदत्।

रामुः तत् फलं प्रबन्धकाय प्रादात्। प्रबन्धकः तत् हस्तेन स्पृष्ट्वा उक्तवान्- "एतत् तु सेवफलं नास्ति। एतत् बीजपूरम् अस्ति" इति।

"बीजपूरम्"! जगदीशचन्द्रः आश्चर्येण अवदत्। "पश्यामि तावत्" इति उक्त्वा सः समीपं गत्वा अपश्यत्। तत् दृष्ट्वा- "भवान् पार्श्वस्थं जनं पृच्छतु यत् एतत् किम् अस्ति?" इति तम् अवदत्।

"किं महोदय! एतत् पश्यतु। बीजपूरं नास्ति किम्?" इति प्रबन्धकः पार्श्वे उपविष्टं जनं पृष्टवान्। पार्श्वस्थः जनः अवदत्- "बीजपूरं नास्ति। एतत् तु दाडिमम् अस्ति" इति।

तद्वचनं श्रुत्वा सर्वे हसितवन्तः। दाडिमं बीजपूरं च कथयितारौ परस्परम् आश्चर्येण मुखं पश्यन्तौ आस्ताम्। इदानीं रामुः तत् फलं स्वीकृत्य सभागृहस्य अन्यस्मिन् भागे उपविष्टवतः जनान् दर्शितवान्। कश्चन तत् फलं हस्ते उन्नीय "एतत् तु अनानसम् अस्ति" इति अवदत्। यदा सः अनानसम् इति अकथयत् तदा प्रबन्धकः- "एतत् तु सेवं जातम् अस्ति" इति उक्तवान्।

अस्मिन् क्षणे जगदीशचन्द्रः तत् हस्ते स्वीकृत्य- "पश्यन्तु भवन्तः। अस्माकं सेवफलं कोऽपि अनानसम् इति वदति, कश्चन बीजपूरम् अपरः तु दाडिमम्। अस्य निर्णयः कश्चन अत्र वेदिकाम् आगत्य कुर्यात्। भवान् आगच्छतु" इति कथयन् सः अन्यं कञ्चित् आहूतवान्।

आगन्तुकः जनः जगदीशचन्द्रस्य समीपम् आगत्य हस्ते सेवं स्वीकृत्य- "अहं पश्यामि यत् एतत् सेवम् अस्ति" इति अवदत्।

"अस्तु! भवान् गच्छतु। इदानीं भवान् आगच्छतु" इति जगदीशचन्द्रः अपरम् आहूतवान्।

सः तत् एव वस्तु हस्तेन संस्पृश्य विस्मयेन अपश्यत्। ततः सः- "अहं शपथेन वक्तुं शक्नोमि यत् एतत् आम्रम् अस्ति" इति उक्तवान्।

तस्य वचनं श्रुत्वा सर्वे अहसन्। कश्चन जनः स्वयम् अग्रे आगत्य तत् वस्तु स्वीकृत्य अवदत्- "एतत् फलम् एव नास्ति। एवं भाति यत् एतस्य ऐन्द्रजालिकस्य एव जनाः अत्र सन्ति। एषः अस्मान् मूर्खान् कुर्वन् अस्ति। वस्तुतः एषा तु शैंपेनकूपी अस्ति"। इति।

ततः जगदीशचन्द्रः अवदत्- "अयि भो दर्शकगणाः। अत्र कोऽपि असत्यं वदन् नास्ति। अत्र कोऽपि मम जनः नास्ति। एषा मायाविनी विद्या अस्ति। एषा भवतां मनस्सु तादृशं मायाजालं प्रसारितवती अस्ति येन यत् वस्तु भवन्तः द्रष्टुम् इच्छन्ति तत् एव

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दृश्यते। पश्यन्तु, एषा स्थालिका फलैः अन्यैः वस्तुभिः च पूर्णा अस्ति न वा?" इति।

"अस्ति" इति बहवः जनाः उक्तवन्तः।

"तर्हि एतत् पश्यन्तु" इत्युक्त्वा जगदीशचन्द्रः स्वकीयं दण्डं पात्रस्य उपरि भ्रामितवान्। यथा किमपि वस्तु वाष्पीभूय उड्डयते तथा एव तस्मात् पात्रात् सर्वाणि वस्तूनि लुप्तानि जातानि। दर्शकाः अवाङ्मुखाः जाताः।

जगदीशचन्द्रः पुनः अवदत्- "एतत् जगत् मायामयम् अस्ति। वस्तुतः वयं यत् पश्यामः तत् किमपि नास्ति। अस्माकं मनसः संस्कारः अस्ति। तेन कारणेन वयं स्त्रियः पुरुषाः वयोवृद्धाः बालाः उत्पीठिकाः आसन्दाः इत्यादीन् पश्यामः। अन्ततोगत्वा दर्शकः अपि मायायाः एव कश्चन अंशः तथा च दृश्यमानं वस्तु अपि मायायाः एव रूपम्। एतस्य तर्कस्य समर्थने अहम् इतोऽपि एकं कौशलं दर्शयामि" इति।

एवम् उक्त्वा सः ततः उत्पीठिकां स्थालिकां च अपसारितवान्। सः प्रेक्षकान् उक्तवान्। "पश्यन्तु, अत्र किमपि नास्ति। अहं भवतः सर्वान् वाराणसीनगरस्य कस्याश्चित् विद्याधरी इति नामिकायाः गायिकायाः गीतं श्रावयामि। तस्याः नृत्यम् अपि दर्शयामि"।

सर्वे जनाः आश्चर्येण परस्परं मुखं पश्यन्तः आसन्। जगदीशचन्द्रः अवदत्- "भवत्सु कश्चन गायन्त्याः विद्याधर्याः गीतं श्रुतवान् वा?" इति।

कश्चन भद्रपुरुषः उक्तवान्- "अहं तस्याः नृत्यं गीतं च श्रुतवान् अस्मि" इति।

"तर्हि भवान् एव निर्णयं कुर्यात् यत् एषा विद्याधरी एव अस्ति उत न" इति उक्त्वा जगदीशचन्द्रः दण्डम् अधस्तात् मन्दम् उपरि नयन् आसीत्। यथा यथा सः दण्डम् उपरि अनयत् तथा तथा भूमितः काचित् धूमरेखा उपर्युपरि गच्छन्ती आसीत्। दण्डः पञ्चपादमितम् उपरि गत्वा स्थितः जातः। तदनन्तरं जगदीशचन्द्रः उद्गच्छन्तं धूमं वेगेन भ्रामयित्वा पृष्ठतः नुन्नवान्। सा धूमरेखा भ्रमरः इव झञ्झावातः इव वा गोलाकारेण भ्रमितवती। ततः सा धूमरेखा विस्तृता जाता। विस्तृतायाः धूमरेखायाः प्रकटीकृता काचित् मानवाकृतिः दर्शकैः दृष्टा। क्षणानन्तरं तस्मात् धूमात् काचित् नर्तकी अपि प्रकटिता अभवत्। सा नर्तनार्थं योग्यं वस्त्रम् आभूषणं च धृतवती आसीत्। शृङ्गारयुक्ता सा पादयोः नूपुरं धृत्वा भ्रमन्ती अकस्मात् एव स्थिता अभवत्। प्रेक्षकाः तस्याः स्वागतार्थं करताडनम् अकुर्वन्। इदानीं जगदीशचन्द्रस्य दण्डचालनमात्रेण एव तम्बूरवाद्यवादकः ऊर्ध्वकवादकः च इति द्वौ जनौ भूमितः प्रकटितौ अभवताम्। तदनन्तरं वेदिकायां तम्बूरवाद्यस्य ऊर्ध्वकस्य च ध्वनिः श्रुतिपथम् आगतः। प्रकटिता महिला गीतं गातुम् आरब्धवती। सा महिला आलाप खयाल बोल तान आभोग इत्यादीन् रागान् गीतवती। तत्पश्चात् सा अगायत्-

Funding by IKS-MoE

"रूपयौवनयोः कृते अहङ्कारः न करणीयः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

येन अहङ्कारः कृतः तस्य स्थितिं सकृत् दृष्ट्वा भेतव्यम्
येन स्वस्य प्राणिनः च हितम् इष्यते तेन प्रभुचरणः ध्यातव्यः।
रूपयौवनयोः कृते अहङ्कारः न करणीयः"।

इत्थं गीतगानेन सह नृत्यस्य अपि आरम्भः जातः। नृत्ये भक्तिभावाः प्रदर्श्यमानाः आसन्। इतोऽपि एकं गीतं श्रोतुं प्रेक्षकाणाम् इच्छा जागरिता अभवत्। तदा जगदीशचन्द्रः प्रेक्षकान् अवदत्- "गायिकायै किञ्चित् उपायनं यच्छन्तु तदा सा प्रसन्नचित्ता सती गायेत्" इति।

रामुः किञ्चन बृहत् पात्रं स्वीकृत्य प्रेक्षकाणां मध्ये अटितवान्। प्रेक्षकाः किञ्चित् किञ्चित् धनम् अयच्छन्। गणनायां कृतायां सत्यां सहस्रं रूप्यकाणि अभवन्। जगदीशचन्द्रः अवदत्- "वत्स रामो, प्रत्यर्पयतु सर्वम्। मुम्बयीनगरे रागविद्यायाः अनुरागिणां संख्या न्यूना जायमाना अस्ति। भवतः सर्वान् इन्द्रजालस्य अन्यविधक्रीडां दर्शयिष्यामि। अहं गायिकाम् इतः प्रेषयामि" इति।

"न! न! इतोऽपि स्वीकरोतु" इति प्रेक्षकेषु केचन रसिकाः अकथयन्। रामुः सकृत् इतोऽपि अटितवान्। इदानीं चतुस्सहस्राधिकानि रूप्यकाणि अभवन्। अस्मिन् क्षणे गायिका किञ्चित् अपरं गीतं गातुम् आरब्धवती-

"हे हरे! किञ्चित् मामपि पश्यतु।
हे मोहन! कोट्यधिकजनेषु त्वम् एव मम प्रभुः।
हे हरे! किञ्चित् ....
अहं कदारभ्य प्रार्थयमाना स्थिता अस्मि,
शृणोतु नन्दकिशोर"।

इत्थं द्रुतलयेन गीतं नृत्यं च अभवत्। एषा मायारूपिणी क्रीडा इति प्रेक्षकाः तु विस्मृतवन्तः एव। जनाः प्रसन्नाः सन्तः धनं क्षिपन्तः आसन्। एवम्प्रकारेण घण्टाद्वयं यावत् एषा क्रीडा प्राचलत्।

यदा घट्यां सार्धैकादशवादनं जातं तदा जगदीशचन्द्रः गायिकाम् अवदत्- "पर्याप्तम्" इति। प्रेक्षकैः दत्तं धनं रामुः सङ्गृहीतवान् आसीत्। जगदीशचन्द्रः प्रेक्षकान् सम्बोधयन् आसीत्- "एतत् सर्वं भवतां मनोरञ्जनार्थम् अस्ति। किन्तु एकं विषयं भवतः सर्वान् वदामि यत् एतत् सर्वं मायामयम् एव अस्ति। भ्रमः एव अस्ति। भवताम् इन्द्रियाणां पुरतः काचित् भ्रान्तिच्छाया अस्ति। शुभरात्रिः"।

सा गायिका तस्मिन् उड्डीयमाने धूमे अन्तर्हिता जायमाना अस्ति इति प्रेक्षकैः दृष्टम्। किन्तु तस्मात् धूमात् एतत् गीतं श्रूयते स्म "रूपयौवनयोः कृते अहङ्कारः न करणीयः" इति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सः धूमः लुप्तः जातः। तम्बूरवादकः ऊर्ध्वकवादकः च तथा विलीनौ जातौ यथा जले शर्करा विलीना भवति।

जगदीशचन्द्रः उपस्थितान् सर्वान् नमस्कृत्य धनं स्वस्मिन् कोशे संस्थाप्य आश्चर्यभरितान् जनान् तत्रैव परित्यज्य रामुणा सह प्रकोष्ठम् आगतवान्।

शयनात् पूर्वं रामुः अवदत्- "गुरुदेव! अद्य भवान् चमत्कारम् एव अकरोत्" इति।

"रामो, यदि त्वं मया सह भवेः तर्हि त्वाम् अहं दर्शयेयम् यत् मनुष्यः किं किं कर्तुं शक्नोति" इति।

१२

ताजगृहे वासं कुर्वतां जनानां रात्रौ निद्रा न आगता। प्रबन्धकः तु रात्रिपर्यन्तम् उन्मत्तः इव स्वस्मिन् प्रकोष्ठे इतस्ततः अटति स्म।

जगदीशचन्द्रः पूर्वनिश्चयानुसारं सहस्रं रूप्यकाणि प्रबन्धकाय दत्तवान्। अन्यत् सर्वं धनं निधानिकायां संस्थाप्य सन्तोषेण सः निद्रां कृतवान्। मुम्बयीनगरे तस्य प्रथमं दिनं सुष्ठुरूपेण अतीतम्। इदानीं रामोः मनसि अपि एषः विचारः उदेति स्म- 'किम् अहम् अपि आत्मनि एतादृशीं शक्तिम् जनयितुं शक्नोमि? इति। चौर्यकार्यं तस्य अनुचितं भाति स्म। सः स्वगतं - 'अहं गुरोः सेवया एतां शक्तिं निश्चयेन प्राप्नुयाम्' इति दृढं सङ्कल्पम् अकरोत्।

अन्येद्युः नियमानुसारेण प्रातःकाले एव जगदीशचन्द्रः उत्थितः। उत्थाय सः रामुणा सह समुद्रतटे भ्रमितुं गतवान्। ततः उभौ कारयानेन जुहूसागरतटं गत्वा स्नानं कृतवन्तौ। जुहूतः तौ दशवादने यदा ताजगृहं प्रत्यागतौ तदा स्वस्य प्रकोष्ठस्य पुरतः अटतः दशजनान् दृष्टवन्तौ। तयोः प्राप्तेः समनन्तरम् एव सर्वे तौ परिवार्य स्थितवन्तः। तेषु कश्चन- "गुरुदेव! भवान् कुत्र गतवान् आसीत्?" इति अपृच्छत्। अपरः कश्चन अवदत्- "वयं घण्टात्रयतः प्रतीक्षमाणाः सन्तः स्थिताः स्मः" इति। जगदीशचन्द्रः इदानीं किमपि वदन् एव आसीत् तावता एव प्रतीक्षमाणेषु कश्चन अवदत्- "अहं भवता सह अत्यन्तम् आवश्यकं विषयम् निमीत्तीकृत्य चर्चयितुम् आगतः" इति। अन्यः कश्चन अवदत्- "प्रथमम् अहम् अत्र आगतः। अतः सर्वप्रथमं भवता सह सम्भाषणं कर्तुं मम अधिकारः अस्ति" इति।

श्येनैः आकस्मिकग्रहणम् इव अनुभूयमानः जगदीशचन्द्रः परस्परं सम्भाषणं कुर्वतः जनान् तर्जयन् - "मम पार्श्वे भवद्भिः सह सम्भाषणं कर्तुं समयः नास्ति। मया देवपूजनं करणीयम् अस्ति। मध्याह्नकाले द्विवादने आगच्छन्तु, तदा सम्भाषणं करिष्यामि" इति उक्तवान्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कश्चन अवदत्- "मम सम्भाषणं तु एकनिमेष ...." इति। जगदीशचन्द्रः तन्मध्ये एव अवदत्- "नैव! नैव!! नैव!!! मम पार्श्वे इदानीं समयः नास्ति" इति।

विवशीभूय सर्वे जनाः ततः निर्गताः। जगदीशचन्द्रः रामुः च प्रकोष्ठस्य अन्तः प्रविश्य द्वारस्य अर्गलं योजितवन्तौ। बहिः प्रबन्धकस्य सन्देशवाहकः अपि आसीत्। सः ततः प्रत्यागत्य प्रवृत्तं सर्वं प्रबन्धकाय न्यवेदयत्।

सायङ्काले इन्द्रजालकौतुकं द्रष्टुं जनानाम् अभियाचना वृद्धिं गता। तस्मात् प्रबन्धकः प्रदर्शनार्थं जगदीशचन्द्रेण मिलित्वा एकं दिनम् इतोऽपि निश्चितं कृतवान्।

तस्मिन् सायङ्काले प्रेक्षकाः गीतं नृत्यं च केवलं द्रष्टुं विशेषम् आग्रहं कृतवन्तः। जगदीशचन्द्रः कोलकातायाः नृत्याङ्गनायाः नीलमबाय्याः आह्वानं कृतवान्। सा आगत्य एतत् गीतं गीतवती-

"श्रीगिरिधरस्य पुरतः नृत्यामि नृत्यामि, अहं नृत्यामि। नृत्यं कृत्वा रसिकान् तोषयामि, अनुरागिणः जनान् परिशीलयामि" इति।

तत्पश्चात् सा इतोऽपि एकं गीतं गीतवती-

"हे राम! कथं त्वया स्नेहः कृतः,
चैतन्यं सर्वं विस्मृतं मया, त्यक्ता शालीनता ज्येष्ठानां पुरतः।
उन्मत्ता अहम् अत्र धावामि तत्र गच्छामि, अन्विष्यन्ती ब्रजपुरीम्।
हे राम! कथं त्वया स्नेहः कृतः।" इति।

तदनन्तरं पुनः नृत्यं, गीतं च अभवत्।

अस्मिन् प्रदर्शनकार्यक्रमे सप्तसहस्रं धनं सङ्गृहीतं जातम्। प्रबन्धकः अत्यन्तं प्रसन्नः जातः। जगदीशचन्द्रः अपि सन्तोषम् अनुभूतवान्। इत्थं चत्वारि दिनानि यावत् इन्द्रजालकौतुकस्य प्रदर्शनं जातम्। तत्पश्चात् केनचित् मनचन्दानी नामकेन श्रेष्ठिना सह वार्तालापः जा..। सः मुम्बयीनगरस्य मध्ये स्थितस्य वोमनजी इति सभागृहस्य इन्द्रजालप्रदर्शनार्थं व्यवस्थां कृतवान्।

कस्याञ्चित् रात्रौ रामुः जगदीशचन्द्रस्य चरणौ गृहीत्वा- "गुरुदेव! अहं पूर्वम् अपराधकार्यं कुर्वन् आसम्। स्वकीयं जीवनं वृथा यापयामि स्म। योग्यः जनः केन प्रकारेण धनम् अर्जयितुं शक्नोति इति न जानामि स्म। कृपया, माम् अपि एतां विद्यां शिक्षयतु" इति न्यवेदयत्।

"रामो, एतस्याः विद्यायाः शिक्षणार्थं दशवर्षाणि अपेक्षितानि भवन्ति"।

"अहं जीवनपर्यन्तं भवन्तं सेविष्ये"।

Funding by IKS-MoE

"भवतु! प्रथमं योग्यता सम्पादय। तत्पश्चात् ऐश्वर्यं स्वयम् एव तव वरणं करिष्यति"।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"तर्हि भवान् एतां विद्यां शिक्षयेत् खलु?"

"यदि त्वं शिक्षितुम् इच्छसि तर्हि अहं शिक्षयामि। अन्यथा एषा विद्या शर्करा इव तु नास्ति यत् जले स्थापनेन तस्याः विलयनं भवेत्। इन्द्रजालविद्यां ज्ञातुम् एकाग्रतायाः तपस्यायाः च आवश्यकता भवति। तपस्यायाः पूर्वं काचित् शिक्षा अपि आवश्यकी। योगः ध्यानं च अपि ज्ञानेन विना साधयितुम् अशक्यम्"।

"गुरुदेव! अहं सर्वं करिष्यामि"।

"भवतु! यदि त्वं मम कथनानुसारम् आचरेः तथा च मम आज्ञायाः पूर्णरूपेण पालनं कुर्याः तर्हि निश्चयेन इन्द्रजालविद्यां ज्ञास्यसि। अद्य आरभ्य त्वं मम शिष्यः असि। अहम् इदानीं स्वस्मिन् ग्रामे एव किञ्चन गृहं निर्माय अवशिष्टे वयसि एताम् एव विद्याम् इतोऽपि विकसितां कर्तुम् इच्छामि। गृहं निर्मातुं विंशतिसहस्रं, तथा च शेषं जीवनं यापयितुं लक्षं रूप्यकाणि आवश्यकानि सन्ति। इत्थं जीवनस्य आवश्यकताभ्यः मुक्तिं प्राप्य निश्चिन्तः सन् आत्मानम् आत्मिकशक्तीनां विकासाय योजयिष्यामि"।

रामुः आत्मनि एव नितरां प्रसन्नः जातः। मानसिकशक्तीनां विकासः कियत् दूरं यावत् कर्तुं शक्यते इति अधुना सः ज्ञातवान्। किन्तु कश्चन संशयः तस्य मनसि असकृत् उद्भवति स्म। संशयः एवम् आसीत् 'यदि एतया विद्यया सेवं बीजपूरं च निर्मातुं शक्यते तर्हि गृहस्य कृते रूप्यकाणि निर्मातुं न शक्यन्ते किम्? इति एतं संशयं सः गुरुदेवं पृष्ट्वा परिमार्ष्टुम् ऐच्छत्। जगदीशचन्द्रः संशयस्य निवारणाय- "एतद् द्वारा रूप्यकाणां निर्माणं नाम सर्वकारवञ्चनम् इत्यर्थः। अहं कमपि वञ्चयितुं न इच्छामि। यत् धनं जनाः सदिच्छया यच्छन्ति तत् एव मम इति अहं मन्ये" इति उक्तवान्।

मुम्बयीनगरे इन्द्रजालप्रदर्शनस्य परिणामः एषः अभवत् यत् मासाभ्यन्तरे एव तस्य पार्श्वे सार्धैकलक्षं रूप्यकाणि सङ्गृहीतानि जातानि। सर्वं धनं सः ग्रामं प्रति आनीवान्। ग्रामगमनसमये जगदीशचन्द्रः रामुम्- "पश्य रामो! यदि त्वं वर्षाभ्यन्तरे एव विकासेच्छुः भूयाः तर्हि त्वां तव मातुः समीपं प्रेषयिष्यामि। यदि त्वं विकासं साधयिष्यसि तर्हि इन्द्रजालविद्याम् अभ्यासितुं त्वां मम समीपे स्थापयिष्यामि" इति अवदत्।

पूर्वकालस्य अपेक्षया इदानीं रामोः स्वभावस्य संस्करणं जातम् आसीत्। तस्मै पठनं रोचते स्म। तस्य भोजनपानविधौ आचरणे च परिवर्तनं जायमानम् आसीत्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सङ्कटकाले सहयोगिता

१

स्वस्य गृहस्य निर्माणार्थं धनसङ्ग्रहणं कुर्वतः मङ्गलस्य चत्वारि वर्षाणि व्यतीतानि जातानि। अस्मिन् वर्षे सः आशां करोति स्म- 'विंशतिसहस्रस्य रूप्यकाणां व्यवस्था तु भवेत् एव। तावता धनेन मोहिन्याः इच्छानुसारं किञ्चन गृहं निर्माप्य दातुं शक्नोमि' इति। अस्मिन् प्राप्यमाणे आये प्रमुखं योगदानं शाकोत्पादनस्य अपि आसीत्। मङ्गलः किञ्चित् अधोभागे विद्यमानेषु मनोहरस्य क्षेत्रेषु शाकोत्पादनम् आरब्धवान् आसीत्। उर्वरकस्य उपयोगम् अपि करोति स्म। तेषु क्षेत्रेषु सः आलुकस्य भिण्डेः रक्तफलस्य कोशातक्याः टिण्डिशस्य मूलकस्य गृञ्जनकस्य च बीजं वपति स्म। सेचनार्थम् अस्याम् एव भूमौ तेन कश्चन कूपः खननीयः अभवत्।

अन्येषु अपि क्षेत्रेषु धान्यानाम् उत्पादनं सम्यक् जायमानम् आसीत्। क्षेत्रेषु कार्यं कुर्वन्तः कृषकाः कार्मिकाः च मङ्गलस्य सद्व्यवहारेण अत्यन्तं प्रसन्नाः आसन्। मङ्गलः तु तेषां कार्मिकाणां योगक्षेमं वहति स्म। तथा च नित्यं प्रत्येकस्मिन् मङ्गलवासरे शनिवासरे च तेषां गृहं गृहं गत्वा आवश्यकताः पूरयितुं प्रयत्नं करोति स्म।

ग्राम्यजीवने धनस्य सङ्ग्रहणम् उपायद्वयेन कर्तुं शक्यते इति सः अवगतवान् आसीत्।। प्रथमः उपायः नाम धान्यानां पृथक्करणं फुत्करणं पेषणं पाचनं, तन्तूनां सर्जनं वयनं, दुग्धोत्पादनं, नवनीतं दाधिकं घृतं द्विदलं शाकम् इत्यादीनाम् उत्पादनं च गृहे एव करणीयम्। द्वितीयः, प्रत्येकं कुटुम्बसदस्येन मिलित्वा कार्यं करणीयम् इति। मङ्गलः एतेन उपायद्वयेन प्रतिवर्षं धनसङ्ग्रहणं करोति स्म।

Funding by IKS-MoE

सः वर्षचतुष्टयाभ्यन्तरे पञ्चदशसहस्रं रूप्यकाणि सङ्गृहीतवान् आसीत्। किञ्च,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एतस्य वर्षस्य धान्यं परार्थविक्रेतुः आपणे एव सञ्चितम् आसीत्। सञ्चितात् धान्यात् प्रायशः सार्धचतुश्शतस्य रूप्यकाणां प्राप्तेः आशा आसीत्। एतस्मात् ऋते शाकादीनां विक्रयणेन प्राप्यमाणः आयः अपि प्रतिमासं भवति स्म। अतः एव मङ्गलस्य ऊहा आसीत् यत् गृहस्य निर्माणार्थं शीघ्रम् एव विंशतिसहस्रस्य रूप्यकाणां सङ्ग्रहणं भविष्यति इति।

सम्प्रति तु सः ग्रामीणैः निर्मिते मृत्तिकागृहे एव वासं करोति स्म। गृहात् बहिः किञ्चन लघु उद्यानम् आसीत्। तत्र तृणपङ्क्तयः निर्मिताः आसन्। तत् उद्यानं रागगर्भवृक्षैः परिवृत्तम् आसीत्।

मङ्गलः यदा कदाचित् नगरं गच्छति स्म तदा तदा ततः किञ्चन नूतनम् अनुभवं प्राप्य एव प्रत्यागच्छति स्म। प्राप्तैः नूतनैः अनुभवैः सः ग्रामीणानां सौख्यार्थं समृद्ध्यर्थं च प्रयत्नं करोति स्म।

यदा तस्य आत्मनि विश्वासः जातः- 'मयि गृहनिर्माणस्य सामर्थ्यम् आगतम् अस्ति' इति, तदा सः नगरं गत्वा तत्र निर्मितेषु बहूषु सुन्दरगृहेषु कस्यचित् गृहस्य मानचित्रं निर्माप्य गृहम् आनीतवान्।

मानचित्रं स्वीकुर्वन् आनन्देन गृहं प्राप्य बहिर्भागतः एव पत्नीम् आह्वयन्- "भोः! दीपस्य मातः! कुत्र असि? अत्र आगच्छ, पश्य, किं निर्माप्य आनीतवान्" इति उच्चैः उक्तवान्। तस्य ज्येष्ठस्य पुत्रस्य नाम 'कुलदीपः' आसीत्। 'कुलदीपः' नामकरणसमयात् एव मोहिनी 'दीपस्य मातः!' इति सम्बोधनवचनेन आहूता भवति स्म। मोहिन्याः अपरः अपि पुंशिशुः आसीत्। सः अधुना एकवर्षीयः। तस्य नाम कन्हैयः आसीत्। किन्तुः मोहिन्याः आह्वानं ज्येष्ठस्य पुत्रस्य नामोच्चारणेन एव भवति स्म।

मोहिनी पत्युः आह्वानशब्दं श्रुत्वा पुत्रम् अङ्के स्वीकुर्वती गृहस्य देहलीं प्रति आगतवती। तस्य हस्ते किञ्चन नीलवर्णमयं कागदं दृष्ट्वा सा विस्मिता सती पत्युः मुखं दृष्टवती। मङ्गलः तत्र एव विद्यमाने मञ्चे उपविश्य- "मोहिनि! पश्य, अहं गृहनिर्माणार्थं मानचित्रं निर्माप्य आनीतवान् अस्मि। अस्मिन् शीतकाले इष्टिकाः निर्मापयितुम् कार्यम् आरप्स्ये। इत्थम् आगामिवर्षपर्यन्तं गृहनिर्माणं पूर्णं भविष्यति" इति अकथयत्।

"दर्शयतु, कीदृशं मानचित्रं निर्मापितवान् भवान्?" इति उत्साहेन अपृच्छत् मोहिनी।

मङ्गलः तत् नीलवर्णमयं कागदं मञ्चे प्रसार्य- "पश्य, कियत् सुन्दरं गृहं निर्मापयिष्यामि" इति अवदत्।

मोहिनी तत् अपश्यत्। किन्तु तस्मिन् कागदे श्वेतरेखासमूहं दृष्ट्वा किमपि अजानती पृष्टवती- "अहं तु अत्र किमपि न अवगच्छामि" इति।

"अस्तु! यदा गृहं निर्मितं भविष्यति तदा त्वं ज्ञास्यसि"।

Funding by IKS-MoE

तत्क्षणं मोहिनी किमपि स्मरन्ती- "अद्य पत्रवितारकः भवतः नाम्ना लिखितं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पत्रं दत्तवान्” इति उक्तवती।

"कुत्र अस्ति? दर्शयतु"!

मोहिनी पत्रम् आनेतुं गृहस्य अन्तः गता। मङ्गलः अपि तत् मानचित्रं पुटीकृत्य मोहिनीम् अनुसरन् अन्तः आगच्छत्। मङ्गलः पत्रं पठितुं न शक्नोति स्म। अतः सः उष्णं क्षीरं पीत्वा किञ्चित् श्रान्तिम् अपनीय तत् पत्रं वाचयितुं अर्चकस्य बृजलालस्य पार्श्वे अगच्छत्। तस्मै पत्रं यच्छन् अवदत्- " अर्चकवर्य! कृपया एतत् पठतु। एतत् कुतः आगतम्?" इति।

"लालनत्थूमलः एतत् पत्रं प्रेषितवान् अस्ति। सः लिखितवान् अस्ति- 'तव मातुः आरोग्यम् अत्यन्तं क्षीयमाणम् अस्ति। तुभ्यं सूचनां ददामि। यथा रोचते तथा कुरु' इति। एवम् अर्चकः पत्रं पठित्वा मङ्गलं श्रावितवान्।

एतस्याः वार्तायाः ऋते अन्यत् किमपि न लिखितम् आसीत्। मङ्गलः सर्वं वृत्तान्तं विज्ञाय विचारमग्नः जातः। तदा अर्चकः बृजलालः- "मङ्गलभ्रातः। एतत् पत्रं मह्यं ददातु। अहम् एतस्य सत्यतां विज्ञाय श्वः सर्वं वृत्तान्तं वदिष्यामि" इति उक्तवान्।

"कीदृशीं सत्यतां ज्ञास्यति"?

"एतत् एव यत् मातुः अनारोग्यविषये काचित् सत्यता अस्ति उत न"।

"तर्हि किं भवान् चिन्तयति अत्र लिखितम् असत्यम् स्यात्?"

"एतैः धनिकैः सर्वं कर्तुं शक्यते। किञ्चित् प्रयोजनं स्यात् इत्यतः भवान् तत्र आहूतः अस्ति। प्रायशः माता तावती रुग्णा नास्ति यावती रुग्णता एतेन पत्रेण ज्ञायते"।

"तर्हि अहम् एव गत्वा न परिशीलयानि?"

"भवान् गन्तुम् अर्हति। माता रुग्णा भवेत् उत न भवेत्। किन्तु लालनत्थूमलः भवतः द्वारा लेखपत्रव्यवहारम् अपि कारयितुं शक्नोति"।

"अर्चकवर्य! मदीयं यत् किञ्चित् आसीत् तत् सर्वं तु दत्तम् एव। इतोऽपि कीदृशः लेखपत्रव्यवहारः कारयेत्"?

"अस्तु! किन्तु अहं नगरवासिभ्यः जनेभ्यः बहु बिभेमि"।

"किन्तु मम तु हृदयम् एव कम्पमानम् अस्ति। अहं तु गमिष्यामि एव"।

"भवतु! श्वः प्रातः काले प्रस्थानं कुर्याव। अहम् अपि भवता सह प्रस्थास्ये"।

मङ्गलः जानाति स्म- 'मया सह अर्चकवर्यस्य गमनं मां प्रति स्नेहप्रकटनस्य एव अपरं रूपम् अस्ति' इति। सः गृहं प्राप्य यदा मातुः अनारोग्यवार्तां मोहिनीम् अवदत् तदा चिन्तिता सती सा- "यदि मातुः आनयनं शक्यते तर्हि अत्र आनयतु भवान्" इति उक्तवती।

मङ्गलः मौनम् आश्रयत्। मोहिनी पुनः उक्तवती- "अहम् अपि भवता सह

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गन्तुम् इच्छामि। किन्तु भयं भवति, कदाचित् मम मुखदर्शनेन तस्याः दुःखम् इतोऽपि न वर्धेत" इति।

"नैव, तव गमनेन किमपि प्रयोजनं नास्ति" इति मङ्गलः सावधानः सन्- "अर्चकवर्यस्य कथनम् अस्ति यत् माता रुग्णा नास्ति। अन्या एव काचित् वार्ता स्यात्। सः अपि मया सह श्वः प्रस्थास्यते" इति उक्तवान्।

"अर्चकवर्यः बहु समीचीनः जनः अस्ति। न जाने, कस्मिन् जन्मनि तेन क्रियमाणस्य उपकारस्य ऋणं प्रत्यर्पितं भवेत्"।

२

अन्येद्युः सूर्योदयात् प्राक् एव अर्चकः नित्यक्रियां समाप्य मङ्गलस्य गृहम् आगतवान्। मङ्गलः तु रात्रिपर्यन्तं मातृविषये एव चिन्तयन् आसीत् इत्यतः सः अर्चकस्य आगमनात् पूर्वम् एव सज्जः आसीत्। अर्चकस्य आगमने सति सः- "अर्चकवर्य! किमपि खादितं न वा?" इति पृष्टवान्।

"भ्रातः, ब्राह्ममुहूर्ते एव मम पत्नी किमपि निर्मातुं न शक्तवती"।

"दीपस्य माता" इति मङ्गलः मोहिन्याः आह्वानं कुर्वन्- "अर्चकवर्यस्य कृते दाधिकं नवनीतं च आनय" इति उच्चैः अवदत्।

कतिपयेभ्यः दिनेभ्यः मोहिन्याः कार्येषु सहायतार्थं काचित् विधवा महिला प्रातःकाले एव आगच्छति स्म। तस्याः द्वारा मोहिनी बृहत्पात्रे दाधिकं तस्य उपरि चतुर्थांशं नवनीतं च संस्थाप्य प्रेषितवती। अर्चकः दाधिकस्य पानेन तृप्तिम् अनुभूतवान्। ततः मङ्गलेन सह नगरं प्रति प्रस्थितः।

'मम माता पृथक्रूपेण कस्मिंश्चित् गृहे वासं करोति' इति मङ्गलः न जानाति स्म। इत्यतः सः नत्थूमलस्य गृहं प्रति अगच्छत्। तस्य प्राप्तिकाले एव नत्थूमलः गृहात् निर्गत्य कुत्रचित् गच्छन् आसीत्। सः अर्चकं पश्यन् भ्रुवौ वक्रीकृत्य- "अर्चकवर्य! कस्मात् कारणात् आगतः?" इति अपृच्छत्।

"ह्यः भवता लिखितं पत्रं प्राप्तम्। मङ्गलस्य माता रुग्णा अस्ति" इति लिखितम् अस्ति।

"आं, रुग्णा तु अस्ति। किन्तु मरणासन्ना नास्ति। भागवतकथां श्रोतुं तस्याः इच्छा नास्ति" इति सोपहासम् अवदत् नत्थूमलः।

अर्चकः नत्थूमलस्य व्यङ्ग्योक्त्या ईषत् कुपितः जातः। सः अपि व्यङ्ग्योक्त्या- "एतत् नगरं जनैः पूर्णम् अस्ति लालमहोदय! भागवतकथायाः श्रवणस्य आवश्यकता तु कस्यचित् भवेत् एव। भगवान् मङ्गलस्य मातरं दीर्घायुषं कुर्यात्। अहं भागवतकथां

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वाचयितुं न आगतवान्। अहं तु एतदर्थम् आगतः यत् भवतः पत्रे सत्यता अस्ति उत न। एतस्मिन् अवसरे भवान् स्वयम् एव एतत् अङ्गीकृतवान् यत् सत्यतायाः अंशः बहुः न्यूनः अस्ति" इति।

लालनत्थूमलः अङ्गुल्या सङ्केतं कुर्वन्- "सा तस्मिन् गृहे वासं करोति। सा एव पत्रस्य विषये विशदतया वदेत्" इति अवदत्।

मङ्गलः एतस्मिन् विषये विवादं कर्तुम् अनिच्छन् अर्चकेण सह निर्दिष्टं गृहं प्राप्य द्वारशब्दं कृतवान्। माता द्वारम् उद्घाटितवती। सा अकस्मात् आगतं मङ्गलं दृष्ट्वा विस्मिता जाता। द्वारशब्देन तस्याः ऊहा आसीत् यत् लालनत्थूमलः आगतः स्यात् इति। मङ्गलः प्रवृत्तं सर्वं विस्मृत्य एतावत् शीघ्रं ग्रामतः आगन्तुं न शक्नोति स्म। तत्रापि अर्चकस्य दर्शनेन तु तस्याः पदतलतः भूमि अपसरिता इव। तस्याः मौनं दृष्ट्वा अर्चकः अवदत्- "स्वामिन्याः जयः भूयात्। देवः भवत्यै प्रसन्नतां दद्यात्। मातः, रामुः कुत्र अस्ति?"

मङ्गलः किमपि अपृष्ट्वा एव गृहस्य अन्तः अगच्छत्। अन्तः प्रविश्य अर्चकम् अपि आहूतवान्। तदनन्तरं द्वारे पिहिते सति मङ्गलः मातरं- "मातः! भवत्याः आरोग्यं कथम् अस्ति?" इति पृष्टवान्।

"यदि आगतः एव असि तर्हि श्रृणु"। सा अर्चकं दृष्ट्वा पृष्टवती-

"अरे! अर्चकवर्य! भवान् कथम् आगतः?" इति।

"मातः! अहम् अपि उपरितनप्रकोष्ठे एव सर्वं वृत्तान्तं श्रोतुम् इच्छामि"।

सर्वे उपरितनं प्रकोष्ठं प्राविशन्। तत्र उपविश्य माता अपृच्छत्- "त्वां कः आहूतवान्?" इति।

"लालनत्थूमलस्य पत्रं प्राप्तम्। तेन ज्ञातं यत् भवती अत्यन्तं रूग्णा अस्ति" इति।

"अहं रुग्णा न अस्मि। किन्तु दुःखं निश्चयेन अनुभवामि। रामुः वर्षात् पूर्वं गृहतः पलायितः। एतावत्पर्यन्तं तस्य नामधामसङ्केतादिकं न ज्ञायते। मम पार्श्वे यत् रोकधनम् आसीत् तत् सर्वं क्रमशः समाप्तम्। अधुना निर्वाहः अपि कठिनः जातः अस्ति। अहं लालनत्थूमलं भूमिविक्रयणं कर्तुम् उक्तवती आसम्। तदा सः उक्तवान् यावत् पर्यन्तं मङ्गलः भूमिपत्रे हस्ताङ्कनं न कुर्यात् तावत् पर्यन्तं भूमेः विक्रयणं न भवेत्" इति।

"भूमिक्रेता लब्धः वा?"

"तत् अहं न जानामि। अहं त्वाम् एतदर्थम् आहूतवती यदि त्वम् एव भूमिक्रयणं कुर्याः तर्हि सम्यक् भवेत्"।

"किमर्थं? सम्यक् किं भवेत्?"

"गृहस्य सम्पत्तिः गृहे एव तिष्ठेत्"।

"नैव मातः! अहं भवत्याः भूमिक्रयणं न करिष्यामि। यत्र अधिकं धनं दीयते

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तत्र विक्रयणं करोतु"।

"तर्हि .... किं त्वम् अधिकं धनं न दास्यसि?"

"नैव! अहं तस्याः भूमेः तावत् धनम् एव दातुं शक्नोमि यावता भोजनं वस्त्रं च प्राप्येत। इतोऽपि पञ्चविंशतिं रूप्यकाणि मासिकं प्राप्तुम् अर्हति"।

"एतत् तु बहु न्यूनम् अस्ति"।

"मह्यं तु भूमिः अपि न आवश्यकी"।

"तर्हि त्वं हस्ताङ्कनं कुरु"।

"किमर्थं हस्ताङ्कनं करवाणि?"

"एतदर्थं यत् तव भूमौ कोऽपि अधिकारः नास्ति"।

"तत् तु अहं लिखितवान् अस्मि"।

"तत् लेखनं तु विभाजनसम्बद्धम् आसीत्। तेन विक्रयणं कर्तुं न शक्येत इति लालनत्थूमलः वदति स्म"।

अधुना अर्चकः मध्ये एव विषयपरिवर्तनं कुर्वन्- "किन्तु मातः, रामुः कथं पलायितः?" इति अपृच्छत्।

"न जाने, किमर्थं पलायितः? एकदा विद्यालयं गतः तदनन्तरं न प्रत्यागतः एव"।

"तर्हि तस्य अन्वेषणार्थं प्रयत्नः कृतः?"

"तस्य अन्वेषणायां सहस्रद्वयं व्ययः अभवत् इति लालनत्थूमलः वदति स्म"।

"भवती मङ्गलाय तदर्थं सूचनाम् अपि न प्रेषितवती, किमर्थम्?"

"अहं किं जानीयाम्? लालनत्थूमलः उक्तवान् आसीत्- 'अहं तस्य अन्वेषणां कुर्वन् अस्मि' इति।

"मातः! इदानीम् भवती लालवर्यं वदतु यत् भूमिसम्बद्धपत्रे स्वयम् एव हस्ताङ्कनं कुर्यात्। मङ्गलस्य हस्ताङ्कनं न आवश्यकम् अत्र"।

मङ्गलस्य मातुः भ्रुवौ वक्रे जाते। मङ्गलः अर्चकं तूष्णीं भवतु इति उक्त्वा मातरम् अवदत्- "मातः, रामुः मम अनुजः अस्ति। सः वर्षात् आरभ्य लुप्तः अस्ति, तथापि भवती मां न सूचितवती एव। किमर्थम् उदासीनता भवत्याः?"

"अहं ज्ञातवती यत् एतां वार्तां श्रुत्वा तव पत्नी प्रसन्ना भवेत्। तस्याः वचनानुसारं त्वं तु किमपि प्रयत्नं कर्तुं न शक्नुयाः। अतः एव सूचनाप्रेषणं मया न कृतम्"।

"मातः!" इति मङ्गलः उत्थाय अवदत्। सः एवम् अनुभवन् आसीत्- 'लालनत्थूमलः मातुः बुद्धिनाशं कृतवान् अस्ति इति'। अतः सः दृढतापूर्वकम् अवदत्- "पश्यतु, भवत्याः रूप्यकाणि आभूषणानि भूमिः इत्येतेषु मम किञ्चित् मात्रम् अपि मोहः नास्ति। अहं केवलम् एतत् एव इच्छामि मम ... ग्रामम् आगच्छतु। तत्र गृहं रिक्तम्

Funding by IKS-MoE.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अस्ति। तत्र आगत्य वसतु। अन्नवसनयोः कृते कष्टं न भविष्यति। कदा आगमिष्यति भवती?" इति।

"एवम् अहं न आगमिष्यामि। रामोः पलायनविषयः आरक्षकाय निवेदितः अस्ति। तस्य प्रत्युत्तरम् एतावत् पर्यन्तं न आगतम्"।

"एतत् सर्वं व्यर्थम् अस्ति, मातः!" इति एवं वदन् अर्चकः उक्तवान्- "मम सन्देहः अस्ति लालनत्थूमलः रामुम् अन्वेष्टुं किञ्चित् अपि प्रयत्नं न कृतवान् स्यात्। अग्रे सः प्रयत्नम् अपि न करिष्यति। भवती ग्रामम् आगच्छतु। तत्पश्चात् अहं कुतश्चित् पाताललोकतः अपि तम् अन्विष्य आनेष्यामि" इति।

"भवान् तम् आनेष्यति? कथम्?"

"देवं प्रक्ष्यामि। यत्र सः वदिष्यति तस्यां दिशि प्रस्थाय तम् अन्वेक्ष्यामि"।

मङ्गलस्य माता तद्वचनं श्रुत्वा अहसत्। सा उक्तवती- "मम तु एवं भाति यत् भवन्तौ मां वञ्चयितुम् अत्र आगतवन्तौ" इति।

"अस्तु, मातः! मया यत् वक्तव्यम् आसीत् तत् उक्तम्। यदा भवत्याः ग्रामं प्रति आगमनस्य विचारः भवेत् तदा दिनद्वयपूर्वं मां निश्चयेन सूचयतु येन अहं गृहस्य स्वच्छतादिकं कर्तुं शक्नुयाम्" इति मङ्गलः मातरम् उक्त्वा ततः प्रस्थितः।

मङ्गलस्य माता गच्छन्तौ अर्चकमङ्गलौ पश्यन्ती आसीत्। सा यत् कुर्वती आसीत् तत् सर्वं जामातुः तत्पितुः च कथनानुसारम् एव। तस्याः मनसि स्वस्य कथने आचरणे च अपि सन्देहः भवति स्म। यदा मङ्गलः ततः अगच्छत् तदा प्रकोष्ठस्य द्वारं पिधाय अधः आगता। तत्समये एव शङ्करः स्वस्मात् गृहात् बहिः निर्गच्छन् आसीत्। सः द्वारे स्थितायाः श्वश्रोः समीपं गत्वा पृष्टवान्- "मङ्गलभ्राता अगच्छत् किम्?" इति।

"आम्"।

"हस्ताङ्कनं कर्तुं तेन स्वस्य अङ्गीकारः प्रदत्तः वा?"

"नैव!"

"एवं सति भूमिविक्रयणं कथं भवेत्? रूप्यकाणि सर्वाणि समाप्तानि जातानि। इदानीं जीवननिर्वाहः कथं भवेत् भवत्याः? भूमेः विक्रयणस्य अधिकारं मङ्गलः न ददाति। सः रामोः अन्वेषणम् अपि न कुर्यात्। मम तु भयं भवति कदाचित् रामुः प्राप्येत चेत् अपि मङ्गलः तं मारयेत् एव। तदनन्तरं सः भूमेः स्वामित्वं प्राप्तुं यत्नं कुर्यात्। ततः पुत्रवध्वाः दासिनी सती जीवनपर्यन्तं तया दीयमानां रोटिकां भवती खादेत्"।

सा तूष्णीं भूत्वा सर्वं शृण्वती आसीत्। तस्याः मौनं दृष्ट्वा- "इदानीं तु अहं कार्यं कर्तुं गच्छामि। मध्याह्ने यदा आगमिष्यामि तदा अस्मिन् विषये चिन्तयिष्यामः" इति उक्त्वा शङ्करः प्रस्थानम् अकरोत्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

माता उपविश्य समस्याविषये चिन्तयन्ती आसीत्। तत्क्षणम् एव सोहनी तत्र आगता। सा मङ्गलेन उक्तं प्रस्तावं श्रुत्वा ततः मातरम् अवदत्- "मातः। भ्रातृजायायाः तिरस्कृतवचनानां श्रवणस्य अपेक्षया अत्र बुभुक्षया मरणम् एव वरम्" इति।

मङ्गलस्य मातुः मनसि रामोः पलायनात् अनन्तरं तादृशी अव्यवस्था समुत्पन्ना येन सा कस्यापि विषयस्य पूर्वापरं चिन्तयितुं न शक्नोति स्म। तस्याः एषा अवस्था सागरे नौका इव आसीत्। यस्यां नौकायां कश्चन धीवरः अपि नास्ति। तथा च सा नौका वायुना नीयमाना भवति।

आपणे लालनत्थूमलः पुत्रं शङ्करम् अपृच्छत्- "किं शङ्कर! तव श्यालः किम् उक्त्वा गतः?" इति।

"सः अवदत्- 'अहं दानपत्रे हस्ताङ्कनं न करिष्यामि। यदि मातुः समीपे भोजनार्थं किमपि अवशिष्टं नास्ति तर्हि सा ग्रामं प्रत्यागच्छेत्। अहं तस्याः अन्नवसनयोः व्यवस्थां करिष्यामि" इति।

"ततः तव श्वश्रूः किं वदति?"

"सा किमपि निश्चयं कर्तुं न शक्तवती। यथा मङ्गलः मातुः कथनमात्रेण विभाजनपत्रे हस्ताङ्कनं कृतवान् तथा एव विक्रयणस्य अधिकारपत्रे अपि हस्ताङ्कनं कुर्यात् इति अस्माकं चिन्तनम् आसीत्"।

"तेन सह अर्चकः आगतः आसीत् खलु। सः एव बाधां जनितवान् स्यात्। अहं तु तं दृष्ट्वा एव ज्ञातवान् आसं यत् अस्माकं कार्यं सफलं न भविष्यति.........
"रामोः प्रत्यागमनात् पूर्वम् एव हस्ताङ्कनकार्यं समापनीयं नोचेत् अस्माकं योजना विफला भविष्यति"।

"पितः! अहं तु तिलेषु तैलम् अपश्यन् अस्मि। यत् किञ्चित् आसीत् तत् सर्वं नष्टम् इव"।

"पश्य शङ्कर! एकादशसहस्रे प्रायशः त्रिचतुराणि सहस्ररूप्यकाणि एव व्ययितानि। आभूषणानां मूल्यम् अपि प्रायशः षट् वा सप्तसहस्रं भवेत्। एतत् सर्वं तु अस्माकं वशे अस्ति। केवला भूमिः अवशिष्टा अस्ति। एषा अपि कथञ्चित् वशीकरणीया। रामुः अभविष्यत् तर्हि परिणामः अन्यः एव अभविष्यत्। इदानीम् अस्याः वृद्धायाः आजीविकायाः प्रश्नः अस्ति। सा जीवनपर्यन्तम् अत्रैव तिष्ठेत्। रूक्षं शुष्कं च भोजनं तस्यै दास्यामः। वयं न दास्यामः चेत् अपि मङ्गलः लोकरीत्या तस्यै अन्नवसनं दास्यति एव। अन्ततोगत्वा सा मङ्गलस्य माता अस्ति खलु"।

मङ्गलः बृजलालः च नगरात् प्रत्यागच्छन्तौ मार्गे एतत् एव सम्भाषणं कुर्वन्तौ आस्तां यत् रामोः गृहात् पलायनस्य एकं वर्षम् व्यतीतं तथापि माता तस्य अग्रजाय

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सन्देशं न प्रेषितवती। आश्चर्यजनकः विषयः एषः। काचित् माता पुत्रस्य अपेक्षया अन्येषु जनेषु कथं विश्वसितुं शक्नुयात्? सर्वाधिकः विस्मयः तु एतदर्थं भवति यस्य कनिष्ठस्य पुत्रस्य कारणात् ज्येष्ठेन पुत्रेण सह सा कलहं कृतवती, तस्य एव कनिष्ठस्य पुत्रस्य पलायनेन मातुः कापि चिन्ता न दृश्यते स्म। बृजलालेन उक्तम् आसीत्- मङ्गलभ्रातः, निश्चयेन भवतः मातरि तस्याः जामातुः इन्द्रजालस्य प्रभावः अस्ति। येन तस्याः बुद्धिः नष्टा जाता। नोचेत्, किं मातापुत्रयोः सम्बन्धः एवं नष्टं भवितुं शक्यते?" इति।

मङ्गलः एतादृशं विचारं न पुरस्करोति स्म। अतः सः अर्चकस्य वचनं श्रुत्वा अहसत्। सः केवलम् एतत् एव- "मदीयं दौर्भाग्यम् अस्ति यत् अहं मात्रे सुखं दातुं न शक्नोमि। एतत् पुण्यं मदीये भाग्ये नास्ति" इति अकथयत्।

यदा ग्रामं प्राप्य मङ्गलः रामोः पलायनस्य वार्तां मोहिनीम् उक्तवान् तदा सा अवाङ्मुखी सती तां वार्तां श्रुत्वा चिन्ताकुला जाता, अन्यत् सर्वं वृत्तान्तं प्रष्टुं तस्याः बुद्धिः एव न प्रवृत्ता।

तदनन्तरकाले मङ्गलः मोहिनी च यदा कदाचित् एकान्ते उपविशतः स्म तदा रामोः विषयः एव प्रवर्तते स्म। घण्टां यावत् कदाचित् ततोऽपि अधिककालं यावत् तस्य चर्चा भवति स्म। मङ्गलः पुनः पुनः वदति स्म- "अहं रामुं न ताडितवान्। सः ग्राम्यबालिकाः पीडयति स्म। अहं तं पीडयितुं निरुद्धवान् आसम्। किन्तु सः मम वचनपालनं निराकरोत्। अहं तु केवलं तस्य कर्णस्य आकुञ्चनं कृतवान् आसम्" इति।

"किन्तु माता तु बुद्धिमती आसीत्। तस्याः किं जातम्? सर्वा सम्पत्तिः वृथा नष्टा जाता। इदानीं भूमिविक्रयणं कर्तुम् इच्छति। शेषं जीवनं किं पुत्र्याः श्वशुरालये पात्राणां क्षालने व्यतीतं करिष्यति?"

एवं चिन्तनस्य अनन्तरम् अपि तौ किमपि समाधानं प्राप्तुं न शक्नुतः स्म। रामोः अन्वेषणार्थं तयोः सामर्थ्यम् अपि न आसीत्। न च काचित् युक्तिः ताभ्यां ज्ञायते स्म। अस्यां परिस्थितौ ताभ्यां केवलः वार्तालापः एव क्रियते स्म।

अस्मिन् वर्षे वृष्टिः न अभवत्। परितः 'त्राहि-त्राहि' शब्दः श्रूयते स्म। क्षेत्राणि शुष्काणि जातानि। कूपेषु जलं समाप्तम् इव। आषाढमासः गतः। श्रावणमासः आगतः, ततः भाद्रपदमासः आश्विनः च आगत्य गतः, किन्तु वृष्टिः न जाता। कूपसमीपस्थेषु क्षेत्रेषु किञ्चित् कृषिकार्यं जातम्। किन्तु तेन किम्? ग्रामीणाः तु वृथा उपविष्टाः आसन्।

मङ्गलः गृहनिर्माणार्थं यदा इष्टिकाः निर्मापयितुम् आरब्धवान् तदा बहवः अहमहमिकया कार्यं कर्तुम् आगताः। किन्तु एकस्य गृहस्य निर्माणकार्ये सर्वे ग्रामीणाः तु कार्यं कर्तुं न शक्नुवन्ति, इत्थं दुर्भिक्षकारणेन उत्पन्ना विकरालसमस्या सर्वेषां पुरतः उपस्थिता आसीत्। एषा समस्या ग्रामीणानाम् एव न आसीत्। सम्पूर्णे देशे दुर्भिक्षं प्रसृतम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आसीत्। कुल्यातटेषु कूपसमीपस्थेषु क्षेत्रेषु च कार्तिकमासस्य उत्पादनं जातम् आसीत्। तत्पश्चात् तु कूपेषु अपि जलं न्यूनम् अभवत्। कृषिकार्यं कथं कर्तुं शक्यते इति चिन्तनीयः विषयः जातः।

माघमासः आसीत्। किन्तु वृष्टेः अभावात् शैत्यस्य प्रभावः न्यूनः आसीत्। मध्याह्नकाले आतपः तीव्रः भवति स्म। धूलियुक्तः आकाशः दृश्यते स्म। क्वचित् कूपसमीपस्थक्षेत्रेषु गोधूमस्य यवस्य च बीजम् उप्तम् आसीत्। मङ्गलेन स्वस्य अधस्तनभूमौ शाकानि उप्तानि आसन्। तथापि सः अस्मिन् वर्षे दशबीघामितायां भूम्याम् एव कर्षणादिकार्यं कर्तुं शक्तवान्।

सायङ्काले मङ्गलः मोहिन्याः समीपम् उपविश्य बालाभ्यां सह क्रीडन् आसीत्। तावता एव तत्र अर्चकः उपस्थितः जातः। मङ्गलः तस्मै उपवेष्टुम् आसनं प्रदाय- "आगच्छतु अर्चकवर्य, ऐहिकं कार्यं कथं प्रवर्तते?" इति पृष्टवान्।

मोहिनी कनिष्ठं पुत्रम् अङ्के स्वीकृत्य गृहस्य अन्तः अगच्छत्। अर्चकः उपविशन् अवदत्- "भ्रातः, ग्रामे जनानाम् स्थितिः अत्यन्तं शोचनीया जाता अस्ति। बहूनां जनानां गृहेषु अन्नं समाप्तं जातम् अस्ति। मंहगुः श्वः कार्यम् अन्वेष्टुं नगरं प्रति गमिष्यति। हृष्टः पुष्टः सः पारिश्रमिकं कार्यं कर्तुं शक्नोति। किन्तु सर्वे तथा न कर्तुं शक्नुवन्ति ....

"निम्मीं जानाति खलु भवान्। यस्याः पतिः गतवर्षे दिवङ्गतः आसीत्। दिवङ्गतस्य तस्य मृतशरीरस्य उपरि माधोनामकः कश्चन प्रतिवेशी वस्त्रखण्डं स्थापितवान् आसीत्। अद्य सा गृहात् निष्कासिता जाता। अहं माधोनामकं प्रतिवेशिनम् अपृच्छम्- 'किमर्थं त्वं तां निष्कासितवान्?"

तदा सः- 'स्वस्य भोजनस्य निमित्तं तु किमपि नास्ति, तस्यै कुतः यच्छानि?' इति वदन् आसीत्। सः अपि उद्योगार्थं नगरं गच्छन् अस्ति ......

"वराकी निम्मी रोदनकारणात् विसंज्ञा जाता आसीत्। ग्रामस्य पश्चिमभागे निवसन् ननकुः स्वस्य गृहस्य सम्मुखे उपविष्टः आसीत्। मां दृष्ट्वा सः- 'अर्चकवर्य! इदानीं तु गृहे अन्नस्य एकः कणः अपि नास्ति। बालाः विलपन्तः रोदनं कुर्वन्तः सन्ति' इति दैन्येन अवदत्।

"अर्चकवर्य! एतत् सर्वं तु अहम् अपि पश्यन् अस्मि। किन्तु कोऽपि उपायः मनसि न स्फुरति। मम पार्श्वे किञ्चित् धनं तु अस्ति। किन्तु तेन कियत्कालं यावत् साधयितुं शक्येत? पश्यतु अर्चकवर्य, एते एव विपत्तौ मम साहाय्यं अकुर्वन्। अधुना अहम् अपि मदीयं सामर्थ्यानुगुणं सर्वम् उपायं कर्तुं सज्जः अस्मि। एषः एव तु मदीयः परीक्षाकालः। यावत् कालं मम पार्श्वे एका अपि वराटिका अस्ति तावत्कालम् अहम् एतेषु

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कमपि बुभुक्षाकारणात् मृत्युमुखं न प्रेषयिष्यामि। परं कश्चन विषयः मया न ज्ञायते यत् मदीये सर्वस्वं समाप्ते सति एतेषां का गतिः भवेत्?" इति मङ्गलः अन्ते सविषादम् अवदत्।

अर्चकस्य मनः बहुभ्यः मासेभ्यः एतादृशे एव विषये प्रवर्तमानम् आसीत्। सः विचारं करोति स्म- 'ग्राम्यजनेषु पलायितेषु सत्सु समस्तः ग्रामः एव निर्जनीभूतं भविष्यति। तस्मात् कारणात् एते ग्रामवासिनः कथञ्चित् रक्षणीयाः' इंति। सः ग्रामवासिनां कृते अनेकाः योजनाः चिन्तितवान् आसीत्। किन्तु ताः व्यर्थाः सन्ति इति चिन्तयित्वा ताः त्यक्तवान् अपि। एतस्मात् एव ऊहापोहात् सः किमपि निश्चयं कर्तुम् अशक्तः जातः। समस्या एषा विकटा जाता आसीत् इत्यतः सः मङ्गलस्य पार्श्वे आगतः आसीत्।

मङ्गलः निरक्षरः। सः एतत् एव जानाति स्म- 'यत् आरब्धं कार्यं नैरन्तर्येण क्रियते चेत् तत् निश्चयेन पूर्णं भवति एव' इति। सः उत्थाय कुलदीपम्- "दीप, मातुः पार्श्वे गत्वा वद यत् अहं ग्रामस्य अटनं कृत्वा आगच्छामि" इति अवदत्।

सः अर्चकम् उक्तवान्- "अर्चकवर्य! ग्रामवासिनः बुभुक्षाकारणात् मृताः न भवेयुः। आगच्छतु, एतेषाम् एकत्र उपवेशनं कृत्वा विचारं कुर्याम यत् अग्रे किं करणीयम्" इति।

"अस्तु भ्रातः, गच्छाव"।

उभौ गृहात् निर्गत्य निर्धनानां वसतिं प्रति प्रस्थितौ। मार्गे अर्चकः मनसि उत्पद्यमानं विचारं मङ्गलम् उक्तवावन्। सः अवदत्- "सर्वे स्त्रीपुरुषाः आबालवृद्धाः च उद्योगम् अन्वेष्टुं ग्रामात् बहिः गन्तुं न शक्नुवन्ति। ग्रामे तु किञ्चित् - किञ्चित् कार्यं कुर्वन्तः सन्ति। किन्तु नगरं गत्वा सर्वे पारिश्रमिकं प्राप्नुयुः एव इत्यत्र सन्देहः अस्ति। तस्मात् तत्र बहवः बुभुक्षया मृताः भवेयुः। यदि ग्राम्यमहिलाः पारिश्रमिकं प्राप्तुं नगरं गच्छेयुः तर्हि चरित्रहीनानां हस्तग्राहे पतित्वा भ्रष्टाः अपि भवेयुः। एतस्य सर्वस्य परिणामः भयङ्करः लज्जास्पदः च भवेत्। काश्चन महिलाः तु पारिश्रमिकं किञ्चित् अप्राप्य अकिञ्चनाः सत्यः भिक्षाटनम् अपि कुर्युः। अन्ततोगत्वा ताः स्वस्य समाजस्य च कृते अनुपयोगिन्यः एव स्युः। भ्रातः, ग्राम्यजनानां नगरं गत्वा कार्यस्य अन्वेषणा, तथा च तत्रत्ये वातावरणे तेषां वासकरणम् इति उभयम् अपि अनर्थकरम् अस्ति। मङ्गल भ्रातः! अहम् अस्मिन् विषये बहु चिन्तितवान् अस्मि। एतेषां नगरगमनं क्षेमकरं नास्ति इति भावयामि" इति।

"किन्तु अस्मिन् समये तु नगरे एव पारिश्रमिकं प्राप्तुं शक्यते"।

"तत् तु प्राप्तुं शक्यते। किन्तु तादृशं किमपि अस्माभिः करणीयं येन कोऽपि अकर्मण्यः न तिष्ठेत्। कोऽपि बुभुक्षितः न भवेत्। कस्मैचित् अपि सकुटुम्बं रात्रियापनाय

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बहिः वासस्य कृते आवश्यकता न भवेत्"।

मङ्गलः स्मितम् अकरोत्। सः उक्तवान्- "केवलम्, एतावत् एव? अर्चकवर्य, एतत् तु कठिनं कार्यं नास्ति। किन्तु एते ग्राम्यजनाः यदि मिलित्वा कस्यचित् नेतृत्वम् अङ्गीकुर्युः तर्हि एव भवता उक्तं सर्वं हितावहं भवेत्" इति।

"यदा एतेषां गृहेषु धान्यम् आसीत् तदा एते परस्परं साहाय्यं कुर्वन्ति स्म। प्रकृतं तु सर्वेषां घटः रिक्तः दृश्यते इत्यतः कोऽपि अन्यस्मै साहाय्यं न करोति। सर्वे स्वस्य विषये एव चिन्तयन्तः सन्ति। येषां समीपे दिनस्य कृते भोजनं भवति, ते तत् गोपयन्ति। यतः केनचित् किञ्चित् भोजनं न याचेत"।

"अर्चकवर्य, मम स्थूलबुद्धौ कश्चन उपायः स्फुरति। यदि सर्वे अङ्गीकुर्युः तर्हि सः उपायः क्रियान्वितः भवेत्"।

"शतं जीवतु मङ्गलभ्रातः, सः उपायः निश्चयेन क्रियताम्। निम्मी वदति स्म- 'अहं नगरं गत्वा वेश्यावृत्तिम् आचरितुं शक्नोमि। किन्तु वञ्चकस्य माधोनामकस्य जनस्य गृहं न प्रत्यागमिष्यामि' इति। भ्रातः, अस्माभिः निम्मी रक्षणीया। तस्याः चरित्रं नष्टं चेत् ग्रामस्य अपयशः भवेत्"।

एवम् उभौ संलपन्तौ निर्धनवसतिं प्राप्तवन्तौ। चौधरिचन्नोः गृहं प्राप्य अर्चकः उच्चैः आह्वानं कृतवान्- "चौधरि चन्नो!" इति।

कश्चन वयोवृद्धः हस्तेन धूमपानयन्त्रं स्वीकृत्य मन्दं चलन् गृहात् बहिः आगच्छत्। सः मङ्गलं दृष्ट्वा प्रसन्नः सन्-

"अहो, मङ्गलः आगतः अस्ति" इति वदन् कन्हैयनामकं पुत्रम्- "अरे कन्हैय, अत्र खट्वां प्रसारय" इति उक्तवान्।

तस्य वयोवृद्धस्य युवा पुत्रः यस्य भोजनाभावात् कपोलद्वयम् सङ्कुचितं जातम् आसीत्, बहिः आगत्य द्वारस्थितां खट्वां तत्र प्रसारितवान्।

अर्चकः मङ्गलः च खट्वायाम् उपविष्टवन्तौ। तदा मङ्गलः अवदत्- "चौधरि, त्वम् अपि उपविश!" इति।

पिता पुत्रः च भूमौ उपविष्टवन्तौ। मङ्गलः विषयस्य आरम्भं कुर्वन्- "चौधरि, कियान् कठिनः कालः आगतः खलु"! इति अवदत्।

"आं मङ्गल, भगवतः कोपः एव अत्र कारणम्"।

"किन्तु वयं मानवाः स्मः, पशवः न। अतः एव येन केनापि प्रकारेण मानवाः एव भवितुम् इच्छामः"।

"किन्तु मङ्गल, बुभुक्षापीडितम् एतत् उदरम् एव तत् सर्वं कार्यं कारयति यत् कश्चन पशुः अपि कर्तुं न इच्छेत्। अर्चकवर्यः काञ्चित् मैनां जानाति। सा तव पुत्रस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मातृभगिन्याः पुत्री अस्ति। बुभुक्षया पीडिता सती सा कार्यम् अन्वेष्टुं नगरं गतवती आसीत्। किन्तु कुत्रापि कार्यं न प्राप्तवती। नैराशयेन सा ततः प्रत्यागता। भ्रातः, किं पुत्रवधूनां पुत्रीणां च नगरं प्रति गमनं श्रेयस्करम् अस्ति? तत्र तु सर्वविधाः जनाः वसन्ति"।

एतत् सर्वं श्रुत्वा मङ्गलेन महत् दुःखम् अनुभूतम्। सः अवदत्- "चौधरि, एकदा यूयं सर्वे ग्रामीणाः मम साहाय्यं कृतवन्तः। युष्माभिः कृतं साहाय्यं कदापि विस्मर्तुं न शक्नोमि। यदि अहं कुबेरः अभविष्यं तर्हि सर्वेषां गृहेषु धनम् अपूरयिष्यम्। किन्तु अहम् एकः एव अस्मि। अत्र तु बहवः अपेक्षमाणाः सन्ति। तथापि यावत्कालम् अहं जीवितः अस्मि, यावत् च मम गृहे अन्नस्य एकः कणः अस्ति, यत् किञ्चित् रोकधनं वा अस्ति तावत् एकः अपि जनः बुभुक्षया मृतः न भविष्यति। मैनायाः विषये प्रवृत्तं सर्वं त्वया पूर्वम् एव वक्तव्यम् आसीत्" इति।

"भ्रातः, त्वं खलस्य द्वारम् अस्माकं कृते उद्घाटयिष्यति इति अहं न जानामि स्म। किन्तु त्वदीये खले कियत् अन्नम् अवशिष्टम् अस्ति इत्यपि वयं जानीमः एव। सप्ताहं यावत् सर्वेषां कृते आपूर्तिः भवेत्। तदनन्तरं त्वम् अपि अस्माभिः सह मृत्युमुखं गच्छेः" इति।

"किन्तु पितृव्य! बुभुक्षापीडितं त्वाम् एवं द्रष्टुं न शक्नोमि। यदा तव गृहस्य महिलानां मानप्रतिष्ठादिकं नश्यति तस्मिन् दिने तु अहं कण्ठे पाशं बद्ध्वा मृत्युमुखं गच्छेयम्। अहम् तत् द्रष्टुं न शक्नोमि। पश्य पितृव्य, अद्य इदानीम् एव मम गृहस्य पुरतः सार्वजनिकसभां कुरु। अहं युष्मान् किमपि उपायं वदिष्यामि। सर्वेषां कृते भोजनस्य अपि प्रबन्धनं भविष्यति" इति मङ्गलेन वयोवृद्धः उक्तः।

३

"भ्रातरः! मन्दबुद्धेः मम वार्तां शृण्वन्तु" इति मङ्गलः ग्रामसभायाम् एकत्रितान् जनान् बोधयन् आसीत्- "कस्मिंश्चित् कुटुम्बे पञ्च भ्रातरः आसन्। तेषु एकः चौधरिरूपेण कार्यं करोति स्म। अपरः रुग्णः आसीत्। पिता अपि धनार्जनं करोति स्म। उद्यमिषु भ्रातृषु कश्चन- 'मया अर्ज्यमानात् धनात् रुग्णाय भ्रात्रे किमपि न दास्यते' इति अवदत्। तस्य वचनेन पितुः कोपः आगतः। सः अकथयत्- 'मयि जीविते सति एवं न भविष्यति। सर्वैः अर्जितं धनम् एकत्र सङ्गृहीतं भवेत्। तस्मात् सङ्गृहीतात् धनात् एतस्य रुग्णस्य अपि पालनं भविष्यति। एकस्याः एव मातुः कुक्षेः उत्पन्नानां एतादृशं भेदभावकरणं महत् पापम् अस्ति' इति। यावत् पर्यन्तं पिता जीवितः आसीत् उद्यमिनः कार्यं कुर्वन्ति स्म। चौधरिरूपेण कार्यं कुर्वन् पिताः बुद्धिबलेन सर्वान् सुमार्गं प्रति आनयन् आसीत्। सर्वेषां प्रयत्नकरणेन रुग्णः भ्राता अपि रुग्णतासमयं कथञ्चित् अयापयत्। महिलाः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मानप्रतिष्ठापूर्वकं गृहे वासं कुर्वत्यः बालानां लालनं पोषणं च कुर्वन्ति स्म ....

"दुर्दिनकाले पिता दिवङ्गतः। तदनन्तरं भ्रातरः पृथक् एव जीवनं यापयितुम् आरब्धवन्तः। पञ्चगृहाणि पञ्चपाकचुल्लिकाः च जाताः। सर्वप्रथमं चौधरिनाम्ना ख्यातस्य पुत्रस्य स्थितिः शोचनीया अभवत्। तेन कस्यचित् धनाढ्यस्य पार्श्वे उद्योगः करणीयः अभवत्। सम्भाषणकलायां निपुणः इति कारणेन सः उद्योगात् प्राप्यमाणेन धनेन स्वस्य कुटुम्बस्य जीवननिर्वहणं करोति स्म। परिश्रमेण जीवननिर्वहणं कुर्वन्तः अन्ये भ्रातरः अपि पृथक् - पृथक् वासम् अकुर्वन्। यत्र पूर्वं संयुक्तकुटुम्बे सर्वं व्ययीकृत्य किञ्चित् धनम् अवशेष्यते स्म तत् इदानीं पृथक्तया चुल्लिकाप्रज्वालनेन कस्यचित् अपि उदरं पूर्णं न भवति स्म। सर्वाणि कुटुम्बानि कष्टगर्ते अपतन्। अतः अहं वदामि यत् एषः अस्माकं विपत्तिकालः अस्ति। सर्वे मिलित्वा यदि प्रयत्नं कुर्याम तर्हि सर्वे भोजनं प्राप्तुं शक्नुयुः"।

वयोवृद्धः कश्चन अवदत् - "वयं तु भोजनम् इच्छामः। तदर्थं त्वं यथा कर्तुं वदिष्यसि तथा एव वयम् आचरिष्यामः"।

"ये मम वचनं पालयितुम् इच्छन्ति ते अत्र उपविशन्तु। अन्ये इतः गच्छेयुः"।

तत्र ते एव जनाः आगताः आसन् ये मङ्गलस्य वचने विश्वसन्ति स्म। सर्वे उपविष्टाः आसन्। इदानीं मङ्गलः- "यावन्तः युवानः सन्तिः तैः मया सह श्वः नगरं गन्तव्यम्। सूर्योदयात् पूर्वं इतः प्रस्थानं कृत्वा सूर्योदयसमये अन्नविपणिं प्राप्स्यामः। अस्मत्सु यः कोऽपि पारिश्रमिकं प्राप्य, सायंकालात् पूर्वम् एव ग्रामं प्रत्यागच्छेत्। सर्वेषां पारिश्रामिकात् प्राप्तं धनम् एकत्र स्थापयिष्यते। तथा च सर्वेषां कृते भोजननिर्माणं मम गृहे एव भविष्यति। ये जनाः कार्यं करिष्यन्ति याः च महिलाः पाककार्यं करिष्यन्ति ते सुकुटुम्बम् अत्र भोजनं कर्तुं शक्नुयुः। यदि सर्वं व्ययीकृत्य किञ्चित् धनम् अवशिष्टं भवेत् तर्हि तत् परस्परं विभज्य स्वीकरिष्यामः।......... भवन्तः सर्वे अद्य आरभ्य प्रातः सायं च मम गृहे एव भोजनं कुर्वन्तु। नगरे कार्यं कुर्वतां कर्मकराणां कृते मध्याह्नभोजनम् इतः एव प्रेषयिष्यते"।

एतां योजनां सर्वे न अवगतवन्तः। मङ्गलः पुनः अवदत्- "पश्यन्तु भ्रातरः! मम योजनां भवन्तः अवगतवन्तः उत न इति मुख्यः न। अहं विश्वासेन वदामि यत् यावत् कालं मम धान्यागारे एकः अपि कणः अस्ति तावत् एकः अपि बुभुक्षया मृतः न भविष्यति। किन्तु यदि कार्यम् अकुर्वन्तः एव खादेम तर्हि मासाभ्यन्तरे एव सर्वं समाप्तं भवेत्। एतत् दुर्भिक्षं कदा पर्यन्तं तिष्ठेत् इति कोऽपि न जानाति। अतः भवत्सु ये कार्यकरणे समर्थाः सन्ति तैः निश्चयेन करणीयम्। एकं विषयम् अहम् इतोऽपि वक्तुम् इच्छामि यत् ग्राम्यमहिलाभिः कार्यं कर्तुं नगरं प्रति गन्तव्यं नास्ति। यावत् पुरुषाः कार्यं कर्तुं शक्ताः सन्ति तावत् महिलाः ग्रामे एव गृहकार्यं कुर्युः" इति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मङ्गलस्य वचनं श्रुत्वा चौधरिचुन्नुः सभास्थितान् जनान् उक्तवान्- "भ्रातरः! मङ्गलस्य वचनम् अत्यन्तं सारगर्भितम् अस्ति। एतत् सत्यम् एव यत् कस्यचित् जन्मदातुः पञ्च सन्तानाः एकत्र वासं कर्तुं न शक्नुवन्ति। तर्हि वयं भिन्न - भिन्नमातापितृणां सन्तानाः कथं एकत्र वासं कर्तुं शक्नुयाम? एषः कठिनः समयः अस्ति। अतः अहं प्रार्थये सर्वे सङ्घटिताः भवन्तु। तथा च, यथा यथा मङ्गलभ्राता वदति तथा तथा वयम् अनुपालयेम" इति।

अर्चकः बृजलालः स्वस्मिन् कार्ये मग्नः आसीत्। यावत् कालं ग्रामसभा प्रचलन्ती आसीत्, तन्मध्ये एव सः धान्यागारतः धान्यं निष्कास्य पेषणयन्त्रेण पेषणं कारितवान् आसीत्। तदनन्तरम् अनेकाः चुल्लिकाः प्रज्वाल्य तत्र रोटिकाः निर्मापितवान् आसीत्। ग्रामसभायाम् उपस्थितानां सर्वेषां कृते चतस्रः रोटिकाः माषस्य सूपः च सिद्धः आसीत्। अर्चकः उपस्थितानां कुटुम्बसदस्यानां कृते भोजनार्थं सन्देशं प्रेषितवान्। प्रातःकाले नगरगन्तृणां कृते अपि भोजनं बद्ध्वा रात्रौ एव स्थापितवान् सः।

प्रातःकाले पञ्चाशत् सबलाः जनाः स्व-स्वभोजनपोटलिकां स्वीकृत्य मङ्गलेन सह विपणिं प्राप्तवन्तः। निरुद्योगितायाः दुर्भिक्षस्य च कारणतः तत्र पूर्वम् एव आगतानां कर्मकराणां संख्या अधिका आसीत्। एतस्यां स्थितौ पञ्चाशतः जनानाम् इतोऽपि आगमनं सर्वेषु कर्मकरेषु विक्षोभम् अजनयत्। किन्तु विक्षोभे जाते सति अपि मङ्गलः सर्वेषां कृते कार्यव्यवस्थां कृतवान्।

प्रायशः दशवादनपर्यन्तं सर्वे एव पञ्चाशत् कर्मकराः कार्यं कुर्वन्तः आसन्। मङ्गलः अपि कार्यम् अन्वेष्टुं नगरे इतस्ततः अटति स्म। यत्र गृहं निर्मीयमाणम् आसीत्, यत्र खननं कुट्टनं च जायमानम् आसीत्, यत्र च किमपि कार्यं प्रचलत् आसीत् तत्र सर्वत्र सः पृच्छां कृत्वा अनुनयं कृत्वा च स्वस्य जनान् कार्येषु नियोजितवान्। सः द्वितीयस्य दिनस्य कृते अपि कार्यनिश्चयं कृत्वा ततः कस्यचित् कूपस्य वेदिकायाम् उपविश्य आत्मना आनीतं भोजनं कर्तुम् उद्यतः जातः।

यदा सः भोजनं कुर्वन् आसीत् तावता एव तस्य पुरस्तात् एव सोहनी तन्माता च नत्थूमलस्य कारयानेन गच्छन्त्यौ आस्ताम्। सोहनी रोटिकां खादन्तं भ्रातरम् अपश्यत्। सोहन्याः मनसि एषः भावः आगतः- 'मङ्गलस्य जीवने अनुत्तमानि दिनानि आगतानि' इति। सा मातरम् उक्तवती- "पश्यतु, मङ्गलभ्राता कूपस्य वेदिकायाम् उपविश्य रोटिकां खादन् अस्ति" इति।

"एवं भाति यत् सः कयाचित् विपदा ग्रस्तः अस्ति" इति माता उक्तवती।

"वाहनं स्थगयित्वा पृच्छानि किम्?"

Funding by IKS-MoE

"त्यजतु तम्। किं सः अस्मान् प्रष्टुम् आगच्छति?"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"किन्तु मातः! वयम् अस्माकं स्थितेः विषये कदापि सूचनाम् अपि न दत्तवन्तः खलु?"

माता निरुत्तरा जाता।

सोहनी तूष्णीम् अभवत्। तस्याः मनसि आपद्ग्रस्तं भ्रातरं दृष्ट्वा दयाभावः उत्पन्नः जातः। किन्तु अनन्तरक्षणे सः भावः लुप्तः अपि जातः।

तस्मिन् सायङ्काले सर्वे पञ्चाशत् ग्राम्यजनाः एकत्रिताः सन्तः ग्रामं प्रत्यागताः। तेषां प्रत्यागमनकाले अर्चकः सर्वान् अवदत्- "भवतां कृते मङ्गलस्य गृहे एव पाककार्यं सिद्धम् अस्ति। भवतां गृहिण्यः एव मिलित्वा पाकं कृतवत्यः। वाटिकास्थितेन कूपज़लेन स्नानं कृत्वा रात्रिभोजनं कुर्वन्तु" इति।

सर्वे अर्चकस्य बृजलालस्य पार्श्वे स्वस्य पारिश्रमिकं न्यस्तवन्तः। आहत्य पञ्चषष्टिः रूप्यकाणि आसन्। सर्वे आकण्ठं भोजनं कृत्वा निद्रातुं स्वगृहं प्रति गतवन्तः। तदनन्तरं तेषां गृहिण्यः आगामिदिनस्य कृते भोजनं निर्मातुम् उद्यताः अभवन्।

अर्चकः सर्वेषां गोवृषभाणां कृते आहारस्य व्यवस्थाम् अपि करोति स्म। सायङ्काले प्राप्तेन दुग्धेन दधिनिर्माणं क्रियते स्म। प्रातः दधिमथनं कृत्वा सर्वेभ्यः पातुं दाधिकं दीयते स्म। दिने प्राप्यमाणात् दुग्धात् नवनीतं ततः घृतं कृत्वा नगरं प्रति विक्रयणार्थं प्रेष्यते स्म।

एवमेव प्रतिदिनं कार्यम् अनुवर्तते स्म। क्रमशः एतादृशव्यवस्थायाः आश्रयणेन आगन्तुकानां ग्राम्याणां संख्या अधिका जाता। आयः अधिकः जातः। सुष्ठु प्रबन्धनकारणतः व्ययः अपि न्यूनः जातः। पशूनां रक्षणकारणतः कानिचित् वृषभशकटानि नगरे वस्तूनि वोढुं प्रेष्यन्ते स्म। दुग्धस्य विक्रयणम् अपि भवति स्म।

मङ्गलस्य धान्यागारे बहु अधिकम् अन्नं न आसीत्। तस्मात् कारणात् विपणितः आवश्यकतानुसारम् अन्नं क्रीत्वा आनेतव्यम् अभवत्। मङ्गलस्य बुद्धौ स्फुरितः उपायः, अर्चकस्य बृजलालस्य सुष्ठु प्रबन्धनं च विकासाय श्रेयस्करं जातम्। अपि च मङ्गले विश्वासं कुर्वद्भिः ग्राम्यजनैः परिश्रमं कृत्वा सुखं प्राप्यमाणम् आसीत्।

मासानन्तरं यदा गणना जाता तदा शतस्य रूप्यकाणां लाभः जातः मङ्गलः विपणितः वस्त्राणि क्रीत्वा सर्वेभ्यः अयच्छत्। बालानां कृते अपि पठनस्य लेखनस्य च व्यवस्था तेन कृता आसीत्।

मङ्गलः प्रतिदिनं शतस्य जनानां कृते उत्तमं कार्यम् अन्वेष्टुम् प्रयत्नं करोति स्म। अर्चकः बृजलालः सर्वेषां कृते अन्नवसनयोः व्यवस्थां पश्यति स्म। पाकस्य परिवेषणस्य च प्रमुखं दायित्वं मोहिन्याः आसीत्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

४

बहून् मासान् यावत् एषः एव क्रमः अनुवर्तते स्म। इदानीं किञ्चित् नूतनं काठिन्यम् उपस्थितं जातम्। तन्नाम एतस्मिन् वर्षे अपि वृष्टिः न जाता। कूपेषु इतोऽपि जलं शुष्यमाणम् आसीत्। अन्येभ्यः ग्रामेभ्यः अपि जनाः पारिश्रमिकं प्राप्तुं नगरम् आगच्छन्तः आसन्। सहस्रं जनाः नित्यं पारिश्रमिकं प्राप्तुं विपणिं प्रति गच्छन्ति स्म। तेषु उपपञ्चशाः जनाः किमपि पारिश्रमिकम् अप्राप्य स्वग्रामं प्रत्यागच्छन्ति स्म।

पूर्वं मङ्गलस्य अविरतेन प्रयत्नेन तस्य ग्राम्यजनाः किमपि कार्यं प्राप्नुवन्ति स्म। किन्तु इदानीं पारिश्रमिकं न्यूनं जायमानम् आसीत्। निरुद्योगिता प्रवृद्धा जाता। खादितुं यत् अन्नं चिपणितः क्रीयमाणम् आसीत् तत् अपि महार्घं जातम्। बुषस्य अभावात् पशवः म्रियमाणाः आसन्। एषा विकटा समस्या ग्रामवासिनां पुरतः उपस्थिता जाता। किन्तु मङ्गलेन दत्तस्य वचनस्य पालनं कृतम् एव। वस्तूनां क्रयणे धनस्य यावती न्यूनता भवति स्म स्वस्य परतया एव ददाति स्म। शाकानाम् उत्पादनम् अपि जलस्य अभावात् न्यूनं जातम्। उत्पादने न्यूनताकारणात् वृष्टेः अभावात् च वायौ शुष्कता प्रवृद्धा। परिणामतः शाकेषु रसाभावः जातः।

अथैकदा सर्वे जनाः भोजनं समाप्य विश्रामं कर्तुं स्वगृहं गतवन्तः। तस्मिन् समये चौधरिचन्नुः बृजलालमङ्गलाभ्यां सह वार्ताम् आरभत। अर्चकः बृजलालः अवदत्- "मङ्गलभ्रातः, एषः क्रमः कदापर्यन्तम् अनुष्ठीयमानः भवेत्?" इति।

"अर्चकवर्य, एतादृशम् आयोजनं यदा आरब्धं तदा आयः अधिकः, व्ययः च न्यूनः आसीत्। किन्तु अन्ये ग्रामवासिनः नगरम् आगत्य यदा भृतिम् आरब्धवन्तः तदा आरभ्य अस्माकं निरुद्योगिता प्रवृद्धा जाता। तस्मात् कारणात् आयः न्यूनः जातः। महार्घताकारणतः व्ययः अपि अधिकः जायमानः अस्ति। आ नवमासेभ्यः एषा एव स्थितिः अनुस्रियमाणा अस्ति। प्रतिमासं प्रायशः सार्धैकसहस्रस्य रूप्यकाणां हानिः जायमाना अस्ति। अधुना मदीयः धनराशिः पञ्चविंशतेः सहस्रात् न्यूनीभूय केवलं दशसहस्रं जातम् अस्ति। मम तु एवं भाति तत् दिनं समीपम् आगच्छत् अस्ति यदा सर्वमपि मदीयं धनम् एतस्मिन् कार्ये एव समाप्तं भवेत्। तस्याः परिस्थितेः आगमनात् पूर्वं यदि भगवतः कृपा स्यात् तर्हि अस्माकं मानः मर्यादा च रक्षिते स्याताम्। नोचेत् वयं कष्टगर्ते पतेम" इति मङ्गलः विवृतवान्।

"मम विचारः अस्ति यत् तस्याः अवस्थायाः आगमनात् पूर्वम् अस्माभिः केचन जनाः अन्यत् नगरं प्रति प्रेषणीयाः" इति अर्चकः उपायम् अवदत्।

Funding by IKS-MoE

"किन्तु ते एव गन्तुं शक्नुवन्ति ये योग्याः स्युः। मूलभूता समस्या तु स्त्रीणां

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बालानां वयोवृद्धानां च अस्ति। ते बुभुक्षया मृताः भवेयुः"।

तदनन्तरं चौधरिचन्नुः अवदत्- "मङ्गल, त्वम् अत्यन्तम् उपकारम् अकरोः। वयं त्वया दत्तं प्रत्यर्पयितुं न शक्नुमः। अधुना इतोऽपि त्वत्तः स्वीकरणं पापाय भवेत्। मम विचारः तु एवम् अस्ति- 'इतोऽपि सर्वेषां साहाय्यकरणम् अशक्यम् इति त्वं श्वः सर्वान् सूचय' इति। ततः सप्ताहाभ्यन्तरे सर्वे स्वस्य स्वस्य प्रबन्धनं कुर्युः"।

मङ्गलः तूष्णीम् आसीत्। तस्य मनसि द्वैधीभावः आसीत्। किं, सत्यम् एव सः सर्वेषां साहाय्यस्य प्रत्युपकारं कृतवान्? एकः अपरः विचारः अपि तस्य मनसि उद्भूतः जातः। सः चिन्तयति स्म- 'यदि मम साहाय्यस्य त्यागात् कस्याश्चित् महिलायाः सतीत्वं नश्येत् तर्हि सर्वं पापस्य फलं मदीयम् एव स्यात्। प्रायशः यत्किमपि मम पार्श्वे अस्ति तत् सर्वम् एतेषां परिश्रमकारणेन एव। अधुना अस्मिन् सङ्कटकाले यदि मदीयं वस्तु एतेषाम् उपयोगाय न भवेत् तर्हि कृतघ्नतायाः दोषारोपः मयि स्यात्। यदि मम पार्श्वे किमपि अवशिष्टं न भवेत् तर्हि अहम् अपि अन्यः इव सामान्यः भवेयम्। इतोऽपि का हानिः भवेत्'। इति।

एवं चिन्तनस्य पश्चात् मङ्गलस्य मनसि पत्नीपुत्रादिभिः क्रियमाणं भिक्षाटनदृश्यं पुरतः आगतम्। एतत् विचिन्त्य सः अकम्पत। किन्तु पुनः मनः दृढं कृत्वा- 'मया कीदृशम् अनुचितं कार्यं कृतं येन भगवता मह्यं कठोरः दण्डः दीयेत' इति अचिन्तयत्।

यदा सः बहुकालं तूष्णीम् उपाविशत् तदा अर्चकः अचिन्तयत्- 'मङ्गलस्य मनसि चौधरिचन्नोः वचनं दृढं जातं स्यात्। सः अवदत्- "तर्हि मङ्गल, अहं श्वः सर्वान् स्वस्य व्यवस्थां कर्तुं सूचयिष्यामि। किन्तु त्वया कानिचित् दिनानि ग्रामात् बहिः गन्तव्यम्। मोहिन्या बालैः च सह इतः गमनम् एव वरं भवेत्" इति।

"किमर्थम्?"

"एतदर्थं यत् यदा एते वराकाः बुभुक्षया पीडिताः सन्तः मृताः भविष्यन्ति तदा अन्येषां मनोवृत्तिः अपि प्रतिकूला भवेत्। बुभुक्षया पीडिताः सन्तः एते जघन्यं पापम् अपि कुर्युः। एतत् सर्वं द्रष्टुम् अशक्नुवन् त्वम् अत्यन्तं दुःखम् अनुभवेः"।

"पश्यतु अर्चकवर्य! अहम् इदानीं किमपि निश्चयं न अकरवम्। भवान् इदानीम् एतान् किमपि न वदतु। अहं श्वः मृश्य निर्णयं वदिष्यामि। तथापि एतत् भवद्भिः निश्चयेन अवगन्तव्यं यत् यदि मया ग्रामात् बहिः अन्यत्र गन्तव्यं भवेत् तर्हि सर्वं मदीयं वस्तु एतेभ्यः समर्प्य एव गमिष्यामि। केवलं शरीरम् आच्छादयितुं वस्त्रं, रेलयानस्य भाटकार्थं किञ्चित् धनं स्वीकृत्य च गमिष्यामि। मया अर्जितं धनम् अत्रत्यानां कल्याणाय एव भवेत्"।

Funding by IKS-MoE

चौधरिचन्नुः एवम् आचरितुं मङ्गलं न्यवारयत्। किन्तु सः स्वस्मिन् वचसि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दृढः आसीत्। सः ततः उत्तिष्ठन् अवदत्- "मम नितरां दुःखम् अस्ति यत् अहम् एतेषां कष्टं संविभक्तुम् अनर्हः जातः। किन्तु अहम् अत्र भवेयम् उत न, गत्वा पुनः कदा आगमिष्यामि इत्येतत् सर्वं श्वः वदिष्यामि" इति।

रात्रौ गृहं प्राप्य सर्वं वृत्तान्तं सः मोहिनीम् अकथयत्। सा तु पूर्वम् एव पत्युः अर्चकस्य च सर्वं वचनं द्वारस्य पृष्ठतः स्थित्वा श्रुतवती आसीत्। शयनात् प्राक् सा एव "किं कर्तुम् इच्छति भवान्?" इति पतिम् अपृच्छत्।

मङ्गलः अवदत्- "अहं किमपि निश्चयं न अकरवम्। मम यदि स्वस्य एव प्रश्नः अभविष्यत् तर्हि ग्रामं परित्यज्य अन्यत्र कुत्रचित् अगमिष्यम्। किन्तु मोहिनि, त्वां बालकान् च भिक्षुकान् कृत्वा सर्वत्र अटनम् इत्येतत् सर्वं मह्यं न रोचते"।

"काञ्चित् वार्तां वदानि?"

मङ्गलः तस्याः मुखं प्रश्नदृष्ट्या अपश्यत्। ततः मोहिनी- "कुत्रापि गमनं न आवश्यकम्। इदानीं षड्मासपर्यन्तं सर्वेषां प्रबन्धनं कर्तुं धनं तु अस्माकं पार्श्वे अस्ति एव। तावत्पर्यन्तम् एषः एव क्रमः अनुवर्तनीयः। पश्चात् सर्वं द्रक्ष्यामः। एतस्मिन् आपत्काले एतान् असहायान् परित्यज्य अन्यत्र गमनेन कोऽपि लाभः न भवेत्। अहं तु भगवति पूर्णरूपेण विश्वसिमि। किं सः सर्वदा रुष्टः एव भवेत्? पश्यतु, आषाढमासः आगतः अस्ति। दशदिनानां द्वादशदिनानां वा पश्चात् वृष्टिः भवेत् एव। सकृत् वृष्टिः आरब्धा चेत् पुनः न विरमते। गतवर्षस्य सञ्चितं जलम् अपि कार्याय उपयोगि भवेत् एव" इति उक्तवती।

"त्वं बहु आशावादिनी असि मोहिनि?"

"आम्"!

"किन्तु एतत् अपि अवगन्तव्यं वृष्टिः आरब्धा चेत् अपि अनुक्षणं खादितुं न प्राप्येत। अन्नोत्पादने बहवः मासाः अपेक्षिताः भवन्ति। तावत्पर्यन्तं खादितुम् अन्नं तु आवश्यकम् एव"।

"भवतां चिन्तनस्य एकमात्रविषयः एषः एव" इति नैराश्येन अवदत् मोहिनी।

"किन्तु मोहिनि" इति मङ्गलः परिहासेन - "तव गृहनिर्माणस्य इच्छा पुनः अपूर्णा एव जाता। सद्यः इष्टिकानां निर्माणम् अपि जातम्" इति।

"देवः एव यदि न इच्छति तर्हि किं कर्तुं शक्नुयाम"।

"एतेषु दिनेषु ग्राम्यजनेभ्यः कार्यान्वेषणसमये अहं बहून् विषयान् ज्ञातवान्। अहं चिन्तयामि यत् धनार्थं गृहात् प्रस्थानम् आवश्यकम् अस्ति। यदा चौधरिचन्नुः वदति स्म 'अहं ग्राम्यजनान् भाग्यवशान् कृत्वा इतः अन्यत्र गच्छेयम् इति तदा मम मनसि काचित् योजना आयाति स्म"।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"का योजना?"

"नगरस्य कश्चन निवेशकारः मह्यं मतिम् अयच्छत्- 'अहम् अफ्रीकादेशं गच्छेयम्' इति। 'अहं यादृशं परिश्रमम् अत्र कुर्वन् अस्मि तादृशं यदि तत्र कुर्या ' तर्हि पञ्चवर्षाभ्यन्तरे समृद्धः भवेयम्' इति तस्य कथनम् आसीत्।

"तर्हि अहं कुत्र वसेयम्?"

"त्वम् अपि मया सह गमिष्यसि"।

"मम कोऽपि आक्षेपः नास्ति। तत्र गमनाय कियान् व्ययः भवेत्?"

"प्रायशः शतं रूप्यकाणि गमनाय तथा च सहस्रं रूप्यकाणि कार्यम् आरब्धुम् अपेक्षितानि"।

"तावत् एव"।

"आम्। तावत् एव"।

"तथैव भवतु"।

"किन्तु एतत् सर्वं तदा एव कर्तुं शक्नोमि यदा अवशिष्टं धनं ग्राम्यजनेभ्यः अर्पयेयम्"।

"मयि धनस्य कापि लालसा नास्ति। देवः दातुम् इच्छति चेत् पुनः दास्यति एव। अहम् एतत् एव इच्छामि यत् सर्वदा भवता सह निवसेयम्। तन्वा मनसा च भवतः सेवां कुर्याम्" इति मोहिनी मङ्गलम् अवदत्।

५

प्रातः उपचत्वारिंशाः ग्रामीणाः पारिश्रमिकं प्राप्तुं नगरं प्रति गताः। एतेषां पारिश्रमिकं निश्चितम् आसीत्। प्रत्येकं जनः प्रतिदिनम् एकं रूप्यकं प्राप्नोति स्म। एतेभ्यः ऋते पञ्चाशदधिकाः जनाः नित्यं विपणिं गत्वा यत्किमपि कार्यं कृत्वा च पञ्चदश षोडश वा रूप्यकाणि प्राप्नुवन्ति स्म। केचन ग्रामीणाः मङ्गलस्य शाकक्षेत्रेषु कार्यं कुर्वन्ति स्म। यद्यपि कूपेषु जलं स्वल्पम् आसीत्, भूमिः अपि तप्ता आसीत् तथापि स्वल्पप्रमाणेन किञ्चित् तु उत्पद्यते स्म एव।

अत्र कश्चन विशेषः अंशः नाम ग्रामीणैः कार्यं लब्धम् उत न किन्तु भोजनं तु सर्वैः एव प्राप्यते स्म। बालाः वयोवृद्धाः महिलाः आहत्य भोजनकर्तॄणां संख्या चतुश्शतम् आसीत्। तेषां कृते अन्नं विपणितः स्वीक्रियते स्म। वृषभयुतानि शकटानि नित्यं नगरं प्रति नीयन्ते स्म। शाकटिकेषु केचन एव शाकटिकाः कार्यं प्राप्नुवन्ति स्म। तैः प्राप्यमाणं धनं वृषभेभ्यः भोजनार्थं व्ययीक्रियते स्म। सर्वस्य आयस्य व्ययस्य च प्रबन्धनम् अर्चकवर्यः करोति स्म। आहत्य चत्वारिंशतः पञ्चाशतः वा रूप्यकाणां हानिः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रतिदिनं भवति स्म।

पार्श्वस्थेषु ग्रामेषु तु जनाः बुभुक्षया म्रियमाणाः आसन्। युवतयः गृहजनान् परित्यज्य पलायमानाः आसन्। केचन मातापितरः तु बालान् नगरस्य मार्गेषु त्यजन्ति स्म। त्यक्तेषु बालेषु केचन अनाथालयं प्रति नीताः। कांश्चित् बालान् अन्ये ततः नीतवन्तः।

प्रतिदिनं मङ्गलस्य कोषः रिक्तः जायमानः आसीत्। अन्ततोगत्वा मङ्गलः एकदा नगरात् प्रत्यागत्य अर्चकवर्यम् आहूय- "अर्चकवर्य! मम पार्श्वे इदानीम् अष्टसहस्रं धनम् अवशिष्टम् अस्ति। एकसहस्रं पञ्चशतं स्वीकृत्य अहं विदेशं गमिष्यामि। अवशिष्टं धनं भवद्भ्यः समर्पयामि। एतस्य उपयोगं कुर्वन्तु भवन्तः। धनस्य समाप्तेः पूर्वम् एव भगवतः अनुग्रहः भवेत् इति कामये। अपि च यादृश्यः घटनाः अन्येषु ग्रामेषु प्रवर्तन्ते तादृशीभ्यः अनर्थकारीभ्यः घटनाभ्यः अस्माकं ग्राम्यजनाः रक्षिताः भवन्तु" इति शुभाशंसाम् अवदत्।

"कुत्र गच्छति भवान्?"

"नैरोबी .... अफ्रीकाम्। नगरस्य कश्चन निवेशकारः स्वेन सह मां नयति"।

"भवदीया पत्नी अत्र एव स्थास्यति किम्?"

"नैव। सा अपि मया सह गमिष्यति। बालानाम् अपि शासनद्वारा गन्तुम् अनुज्ञापत्रं प्राप्तम् अस्ति"।

मङ्गलस्य निर्णयं श्रुत्वा अर्चकः अवाङ्मुखः जातः। तस्याम् एव रात्रौ मङ्गलः ग्रामसभाम् आहूय सर्वेषां पुरतः अर्चकस्य हस्ते सार्धषड्सहस्रं स्थापयित्वा स्वस्य विदेशगमननिर्णयम् अवदत्।

ये जनाः कार्यार्थं नगरं प्रति गच्छन्ति स्म ते अन्येषां ग्राम्यजनानां दुर्दशाम् अवलोक्य - 'अस्माकं ग्राम्यमहिलाः बालाः च यत् हृष्टाः पुष्टाः सन्ति तत्र कारणं तु तेषां निरन्तरं मिलित्वा कार्यकरणं तथा च मङ्गलेन कृतं समर्पणम् एव' इति चिन्तयन्ति स्म। अद्य मङ्गलेन अर्जितं समस्तं धनं ग्राम्यजनेभ्यः यत् दीयमानम् अस्ति तत् दृष्ट्वा सर्वेषां हृदयं द्रवीभूतं जातम्। सर्वान् परित्यज्य ततः मङ्गलस्य गमनं सर्वेषां कृते अत्यन्तं दुःखदायकम् आसीत्। किन्तु स्वार्थसिद्ध्यर्थं तस्य मार्गे विघ्नम् अपि ते उपस्थापयितुं न इच्छन्ति स्म।

परिस्थितिम् अवलोक्य बहवः ग्रामीणाः रुदन्तः आसन्। किन्तु ते मुखात् किमपि वक्तुं न शक्तवन्तः। मङ्गलः सर्वान् सान्त्वयन्- "भगवतः कोपः समाप्तः चेत्, वृष्टिः भवेत् चेत् मदीयानि सर्वाणि क्षेत्राणि उप्तानि भवेयुः। तदनन्तरं तानि अर्चकवर्यस्य साधिकारक्षेत्राणि भविष्यन्ति। सः यथेप्सितं भूमेः उपयोगं कुर्यात्" इति उक्तवान्।

जनाः मङ्गलस्य औदार्यपूर्णं निर्णयं श्रुत्वा विस्मिताः अभवन्। मङ्गलः ग्रामात् न गच्छेत् इति इच्छन्तः अपि ते तम् अवरोद्धुं न शक्तवन्तः।

Funding by IKS-MoE

यस्मिन् दिने मङ्गलः शकटेन यत् शकटम् अर्चकाय दत्तम् आसीत् तेन नगरं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रति सकुटुम्बं गच्छन् आसीत् तस्मिन् दिने आप्रच्छनं कर्तुं ग्रामस्य सर्वे जनाः ग्रामात् बहिः आगतवन्तः आसन्। अर्चकः चौधरिचुन्नुः केचन अन्ये अपि मङ्गलं रेलस्थानके प्रापयितुम् आगताः आसन्।

येन निवेशकारेण सह मङ्गलः गन्तुकामः आसीत् तस्य अपि आप्रच्छनं कर्तुं बन्धवः आगताः आसन्। मङ्गलस्य आप्रच्छनं कर्तुं तत्र आगतान् दुःखेन रोदनं कुर्वतः जनान् अवलोक्य ते सर्वे विस्मिताः अभवन्। एतस्मिन् मङ्गले कीदृशः गुणः अस्ति येन ग्राम्यजनाः इत्थं वियोगेन रुदन्तः सन्ति?' इति ते मनसि चिन्तयन्तः आसन्।

यदा ते अवगन्तुम् असमर्थाः जाताः तदा तेषु कश्चन अर्चकं बृजलालम् आहूय- "कः पुरुषः एषः?" इति अपृच्छत्।

"देवः अस्ति। भगवतः स्वरूपः अस्ति। अपरिमितः दयावान् अस्ति। किं वदानि महोदय, सः तु अस्माकं सर्वस्वः इव अस्ति" इति मङ्गलस्य गुणगानं कुर्वन् अर्चकवर्यः अवदत्।

एवं सार्वजनिके स्थाने सर्वेषां पुरतः जनैः क्रियमाणेन सहानुभूतिप्रदर्शनेन मङ्गलस्य बहुः सङ्कोचः अभवत्। सः भगवते धन्यवादान् समार्पयत्। रेलयानस्य गमनार्थं यदा सीटिकारवः जातः तदा मङ्गलः वातायनात् हस्तौ संयोज्य सर्वान् अवदत्- "भ्रातरः, मम दोषान् क्षाम्यन्तु। यदि जीवितः भवेयं तर्हि पुनः भवतां सहानुभूतिफलं प्राप्तुम् आगमिष्यामि"।

६

मङ्गलस्य गमनानन्तरं ग्रामस्य श्रमिकाः ये मिलित्वा जीवननिर्वहणं कुर्वन्ति स्म, तेषु परस्परं भेदभावः उत्पन्नः अभवत्। अर्चकः बृजलालः सायङ्काले कार्यात् प्रत्यागतान् श्रमिकान् यदा रूप्यकाणि याचति स्म तदा ते मिथ्याभाषणं कुर्वन्तः 'अर्चकवर्य, अद्य कार्यं न लब्धम्। कार्यम् अन्विष्यताम् अस्माकं पदतलं क्षतग्रस्तं जातम्' इति वदन्ति स्म। परिणामः एषः जातः पूर्वं प्रतिदिनं सप्ततिः अशीतिः वा रूप्यकाणि यथा प्राप्यन्ते स्म तथा इदानीं न प्राप्यते। इदानीं तु त्रिंशत् पञ्चत्रिंशत् वा रूप्यकाणि एव प्राप्यन्ते। अर्चकः चौधरिचुन्नुः च सर्वान् जनान् एकत्र वासं कर्तुं बोधयतः स्म। किन्तु एतयोः बोधनस्य परिणामः विपरीतः एव भवति स्म। मिथ्याभाषणं कुर्वतः द्वित्रान् जनान् तु अर्चकः एव प्रत्यक्षीकृतवान्। यदा तेषाम् वस्त्रस्य अन्वेषणं जातं तदा धनं प्राप्तम्। तदनन्तरं ते गृहीताः। जनाः तस्मात् ऐक्यगणात् पृथक् अभवन्। इत्थं प्रतिदिनं स्थितिः शोचनीया जाता। पृथग्भूतस्य तस्य गणस्य काश्चन स्त्रियः नगरं गत्वा कार्यं कुर्वन्ति स्म। तस्मात् नगरजीवनं ताभ्यः अत्यन्तं रुचिकरं जातम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मङ्गलेन दत्तस्य धनस्य समाप्तेः पूर्वम् एव तेषाम् ऐक्यभावना क्षीयमाणा आसीत्। किन्तु भगवता अर्चकवर्यस्य मानः रक्षणीयः आसीत्, इत्यतः श्रावणमासस्य प्रथमा धारासारा वृष्टिः आरब्धा। तया वृष्ट्या शुष्कक्षेत्राणाम् उदरं पूर्णं जातम्। दिनत्रयम् अविरता वृष्टिः जाता। परितः जलम् एव दृश्यते स्म।

अर्चकवर्यः चौधरिचुन्नुम् आहूय मन्त्रणां कृत्वा ऐक्यगणे विद्यमानेभ्यः श्रमिकेभ्यः प्रत्येकं पञ्चरूप्यकाणि दत्त्वा तेषां द्वारा मङ्गलस्य क्षेत्रेषु हलेन कर्षणं कारितवान्।

यानि शाकक्षेत्राणि जलाभावात् शुष्काणि आसन् तानि पुनः सजीवानि जातानि। पञ्चदशानां दिनानां पश्चात् एव शाकानि विक्रेतुं विपणिं प्रति नीयन्ते स्म। अजीर्णहरेषु पादपेषु पल्लवानि उद्गतानि। ततः तेषाम् अपि बन्धनं कृत्वा नगरं प्रति अनयत् ऐक्यगणः।

नित्यं किमपि आयः भवति स्म एव। श्रमिकेभ्यः पारिश्रमिकं दत्त्वा कार्यम् अपि कार्यते स्म।

ये जनाः मङ्गलस्य ऐक्यगणे अन्तपर्यन्तम् आसन्, ते एव मङ्गलस्य क्षेत्रेषु कार्यं कर्तुं शक्ताः अभवन्। अन्यैः तु अपरस्य कस्यचन भूमिस्वामिनः क्षेत्रेषु कार्यं करणीयम् अभवत्।

अर्चकः वृजलालवर्यः मङ्गलस्य प्रतिनिधिरूपेण सकुटुम्बं तस्य गृहे वासं कर्तुम् आरब्धवान्। सः मङ्गलेन पोषितानां वृषभधेनूनां संरक्षणं पोषणं च अपि आरब्धवान्। दुग्धं घृतं नवनीतं दाधिकम् इत्यादीनां तथैव ग्रामे वितरणम् आरब्धं यथा मङ्गलस्य उपस्थितिकाले वितरणं भवति स्म। अर्चकेण श्रमिकैः सह तथा एव व्यवहारः आरब्धः यथा मङ्गलः व्यवहरति स्म।

तथापि अर्चकः मङ्गलस्य सम्पत्तिं स्वायत्तीकरोति इति सन्देहदृष्ट्या सर्वे तं पश्यन्ति स्म। ग्रामस्य अन्ये भूस्वामिनः ये मङ्गलस्य उपस्थितौ अर्चकवर्यात् बिभ्यन्ति स्म ते अधुना तस्य प्रबन्धनं दृष्ट्वा मङ्गलस्य क्षेत्राणि जलं च अनुचितरूपेण स्वायत्तीकुर्वन्तः आसन्। अर्चकवर्येण कृतं बोधनं कथनं भापनं वा सर्वं व्यर्थं जातम्। तेषु किञ्चित् अपि परिवर्तनं न जातम्। ग्रामे तादृशी अव्यवस्था प्रसृता यया कस्यापि कस्यचित् कृते सहानुभूतिः न आसीत्।

यदा कर्तनं कृत्वा निर्धूलीकृत्य सस्यानि गृहं प्रति आनीतानि तस्यां रात्रौ मङ्गलस्य गृहे लुण्ठनं जातम्। अर्चकवर्यस्य तत्पत्न्याः च हस्तौ पादौ बद्ध्वा लुण्ठाकाः सर्वम् अन्नं लुण्ठितवन्तः। लुण्ठनसमये अर्चकवर्यः तत्पत्नी च द्वारात् बहिः शैत्येन कम्पमानौ आस्ताम्।

प्रातः काले ग्राम्यजनाः तयोः बन्धनम् उन्मोच्य तौ प्रति सहानुभूतिं प्रकटितवन्तः। रात्रौ जातस्य लुण्ठनस्य वार्तां ज्ञात्वा ग्रामप्रमुखः अपि संवेदनां प्रकटयितुम् आगतः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

खट्वायाम् उपविष्टः अर्चकवर्यः ग्राम्यजनैः क्रियमाणं सम्भाषणं मौनेन शृणोति स्म। सः केवलम् एतत् एव अवदत्- "गृहे विद्यमानानि सर्वाणि वस्तूनि लुण्ठाकाः नीतवन्तः। भोजनं निर्मातुम् उपयुज्यमानानि पात्राणि अपि लुण्ठितवन्तः" इति।

यदा ग्रामप्रमुखः आगतः तदा अर्चकवर्यः तम् आशीर्वचांसि अवदत्। तं खट्वायाम् उपवेष्टुं उक्तवान् च। ग्रामप्रमुखः खट्वायाम् उपविशन्- "अर्चकवर्य, मया श्रुतं यत् अत्र लुण्ठनं जातम्?" इति अपृच्छत्।

"आम्! सम्यक् श्रुतं भवता"।

"किं किं लुण्ठितवन्तः इतः?"

"यत्किमपि अत्र आसीत् तत् सर्वम्"।

"तर्हि आरक्षकेभ्यः सूचना दत्ता किम्?"

"नैव"।

"किमर्थम्?"

"एतदर्थं यत् सूचनायाम् एतदपि लेखनीयं भवेत् खलु मम सन्देहः केषु अस्ति। वस्तुतः सन्देहस्य विषयः एव नास्ति। एतत् कुकृत्यं कैः कृतम् इति अहं सम्यक्तया जानामि"।

"तर्हि तेषां नामानि लेखनीयानि आसन्"।

"किन्तु चौधरि! ते अपि अस्मदीयाः एव खलु। लुण्ठितं सर्वं तेषाम् एव आसीत्। मया तु सर्वं तेभ्यः एव दातव्यम् आसीत्। मदीया भूमिः नास्ति, बीजम् अपि मदीयं न आसीत्। उद्यमकर्तारः ग्रामजनाः एव आसन्। मम तु अपत्यम् अपि नास्ति, यस्य कृते मया किमपि स्थापनीयं भवेत्। नैव भ्रातः, अहं तु एतत् चौर्यवृत्तं न लेखयिष्यामि"।

ग्रामप्रमुखः विस्मितः जातः। सः अर्चकवर्यस्य मुखम् एव पश्यन् आसीत्।

अर्चकवर्यः अपृच्छत्- "चौधरि! पातुं दुग्धं स्वीकरोति वा?"।

"मास्तु। भवतः मयि अतिकृपा अस्ति। किन्तु अर्चकवर्य, अहम् एकं विषयं वक्तुम् आगतः आसम्। आरक्षकालये एतस्मिन् सन्दर्भे वृत्तं न लेखयिष्यति चेत् सम्यक् न भवेत्। आरक्षकाः चिन्तयेयुः यत् भवान् अपि एतस्मिन् लुण्ठनकार्ये लिप्तः अस्ति, इत्यतः एव भवान् लुण्ठनवृत्तं न लेखितवान्" इति।

अर्चकवर्यः ललाटे रेखाः वक्रीकृत्य- "यः माम् एवं वदिष्यति तम् अहं वदिष्यामि यत् ग्रामस्य कस्यचित् प्रमुखस्य पुत्रस्य रक्षणार्थं तूष्णीम् उपविष्टः अस्मि। चौधरि, तस्य नाम भवान् अपि जानाति। अहम् अपि जानामि" इति अवदत्।

Funding by IKS-MoE

पार्श्वे स्थिताः जनाः विस्मयेन ग्रामप्रमुखस्य मुखं दृष्टवन्तः। ग्रामप्रमुखः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अवदत्- "अर्चकवर्य, भवान् किं वदन् अस्ति?" इति।

"लुण्ठाकस्य नाम श्रोतुम् इच्छति भवान्? तर्हि गृहस्य अन्तः आगच्छतु। अहं भवन्तं वक्तुं शक्नोमि"।

अर्चकः ग्रामप्रमुखं गृहस्य अन्तः अनयत्। पञ्चदशनिमेषान् यावत् उभौ अपि अन्तः एव आस्ताम्। ततः उभौ अपि बहिः आगतौ। ग्रामप्रमुखः अवनतमुखः सन् तूष्णीं भूत्वा स्वगृहं प्रति प्रस्थितः।

७

एतस्य लुण्ठनस्य वार्तां ज्ञात्वा आरक्षकाः अर्चकवर्यस्य बृजलालस्य समीपम् आगताः। तेषु आरक्षकालयप्रमुखः अपि आसीत्। सः किञ्चित् तर्जयन्- "अर्चकवर्य, भवान् लुण्ठनस्य सूचनाम् आरक्षकालये किमर्थं न दत्तवान्?" इति अपृच्छत्।

"लुण्ठनम् एव यत् न जातं तत् कथं सूचयानि?"

"तर्हि अस्मिन् गृहे लुण्ठनं न जातम्?"

"नैव"।

"जनाः वदन्ति यत् प्रातः भवतः भवत्पत्न्याः च हस्तपादयोः बन्धनं ते उन्मोचितवन्तः?"

"यदि पुत्रः कुपितः सन् मातापित्रोः पाणिपादं बध्नाति तर्हि किं कर्तुं शक्यते। मम तं विरुध्य नास्ति कश्चन अभियोगः"।

"पुत्रः? .... भवतः पुत्रः कदा जातः?"

"एवं कथयतः भवतः दोषः नास्ति। भवान् अस्माकम् आचरणस्य विषये न जानाति। अत्र ब्राह्मणः समाजस्य पिता भवति। ग्राम्यजनाः मम सन्तानाः सन्ति। ते भ्रान्त्या चिन्तयन्ति स्म यत् अहं तेभ्यः अंशदानं सुष्ठुरूपेण न करोमि। अतः एव ते स्वकीयम् अंशं नीतवन्तः"।

"किं भवान् क्षेत्रेषु कार्यं कृतवद्भ्यः श्रमिकेभ्यः पारिश्रमिकं न दत्तवान् आसीत्?"

"मङ्गलस्य क्षेत्रेषु कार्यं कुर्वन्तः जनाः श्रमिकाः न भवन्ति। सर्वे अंशग्राहिणः एव। प्रत्येकं जनः स्वस्य अंशं प्राप्नोति। केषाञ्चित् जनानां चिन्तनम् आसीत् अहं अंशविभाजने दोषम् अकरवम्। तं दोषं दूरीकर्तुम् एव ते प्रयत्नं कृतवन्तः"।

"एतस्य तात्पर्यं यत् अंशवितरणे भवान् दोषम् आचरितवान् आसीत्"।

"ते तथैव चिन्तयन्ति इति प्रतिभाति मम। मया दोषः न कृतः इति अहं तान् बोधयन् अस्मि"।

Funding by IKS-MoE

"यदि ते भवतः बोधनस्य अवगमनं न कुर्वन्ति तर्हि?"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"तर्हि कश्चन स्नेही पिता इव अहं तेषां प्रमादं मर्षिष्यामि"।

"एवं भाति लुण्ठाकैः सह भवतः मेलनं जातम् अस्ति"।

"स्वस्मिन् गृहे एव लुण्ठनं कर्तुम्? विचित्रः विषयः एषः"।

"भवान् आरक्षकालये किमर्थं न वृत्तं लेखयति?"

अहम् एतत् लुण्ठनकार्यम् अस्ति इति न अङ्गीकरोमि। पश्यतु मीरमहोदय, एतानि क्षेत्राणि ग्रामीणानां सन्ति। ग्रामीणाः एव अत्र परिश्रमं कृतवन्तः। एतेषाम् उत्पादनम् अपि ग्रामीणाः एव स्वीकृतवन्तः। मम तु किमपि न आसीत्। न वा मम किमपि नष्टं जातम्। अहं तु मन्दिरस्य आश्रयेण जीविकोपार्जनं कुर्वन् अस्मि"।

एतस्याः समस्यायाः परिहारः कथं भवेत् इति विचारमग्नः सन् आरक्षकप्रमुखः उद्विग्नः जातः। तस्य मनसि कश्चन उपायः स्फुरितः। उपायः नाम अर्चकवर्यः आरक्षकालयं प्रति आह्वातव्यः इति। तदनु दण्डैः ताडनं प्राप्तवतः तस्य मुखात् सत्यं निष्कासनीयम्। तदा सः निश्चयेन सर्वं सत्यं वदिष्यति एव इति। एवं विचिन्त्य- "कथमपि भवतु, घण्टाभ्यन्तरे आरक्षालयं प्रति भवता आगन्तव्यम् एव" इति सादेशम् अवदत्।

"अस्तु, आगच्छामि"।

आरक्षकप्रमुखः अगच्छत्। ये जनाः अर्चकवर्यं प्रति संवेदनां प्रकटयितुम् आगताः आसन् ते सर्वे तम् विस्मिताभ्यां नेत्राभ्यां द्रष्टुम् आरभन्त। कश्चन अभणत्- "अर्चकवर्य, भवान् लुण्ठनस्य वृत्तं किमर्थं न लेखितवान्?" इति।

"भ्रातः, कस्य विरुद्धं वृत्तं लेखयानि? एकः हस्तः अपरस्य हस्तस्य निन्दां कुर्यात् वा? मुखं नासिका कर्णौ च कर्तयितुं प्रयत्नः करणीयः किम्? एषः ग्रामसमाजः कुटुम्बवत् अस्ति। एतस्य कुटुम्बरूपिसमाजस्य पुरोहितः अहम् अस्मि। किम् अहम् एव एतान् मम बन्धून् कारागृहं प्रति प्रेषयानि? अहम् एवं कर्तुं न शक्नोमि"।

"किन्तु एतेन क्रमेण तु अव्यवस्था भविष्यति। अधिकारिणः अनधिकारिणः च मध्ये भेदभावः एव समाप्तः भवेत्"।

"आदिकालतः मनुष्यः दण्डविधानं कृतवान् अस्ति। किम् एतैः दण्डविधानैः भीताः चोराः चौर्यकर्म त्यक्तवन्तः? यः मनुष्यः अपराधान् त्यक्तवान् अस्ति। तत्र तु कारणम् अस्ति तस्य हृदये भगवतः उदीयमानः प्रकाशः। सः च प्रकाशः दण्डविधानेन नैव उदितः, प्रत्युत मनसि सत्यस्य न्यायस्य च प्रेरणया उदितः भवति"।

ग्रामे केचन एव जनाः तादृशाः आसन् ये अर्चकस्य बृजलालस्य भावनाम् अवगच्छन्ति स्म। तस्य भावनाम् अनवगच्छत्सु प्रायशः ते एव आसन् ये लुण्ठनम् अकुर्वन्। ते लुण्ठाकाः इच्छन्ति स्म यत् अर्चकवर्यः आरक्षकालये लुण्ठनवृत्तं लेखयेत्। 'वयं रात्रौ अन्यत्र आस्म' इति सिद्धयित्वा लुण्ठाकाः आत्मानं रक्षितुम् अशक्ष्यन्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मध्याह्नकाले भोजनं कृत्वा अर्चकवर्यः आरक्षकालयं गतः। तत्र प्राप्ते सति अनुक्षणम् आरक्षकप्रमुखः कञ्चित् आरक्षकम् आज्ञप्तान्- "एतं कुक्कुटासनं कारयतु" इति। ततः द्वौ आरक्षकौ अर्चकवर्यस्य शरीरं वक्रं कृतवन्तौ। पादौ प्रसार्य तयोः पादयोः अन्तर्भागात् हस्ताभ्यां कर्णौ स्प्रष्टुम् अर्चकवर्यं विवशं कृतवन्तौ उभौ आरक्षकौ। अर्चकवर्यः कुक्कुटासने स्थितः अस्ति इति वार्ता कथञ्चित् ग्राम्यजनैः ज्ञाता। दशनिमेषाभ्यन्तरे एव बहवः ग्रामीणाः आरक्षकालयं प्राप्ताः।

अर्चकवर्याय आरक्षकैः कष्टं दीयमानम् अस्ति इति ज्ञात्वा उपविष्टः ग्रामप्रमुखः अपि ततः प्रस्थितः। यदा सः आरक्षकालयम् आगतः तदा कश्चन आरक्षकः अर्चकवर्यस्य पृष्ठे इष्टिकां स्थापयन् आसीत्। पार्श्वे एव अर्चकवर्यस्य पत्नी स्थिता सती रुदती एव एतत् निराकर्तुं प्रार्थनाम् अकरोत्। तस्मात् क्रोधाविष्टाः ग्राम्यजनाः परस्परं कर्णाकर्णि सम्भाषणम् आरब्धवन्तः। एतत् सर्वं दृष्टवतः ग्रामप्रमुखस्य रोमोद्गमः जातः। सः आरक्षकप्रमुखस्य समीपं गत्वा- "मीरमहोदय, एतत् किं करोति भवान्?" इति अपृच्छत्।

"दुर्वृत्तम् आचरितवन्तम् अर्चकं सुपथम् आनयामि"।

"अनुचितं कार्यं कुर्वन् अस्ति भवान्। सः दुराचारी नास्ति। सः तु लुण्ठितानि वस्तूनि प्रतिप्राप्तुं प्रयत्नं कुर्वन् आसीत्। तस्मै भवता दीयमानाः दण्डप्रहाराः अनुक्षणं स्थगनीयाः। तस्य प्रार्थना तु देवस्य कृते, देवेन सृष्टस्य समाजस्य कृते तथा च आत्मनः कृते भवति"।

"अहम् एतत् सर्वं न जानामि। तेन वृत्तं तु लेखनीयम् एव"।

"ग्रामप्रमुखः कुपितः जातः। किन्तु स्वस्य कोपं कथञ्चित् निगृह्णन्- "कीदृशं वृत्तं लेखयितुम् इच्छति?" इति अपृच्छत्।

"लुण्ठनवृत्तम्। अन्यत् किम्?"

"किन्तु लुण्ठनं तु न जातम्"।

"लुण्ठनं न जातम् इति कथं वक्तुम् अर्हति भवान्?"

"कोऽपि भवतः समीपम् आगत्य लुण्ठनवृत्तं लेखयितुम् आगतः आसीत्?"

"अस्मदीयाः स्पशाः उक्तवन्तः आसन्"।

"तेषां द्वारा एव वृत्तं लेखयतु। नोचेत् ते असत्यं वदन्ति"।

"तेषां सत्यासत्यस्य निर्णयम् एव तु करोमि"।

"कञ्चन निरपराधं ताडयन् ....?"

एतस्मिन् समये एव आरक्षकालयात् बहिः जनानां कोलाहलः श्रुतः। ग्रामप्रमुखः आरक्षकालयस्य विद्यमाने कस्मिंश्चित् प्रकोष्ठे सम्भाषणं करोति स्म। अर्चकवर्यः एकस्मिन् स्थले कुक्कुटासनं कुर्वन् आसीत्। यदा अर्चकवर्यस्य पृष्ठे स्थूलाः दश इष्टिकाः स्थापिताः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तदा तस्य सन्तुलनं नष्टम्। सः मुखबलेन अधः पतितः। प्रार्थनामुद्रायां स्थिता अर्चकवर्यस्य पत्नी पतितं पतिं दृष्ट्वा झटिति धावन्ती इष्टिकाः अपसारितवती। कश्चन आरक्षकः काष्ठदण्डेन ताम् अपसारयितुं प्रयत्नम् अकरोत्। तस्मात् ग्रामवासिनः कोपेन उद्विग्नाः जाताः। दण्डेन अपसारितवतः कृतवतः आरक्षकस्य उपरि ते सहसा आक्रमणं कृतवन्तः। आरक्षकः तु दण्डं परित्यज्य पलायितः एव। यः आरक्षकः अर्चकवर्यस्य पृष्ठे इष्टिकाः स्थापितवान् आसीत् सः ग्रामीणानां प्रहारैः व्रणितः जातः। व्रणितः सन् ग्रामवासिनः क्षमायाचनाम् अकरोत्। अधुना आरक्षकप्रमुखः ग्रामप्रमुखः च बहिः आगतौ। हस्तौ संयोज्य क्षमायाचनां कुर्वन्तम् आरक्षकं दृष्ट्वा आरक्षकप्रमुखः अत्यन्तं कुपितः जातः। सः शीघ्रम् एव स्वस्य कोषात् शीष्कारं निष्कासयितुम् उद्युक्तः जातः। तावता एव ग्रामप्रमुखः तस्य हस्तं निगृह्णन् अवदत्- "किमर्थं मूर्खताम् आचरति? ग्रामवासिनः ग्रामपुरोहितम् एतादृश्यां स्थितौ द्रष्टुं न शक्नुवन्ति। उपविंशाः जनाः अत्र मृताः भवेयुः। कः मृतः भवेत् इति ज्ञातुं न शक्यते। मदीयं वचनं पालयतु। अर्चकवर्यं मुञ्चतु। ततः स्वस्य अन्वेषणकार्यं सम्यक् अनुवर्तयतु। भवता आचर्यमाणा एषा युक्तिः सफला न भवेत्" इति।

आरक्षकप्रमुखः परिस्थितिम् अवगन्तुं प्रयत्तवान्। ग्रामस्य अपराधप्रवृत्तिमन्तः केचन जनाः तु पूर्वकालात् एव तस्य व्यवहारेण रुष्टाः आसन्। ब्राह्मणस्य अकारणं ताडनविधानेन तु आरक्षकप्रमुखस्य हृदयम् अपि द्रवीभूतं जातम् आसीत्। सः आदिशत्- "अर्चकं मुञ्चतु" इति।

निमेषद्वये जनाः अर्चकवर्यं बृजलालं स्कन्धे आरोप्य तस्य गृहं प्रति नीतवन्तः।

८

यत् यत् वस्तु लुण्ठितं जातम् आसीत् तत् सर्वं तस्याम् एव रात्रौ प्रत्यागतम्। अर्चकवर्यस्य गृहे सर्वाणि वस्तूनि यथास्थानं प्राप्तानि आसन्। कानिचन वस्तूनि भग्नानि अभवन्। तानि अपि यथास्थानं स्थापिततानि। एतस्मिन् प्रत्यर्पणकार्ये ग्रामप्रमुखस्य अपि सहयोगः आसीत्। यतः लुण्ठनगणे तस्य पुत्रः अपि आसीत्। अतः सः एव अर्चकवर्यस्य व्यवहारेण अधिकः प्रभावितः आसीत्।

अथैकदा नैरोबीनगरात् अर्चकवर्याय पत्रम् आगतम्। तस्मिन् पत्रे मङ्गलेन लिखितम् आसीत्- "अहं सकुटुम्बं सुखी अस्मि। यद्यपि अत्रत्याः जनाः अतीव कृष्णवर्णीयाः वनेचराः च दृश्यन्ते, तथापि एते सरलस्वभाववन्तः सत्यवादिनः च सन्ति। अहं 'संविदाकार' रूपेण कार्यम् आरब्धवान् अस्मि। कश्चन ज्येष्ठः संविदाकारः शतं मीलमितं यावत् मार्गनिर्माणस्य संविदां प्राप्नोत्। ततः एव एकमीलपर्यन्तं मार्गनिर्माणस्य संविदा मया प्राप्ता आसीत्। मया प्राप्तं तत् कार्यं मासाभ्यन्तरे एव समापितम्। तदनन्तरं पञ्चमीलमितं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यावत् मार्गनिर्माणार्थं पुनः संविदा प्राप्ता। तदपि पूर्णं जातम्। अधुना पञ्चमीलमितस्य अवशिष्टस्य मार्गस्य निर्माणार्थं संविदा प्राप्ता अस्ति। मासद्वयाभ्यन्तरे तत् अपि कार्यं पूर्णं भविष्यति ....

"एतावता षट्सहस्रस्य रूप्यकाणां लाभः प्राप्तः अस्ति। अत्र बहु कार्यम् अस्ति। कर्तारः अपि बहवः सन्ति। किन्तु प्रबन्धकाः न्यूनाः सन्ति। वयं भारतीयाः प्रबन्धनकार्यं कुर्वन्तः स्मः। अत्र मम कार्यं तु श्रमिकाणां योजनं तथा तेषां द्वारा कार्यसाधनम् एव अस्ति। अत्र साप्ताहिकं पारिश्रमिकम् अग्रिमराशिरूपेण दातव्यं भवति। आहत्य अनेन प्रबन्धनकार्येण सहस्राधिकरूप्यकाणां लाभः जातः अस्ति ......

"मार्गाः तु अरण्यमध्ये एव निर्मीयन्ते। अतः वन्यपशुभ्यः आत्मानं रक्षितुं किञ्चन अत्यन्तं समीचीनं गोलिकास्त्रं मया क्रीतम् अस्ति। काष्ठदण्डं स्कन्धे आरोपयन् इव गोलिकास्त्रं आरोप्य इतस्ततः विचरणं करोमि......

"दुग्धं दधि नवनीतं च अत्र बहु लभ्यते। फलानि शाकानि अपि न्यूनमूल्यैः लभ्यन्ते। आम्राणि तु द्वादशमासान् यावत् प्राप्यन्ते। अत्र कष्टं नाम पञ्चषाणि कुटुम्बानि एव भारतीयभाषया व्यवहरन्ति ....

"अहं चिन्तयामि यत् पञ्चषाणां वर्षाणाम् आभ्यन्तरे एव लक्षाधिकरूप्यकाणि संगृह्य भारतम् आगन्तुं शक्नोमि। एतत् पत्रं मम गणकेन लिख्यमानम् अस्ति। एषः गणकः मदीयं सर्वविधव्यवहारं गणयन् सेवकरूपेण कार्यं करोति.......

"अर्चकवर्य, 'ब्राह्मण्यै भवत्पत्न्यै अस्माकं प्रणामाः' इति वदतु। ग्रामस्य पूर्णं वृत्तान्तं लिखतु। वृष्टिः जाता उत न? जनाः सुखिनः सन्ति उत न?" इति।

अनेन पत्रेण अर्चकवर्यस्य महती प्रसन्नता जाता। सः ग्रामे सर्वत्र अटन् अमुं पत्रं प्रत्येकं ग्रामवासिनः पुरतः पठित्वा अश्रावयत्।

ग्रामवासिनाम् इदं चिन्तनम् आसीत् यत् अर्चकवर्यः कृषेः उत्पादनस्य सर्वान् अपि भागान् श्रमिकेषु वितरति इति। वर्षाकालस्य पश्चात् यदा एकस्य वर्षस्य आकलनम् आरब्धं तदा अर्चकवर्येण अवगतं यत् सर्वाधिकः लाभः आलुकस्य हरितशाकादीनां च उत्पादनकारणेन जातः। सः द्विबीघामितायां भूम्यां तमालपत्रस्य अपि उत्पादनम् आरब्धवान्। इत्थम् आयः अधिकः अभवत्। सः श्रमिकेभ्यः यथेच्छं पारिश्रमिकम् अददात्। उर्वरकाय अन्येषां विनियोगाय च आवश्यकं मूल्यं दत्त्वा आहत्य दशसहस्रस्य रूप्यकाणां लाभः जातः।

ततः सः मन्दिरस्य पार्श्वे मङ्गलपाठशाला इति नाम्ना कञ्चन विद्यालयं ग्रामबालान् पाठयितुम् आरब्धवान्। तदर्थं सः लघुभवनं निर्मापितवान्। स्वस्य गृहं निर्मातुं मङ्गलेन याः इष्टिकाः संरक्षिताः आसन् ताः लघुभवनस्य निर्माणकार्ये उपयोगिन्यः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सञ्जाताः।

इत्थं पञ्चवर्षाणि यावत् अर्चकवर्यः नगरे इव ग्रामे सर्वम् आनुकूल्यम् आनेतुं प्रयत्नम् अकरोत्। सः ग्रामे वैद्यस्य नियुक्तिं कृत्वा तद्द्वारा सर्वेषां ग्रामवासिनां चिकित्सां कारयति स्म। तस्मै वैद्याय विंशतिः रूप्यकाणि वेतनरूपेण दीयन्ते स्म। तस्मै भोजनव्यवस्था आवासव्यवस्था अपि कल्पिता आसीत्।

अर्चकवर्यः एकं कार्यम् इतोऽपि कृतवान्। तेन ग्रामे कश्चन वित्तकोषः आरब्धः। तत्र सः स्वेन अर्जितं धनं स्थापयित्वा ततः लेखासंख्यां स्व्यकरोत्। नगरस्य कांश्चन जनान् अत्र योजयित्वा तस्य प्रबन्धनं तेषां द्वारा एव अकारयत्। एषः वित्तकोषः सर्वेषु ग्रामवासिषु धनरक्षणप्रवृत्तिम् अजनयत्। ग्रामस्य उत्पादनं ग्रामे एव क्रीत्वा ततः नगरं प्रति नीत्वा विक्रयणं वित्तकोषस्य दायित्त्वम् आसीत्। जनैः उत्पादनं विक्रेतुं धनं प्राप्तुं च नगरं प्रति गन्तव्यं न भवति स्म। एवं तेषां समयः श्रमः च रक्षितौ जातौ।

नित्यम् एतादृशानि कार्याणि समाप्य अर्चकवर्यः देवस्य अर्चनायां स्वमनः योजयति स्म। एकदा सः मन्दिरे उपविशन् भगवतः शिवस्य वन्दनं कुर्वन् आसीत्-

नमामि देवं वरदं वरेण्यं
नमामि देवं च सदा सनातनम्।
नमामि देवाधिपमीश्वरं हरं
नमामि शम्भुं जगदेकबन्धुम्।।
सनातनं ब्रह्मनिजात्मरूपं
नमामि सर्वं निज-भावगम्यं
वरं वरेण्यं वरदं नतोऽस्मि।।।

तेन पूर्णं ब्रह्मज्ञानं प्राप्तम् इति तस्य अभासत। पूर्णं जगत् तदीयम् अस्ति इति भावना तस्मिन् दृष्टा। 'अहं पूर्णे जगति व्याप्तः अस्मि' इत्यपि भावः जागरितः। 'मयि ग्रामवासिषु च किञ्चित् अपि भेदः नास्ति। तेषां कल्याणम् एव मम कल्याणम्' इति भावयति स्म सः। आ पञ्चवर्षेभ्यः यः सन्तोषरसः तेन प्राप्तः तस्मात् सः आत्मानं धन्यं मन्यते। तस्य पूर्णं शरीरम् आनन्देन भावविह्वलं जातम्। तस्य मुखात् अनायासेन एते शब्दाः निःसृताः- "हे भगवन्! पूर्वजन्मनि मया कीदृशं पुण्यकर्म कृतं येन लोकसेवायाः अवसरं भवान् मह्यं दत्तवान्? अहं भवतः कृतज्ञः अस्मि। अनेकजन्मपर्यन्तं भवतः सेवकरूपेण भवेयम् इति कामना अस्ति।"

एवम् उक्त्वा सः भगवतः पुरतः साष्टाङ्गं प्रणामम् अकरोत्। पत्रपुष्पाणि समर्प्य जलम् आर्पयत् च। सः मुखं परिवर्त्य अपश्यत्। तत्र विद्यमानं जनं दृष्ट्वा सः स्तब्धः जातः। तस्य पुरतः ऊरुकं प्रावारकं च धृतवान् मङ्गलः हस्ते शिरस्त्राणं स्वीकुर्वन् स्थितः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आसीत्।

मङ्गलस्य हृष्टपुष्टशरीरे प्रावारकं ऊरुकं च सम्यक् भातः स्म। तस्य मुखं सन्तोषेण आनन्देन च चकासते स्म। सः अर्चकवर्यं पश्यन् एव आसीत्। सहसा अर्चकवर्यः तम् अभिज्ञाय अग्रे गत्वा दृढेन आलिङ्गत्। तस्य मुखात् एतत् वचनं निःसृतम्- "मङ्गलभ्रातः!"

मङ्गलः तम् आलिङ्ग्य अवदत्- "भवता अहम् अभिज्ञातः अर्चकवर्य! ब्राह्मणी तु मां न अभिज्ञातवती"। अर्चकः तस्य ऊरुकं प्रावारकं च दृष्ट्वा पत्न्याः अनभिज्ञानस्य कारणम् अवगतवान्। "सत्यम् एव भ्रातः, भवान् तु शिष्टः जनः, भिन्नाकारकः सन् प्रत्यागतः। अतः सा भवन्तं गृहात् निर्गन्तुम् उक्तवती स्यात्" इति अर्चकः अवदत्।

मङ्गलः अहसत्। सः अवदत्- "वयम् अश्वशकटेन आगताः। गृहस्य अग्रे अश्वशकटं दृष्ट्वा ब्राह्मणी अन्तः पलायिता। अहं तस्याः सम्भ्रमम् अवगत्य बहिर्मुखी सन् गृहस्य द्वारे स्थित्वा आह्वयम्- "अर्चकवर्यः अस्ति?"

"सा वराकी द्वारकवाटस्य अन्तः आत्मानं निलीय उक्तवती- 'सः मन्दिरं गतवान्। बहिः विद्यमाने मञ्चे उपविश्यताम्। इदानीम् एव आगमिष्यति' इति......

"तन्मध्ये एव आङ्ग्लजीवेषभूषां धृतवन्तः मोहिनी बालाः च गृहं प्रविष्टवन्तः। मोहिनी यदा अन्तः गन्तुम् उद्युक्ता तदा ब्राह्मणी- 'तिष्ठतु महोदये! एतद् ब्राह्मणस्य गृहम् अस्ति। अपवित्रं भविष्यति' इति अवरुन्धती अवदत्......

मोहिनी तस्याः सम्भ्रमम् अवगत्य उक्तवती- 'पितृव्ये, भवती मां न अभिज्ञातवती?'

"प्रेम्णा अश्रुधारां प्रवाहन्त्यौ सम्भाषमाणे ते परित्यज्य अत्र आगतः अहम्। मोहिनी तु सर्वं रहस्यं शीघ्रं प्रकटितवती। अधुना अर्चकवर्यम् ईषत् पीडयामि इति विचिन्त्य अत्र आगतः अहं साष्टाङ्गं प्रणामं कुर्वन्तं भवन्तं दृष्ट्वा पादत्राणं निष्कास्य भवतः पृष्ठतः अतिष्ठम्। किन्तु भवान् देवस्य आराधनायां तावान् लीनः आसीत् यत् मम आगमनं भवता न लक्षितम् एव। तदनन्तरम् अहं ततः बहिः आगतः। पादत्राणस्य धारणसमये मया क्लेशः अनुभूतः। तस्मात् शनैः स्वरः मम मुखात् निर्गतः। अतः भवान् अजानात्। नोचेत् भवान् न अज्ञास्यत् एव। अत्र कारणं तु भवता मां प्रति क्रियमाणः अधिकः स्नेहव्यवहारः एव" इति मङ्गलः सविस्तरम् अवदत्।

"अहं भवन्तं कथं विस्मर्तुं शक्नोमि भ्रातः। कदापि न विस्मरामि। अहं भवन्तं मदीये अङ्के लालितवान् अस्मि। अहं भवतः प्रत्येकम् अङ्गस्य स्पन्दनम् अभिजाने। एतत् ऊरुकं प्रावारकं च तत् स्पन्दनं निगूढयितुं न शक्नुतः। अस्तु, चलामः। गृहं गत्वा ब्राह्मणीं तर्जयेयं यत् सा स्वबालान् विस्मृतवती किम्?" इति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

६

मङ्गलस्य आगमनवार्ता ग्रामे अकस्मात् सर्वत्र प्रसृता। मङ्गलेन मेलितुं सर्वे ग्रामवासिनः आगताः। तस्य मृत्तिकाभिः निर्मितस्य गृहस्य पुरतः जनसम्मर्दः जातः। “मङ्गलभ्रातः! मङ्गलभ्रातः!” इति औत्सुक्येन वदन्तः सर्वे जनाः तेन सम्भाषणं कर्तुम् उद्युक्ताः अभवन्। जनानां प्रेम स्नेहं च दृष्ट्वा मोहिन्याः मनः अतीव प्रमोदते स्म। पत्युः मानेन प्रतिष्ठया च तस्याः मनः पुलकितं जातम्। ‘अहं कमपि न विस्मृतवान्’ इति वक्तुम् इच्छन् मङ्गलः सर्वेषां नामानि उक्त्वा एव वार्तालापं करोति स्म। कस्यचित् पितुः अङ्गुलीं धृतवन्तं बालं पश्यन् सः अपृच्छत् - “एषः कः अस्ति?” इति।

“मम पुत्रः मङ्गल! भवतः ग्रामात् प्रस्थानसमये मदीये क्रोडे एव आसीत्” इति पिता बालस्य परिचयं कृत्वा उक्तवान्।

“अहो! विस्मृतम्। पितृव्य, पञ्चवर्षाणि अतीतानि खलु। मम तु एवं भासते यत् ह्यः एव अहम् इतः गतवान् आसम्”।

यदा स्वागतकार्यं प्रथमे दिने समाप्तं तदा अर्चकवर्याय ईर्ष्यन्तः केचन जनाः मङ्गलस्य पार्श्वे आगच्छन्तः आसन्। तेषु जात्या जाटः कश्चन नेतरामः अपि आसीत्। सः अकथयत्- “मङ्गलभ्रातः, अर्चकवर्येण कृतस्य सर्वस्य आयव्ययस्य गणना भवता प्रष्टव्या” इति।

“पृष्टं भ्रातः”।

“किं पृष्टम्? किं मन्दिरस्य पार्श्वे निर्मिताय विद्यालयाय सहस्राधिकाणि रूप्यकानि यानि व्ययीकृतानि, तस्य विषये उक्तं तेन?”

“आम्”।

“तर्हि सर्वं कार्यं भवतः अङ्गीकारेण सम्पन्नम्?”

“अहम् अङ्गीकारं दातुं कः? पितृव्य! एतत् सर्वं सः परिश्रमेण साधितवान् अस्ति। अतः व्ययकरणस्य अधिकारः अपि तस्य एव आसीत्”।

“एषा भूमिः तु भवतः एव अस्ति”।

“भूमिः तु चौधरिमनोहरस्य अस्ति। तस्मै भूम्यधिकारस्य धनं दत्तम् अस्ति”।

“किन्तु भूम्यधिकारपत्रं तु भवतः नाम्ना आसीत्”।

“किन्तु मदीयः परिश्रमः तु न आसीत्। श्रमिकाः परिश्रमम् अकुर्वन्। अर्चकवर्यः प्रबन्धनम् अकरोत्। बीजम् उर्वरकं सेचनम् इत्यादीनां कृते अर्चकवर्यः एव मूल्यं प्रादात्। वदतु, मया किं कृतम्? किमर्थं कोऽपि मां पृच्छेत्?”

“यद्यपि मङ्गलेन उक्तं वचनं नेतरामः अवगतवान् तथापि सः उत्तरं वक्तुं न अशक्नोत्। इत्थं बहवः ईर्ष्यालवः पिशुनाः च आगताः। आगतः कश्चन अवदत्- “भ्रातः,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भवान् तु दुर्भिक्षकाले सर्वं धनं पत्न्याः आभूषणानि च निर्धनानां निरुद्योगिनां अन्नपानादिव्यवस्थायै व्ययीकृतवान् आसीत्। यदा सुभिक्षं जातं तदा भवतः धनं भवता प्राप्तव्यम् एव। एषः अर्चकः तु सर्वं धनं व्यर्थं कृतवान् अस्ति। पश्यतु, ग्रामात् किञ्चित् दूरं मृद्मार्गः आसीत्, तत्र एषः त्रिसहस्रं व्ययीकृत्य संशोधितं मार्गं कारितवान्। ग्रामे एकम् उत्सम् अपि कारितवान्। उत्सम् अनुवर्तयितुं व्यवस्थापयितुं च सः त्रयाणां रूप्यकाणां प्रतिदिनं व्ययं कुर्वन् अस्ति"।

मङ्गलः अहसत्। यदा आक्षेपकर्ता विस्मयेन तस्य मुखम् अपश्यत् तदा मङ्गलः हासं निरुध्य अवदत्- "अत्र विस्मयस्य कः प्रश्नः भ्रातः? अर्चकवर्येण अर्जितं सर्वम्। सः यथेच्छं व्ययं कर्तुम् अर्हः। अहं भवान् च किमर्थं किमपि कथयाव? मदीया सर्वा सम्पद् येषाम् कृते आसीत् तेषां निमित्तम् एव तेन सर्वं व्ययीकृतम्। अत्र मदीयं किमपि नास्ति" इति।

असूयकानां विषयुक्तस्य वचनस्य श्रवणं सुकरं भवति। किन्तु तस्मात् मस्तिष्कस्य रक्षणं कठिनं भवति। तस्य प्रभावेण एव मनसः महत्तायाः परिचयः प्राप्यते। मङ्गलः अस्यां परीक्षायां सफलः अभवत्। सः एकदा अर्चकवर्यस्य पार्श्वे उपविश्य- "अर्चकवर्य! चौधरिमनोहरस्य सर्वा भूमिः अधुना भवता एव कर्षणीया" इति अवदत्।

"न भ्रातः! भवतः अनुपस्थितौ मम यथा अभासत तथा कृतम्। अधुना भवान् आगतः। भवान् इदानीं सर्वं कृषिसम्बद्धम् अन्यत् वा दायित्वं मत्तः स्वीकरोतु एव। अस्मत्सदृशानां ब्राह्मणानां द्वारा केवलं पूजनं पाठं च कारयतु। कुत्रचित् रामायणकथा वक्तव्या चेत् वदिष्यामि। भवता दत्तं दायित्त्वं मया इदानीं निर्वोढुं न शक्यते"।

"अर्चकवर्य!" मङ्गलः स्मितं कुर्वन्- "एतत् पूजनं किमर्थं करोति भवान्?" इति अपृच्छत्।

"स्वस्य आत्मनः शुद्ध्यर्थम्"।

"आत्मनः शुद्ध्यर्थम् एव किमर्थम्?"

"मोक्षं प्राप्तुम्"।

"अयं तु उद्देशः। किन्तु कर्माणि अकुर्वता आत्मशुद्धिः मोक्षः वा प्राप्तुं शक्यते किम्?"

"उत्तमं कर्म अपि शुद्धेन आत्मना एव कर्तुं शक्यते"।

"तदेव तु अहं वदामि। प्रातः सायङ्काले च भगवद्भजनं करोतु। तस्मात् स्फूर्तिं प्राप्य दिनपर्यन्तं कर्म करोतु। उच्यतां, किम् अहम् असम्बद्धं विषयं वदन् अस्मि अर्चकवर्य?"

Funding by IKS-MoE

मङ्गलस्य युक्तिं श्रुत्वा उत्तरं दातुम् अशक्नुवन् अर्चकवर्यः अवाङ्मुखः जातः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सः स्वकर्तव्यबुद्धया चौधरिमनोहरस्य क्षेत्राणां प्रबन्धनं कर्तुं सिद्धः जातः। सः आजीविकार्थं यावत् आवश्यकं तावत् एव स्वीकरोति स्म, न ततः अधिकम्।

एतावत्पर्यन्तं मङ्गलः अर्चकवर्यः च उभौ अपि युगपत् एकस्मिन् गृहे एव वासं कुरुतः स्म। विगतेभ्यः पञ्चभ्यः वर्षेभ्यः अनवधानात् अर्चकवर्यस्य गृहं नष्टं जातम् आसीत्। इच्छानुगुणं किञ्चन सुन्दरं गृहं भवेत् इति मोहिन्याः पूर्ववत् चिन्तनं तु आसीत् एव। तदर्थं मङ्गलः पुनः इष्टिकाः निर्मापयितुम् आरब्धवान्। नूतनस्य गृहस्य पूर्णनिर्माणं यावत् ते अर्चकवर्यस्य जीर्णगृहे एव वासं कुर्वन्ति स्म।

नैरोबीतः प्रत्यागतस्य मङ्गलस्य तृतीये दिने एव मात्रा मेलनार्थम् इच्छा जागरिता। सः प्रातः उदतिष्ठत्। दण्डं स्वीकृत्य नगरं प्रति प्रस्थितवान्। मातुः गृहस्य पुरतः अन्यं कमपि निवासिनं दृष्ट्वा लालनत्थूमलस्य गृहस्य पुरतः आगतः सः। द्वारशब्दे कृते सति काचित् वयोवृद्धा द्वारम् उद्घाटितवती। सा वयोवृद्धा मलिनां जीर्णां च वस्त्रं धृतवती आसीत्। हस्तयोः कज्जलम् इव किमपि कृष्णवर्णीयं वस्तु लिप्तम् आसीत्। सा वृद्धा पात्राणि क्षालयन्ती आसीत् इत्येवं भाति स्म। वृद्धमहिला मङ्गलं दृष्ट्वा अवाङ्मुखी सती स्थिता जाता। मङ्गलस्य अभिज्ञाने तया कश्चन कालः अपेक्षितः अभवत्। सा मङ्गलस्य माता आसीत्। तस्याः पूर्वतनरूपरेखाः सर्वाः अपि नष्टाः आसन्। केशाः पूर्णतया श्वेताः जाताः आसन्। शरीरस्य त्वक् सङ्कुचितं जातम् आसीत्। सा शरीरेण तावती दुर्बला जाता येन अभिज्ञातुं क्लेशकरम् आसीत्। मङ्गलः मातरम् अभिज्ञाय अवदत्- "मातः, किं जातम्?" इति।

माता तत्रैव द्वारस्य देहल्याम् उपविश्य संज्ञाशून्या जाता। मङ्गलः बहुः चिन्ताकुलः अभवत्। मातरि कथं चैतन्यम् आगच्छेत् इति ज्ञातुम् अशक्तः जातः। सः द्वारस्थेन अर्गलेन शब्दं कृतवान्। किन्तु प्रत्युत्तरं न आगतम्। पुनः शब्दम् अकरोत्। तथापि कोऽपि न अवदत्। तृतीयवारं यदा शब्दः कृतः तदा लालनत्थूमलः वातायनात् वीक्षणं कुर्वन् अवदत्- "केन कोलाहलः क्रियमाणः अस्ति अधः? उपरि पुत्रवधूः रुग्णा अस्ति" इत्येवं कथयन् एव सः देहल्यां स्थितं मङ्गलम् अपश्यत्। तं दृष्ट्वा मौनम् आश्रयत्। पश्चात् विचिन्त्य- "किम् इच्छति मङ्गल?" इति अपृच्छत्।

"माता मूर्च्छिता अस्ति"।

"तर्हि वयं किं कुर्याम? स्वीकृत्य नयतु। वयं स्वयम् एव कष्टे पतिताः स्मः"।

"अस्तु, नयामि" इति उक्त्वा गृहस्य अन्तः प्रविश्य जलम् अन्वेष्टुं प्रयत्नम् अकरोत्। गृहस्य देहल्याः पारं किञ्चन विस्तृतम् अङ्गणम् आसीत्। अङ्गणे विद्यमानात् नलिकातः जलं स्वीकृत्य सः मातुः मुखस्य उपरि अक्षिपत्। तदनन्तरं मातरि चेतना आगता। सः मातुः हस्तौ जलेन प्रक्षाल्य भूमौ तां शाययन्- "मातः, अहं भवतीम् इतः नेतुं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

किञ्चन शकटम् आनयामि। भवती इतः कुत्रापि न गच्छतु" इति अवदत्।

"पुत्र ...." इत्यस्मात् सम्बोधनात् ऋते अधिकं किमपि वक्तुम् अशक्ता जाता सा। तस्मिन् क्षणे एव लालनत्थूमलः केनचित् वैद्येन सह सोपानमार्गात् अधः अवतरति स्म।

वैद्यस्य हस्ते स्टैथस्कोपनामकं यन्त्रं दृष्ट्वा- 'कोऽपि अस्वस्थः अस्ति' इति मङ्गलेन ऊहितम्। अधुना मङ्गलेन स्मृतं 'नत्थूमलः पुत्रवध्वाः अनारोग्यविषये तदा वदन् आसीत्। तस्य तु एकः एव पुत्रः शङ्करः अस्ति। कदाचित् सोहनी अनारोग्यवती तु न स्यात्?' इति।

यदा वैद्यम् आपृच्छ्य लालनत्थूमलः अन्तः प्रविष्टः तदा मङ्गलः अपृच्छत्- "लालवर्य, कः अस्वस्थः अस्ति?" इति। "भवतः अनुजा। कष्टसागरे पतिताः वयम्। सहस्राधिकरूप्यकाणां व्ययेन अपि कः रोगः इति न ज्ञायते"।

मङ्गलः एतत् श्रुत्वा खिन्नमुखः जातः। सः अपृच्छत्- "किम् अहम् अनुजां द्रष्टुं शक्नोमि?"

"प्रथमं मातरं पश्यतु। एताम् इतः नयतु। अहम् एकं रोगिणं पश्यानि उत द्वौ रोगिणौ?"

"मातरं तु नेष्यामि एव। यदि भवान् अन्यथा न चिन्तयेत् तर्हि किञ्चित् अनुजां द्रष्टुं शक्नुयाम्?"

"पश्यतु, यदि मनः अङ्गीकरोति तर्हि ताम् अपि नयतु"।

मङ्गलः अवाङ्मुखः सन् लालनत्थूमलं पश्यन् एव आसीत्।

१०

मङ्गलः सोहनीम् अपश्यत्। सा कण्टकम् इव शुष्का जाता आसीत्। शङ्करः ललाटे रेखाः वक्रीकृत्य पार्श्वस्थे आसन्दे उपविष्टः आसीत्। प्रकोष्ठं प्रति आगतं मङ्गलं दृष्ट्वा उत्थाय ततः बहिः अगच्छत्। सोहनी निर्निमेषं भ्रातुः मुखं पश्यन्ती एव आसीत्। भ्रातरं किं वदेयम् इति तया न अवगतम्। मङ्गलः अपृच्छत्- "सोहनि, बहु कष्टम् अनुभवसि अत्र?" इति।

"भवान् तु सर्वं पश्यन् एव अस्ति। किमपि न ज्ञायते यत् अहं केन रोगेण ग्रस्ता अस्मि। औषधम् एव सर्वदा पिबन्ती भवामि। किन्तु कोऽपि लाभः नास्ति। न ज्वरः अस्ति, न वा कासः। प्रतिदिनं शरीरं शुष्कं जायमानम् अस्ति"।

"ग्रामं गमिष्यति?"

"तत्र किं भवेत्?"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"स्वस्था भविष्यसि"।

"अत्र धनस्य व्ययं कर्तुं कश्चन अस्ति। तत्र भवान् कथं करिष्यति?"

"तस्य विषये चिन्ता मास्तु। अहं मातरं तु नयामि एव। त्वम् अपि चलिष्यसि चेत् सम्यक् भवेत्"।

"अहं भवतः आवुत्तम् अपृष्ट्वा गन्तुं न शक्नोमि"।

"तर्हि पृच्छ। अहं शकटम् आनेतुं गच्छामि"।

सोहन्याः इच्छायाः विपरीतं शङ्करः तस्यै गन्तुम् अनुमतिं प्रादात्। तस्मात् सा विस्मिता जाता। ततः सा अवदत्- "मातुः गृहस्य सर्वाणि आभूषणानि प्रत्यर्पयतु। प्रायशः सा तु पुनः न प्रत्यागच्छेत्" इति।

"एतावत् शीघ्रं न शक्यते। पिता स्वस्यां धनपेटिकायां स्थापितवान् अस्ति। कस्मिंश्चित् समये अवकाशं प्राप्य सः निष्कासयेत्"। "निष्कासने कियान् कालः अपेक्षितः भवेत्। यावत् भ्राता शकटम् आनयति तावत् निष्कासयतु"।

"एतत् न शक्यते"।

"तर्हि मदीयानि वस्त्राणि एव निष्कास्य ददातु"।

"किमर्थं, वस्त्रेण किं प्रयोजनम्? तत्र ग्रामे तु सामान्येन वस्त्रेण एव कार्यं सिद्ध्यति"।

सोहन्याः मनः खिन्नं जातम्। सा तूष्णीं जाता। शङ्करः तस्याः सर्वाणि कार्पासनिर्मितानि वस्त्राणि एकस्यां पोटलिकायां बद्ध्वा तां गन्तुं सज्जां कृतवान्। सोहन्याः मुखात् 'गमनम्' इति शब्दे निःसृते सति अनुक्षणं श्वसुरालयजनानाम् अनुमतिं श्रुत्वा सा चकिता आशङ्किता च जाता। 'मदीयः पतिः मया सह उद्विग्नः जातः अस्ति। किञ्च, मां गृहात् निष्कास्य सुखं सन्तोषं च अनुभवेत्' इति चिन्त्यमानायां तस्यां ग्रामगमनस्य विचारः त्यक्तः तया। सा अवदत्- "अहं चिन्तयामि ग्रामगमनेन अधिकं कष्टम् एव अनुभवेयम्। यदि न गच्छामि तर्हि वरम् एव भवेत्"।

शङ्करः एतत् श्रुत्वा अतीव कुपितः जातः। सः अवदत्- "यदि गन्तव्यं न आसीत् तर्हि किमर्थं माम् इतस्ततः प्रवर्तितवती? अधुना गमनम् एव श्रेयस्करं भवेत्"।

सोहन्याः जीवनस्य आशाभङ्गः अभवत्। तस्याः पतिः तां प्रेषयन् अस्ति। आभूषणानि वस्त्राणि च अपि दातुं न इच्छति। सा पुनः अकथयत्- "अहं चिन्तयामि यत् न गमनम् एव श्रेयस्करं स्यात्"।

"किमर्थं श्रेयस्करं न स्यात्?"

"तत्र मदीयं मातृगृहम् अस्ति। अत्र पतिगृहम् अस्ति। अत्र मरणं श्रेयस्करं भाति"।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"किन्तु त्वं मृता न भविष्यसि। मासद्वयं यावत् बहिः गमनेन स्वच्छवायुसेवनेन सम्यक् भविष्यसि। तदनन्तरं प्रत्यागच्छ"।

"अहं सम्यक् भविष्यामि इति मयि विश्वासः नास्ति। अहम् इतोऽपि अधिकं कालं न जीवामि। अस्मिन् जन्मनि तु अत्र आगन्तुं न शक्नोमि"।

"सोहनि! अलं विकत्थनेन। अहं तु वदामि यत् मासद्वये एव स्वस्था भूत्वा प्रत्यागमिष्यसि"।

तस्मिन् एव समये मङ्गलः शकटम् आनयत्। सः मातरम् उत्थाप्य शकटे उपवेशितवान्। ततः सोहनीम् आनेतुं गतः। आगतं तं दृष्ट्वा सोहनी सकृत् याचनाभावेन पतिम् अपश्यत्। शङ्करः तस्याः वस्त्राणां पोटलिकां मङ्गलस्य हस्ते स्थापयन्- "भवतः अनुजा अपि मात्रा सह ग्रामं गन्तुम् इच्छति" इति अवदत्।

"गच्छाम सोहनि"! इति अनुजां पश्यन् मङ्गलः अवदत्।

"भ्रातः, किमपि अस्वीकृत्य एव मया गन्तव्यं भवेत्। आगच्छानि?"

"बहु सम्यक् करोषि। इतः किमपि स्वीकरणं न आवश्यकम्। यथा वयं स्मः तथा तव अपि वासः उत्तमः भवेत्। एतानि जीर्णानि वस्त्राणि अपि न आवश्यकानि" इति उक्त्वा पोटलिकाम् अपि प्रकोष्ठे अस्थापयत्। मङ्गलः नितरां दुर्बलां सोहनीं हस्ताभ्याम् उन्नीय शकटे उपावेशयत्।

मातरम् अनुजां च आनयन्तं मङ्गलं वीक्ष्य ग्रामजनाः अश्चर्यचकिताः जाताः। माता पुत्रेण सह यं व्यवहारं कृतवती तम् अद्यापि ग्रामीणाः स्मरन्ति एव। तदा आरभ्य मङ्गलः तादृशं व्यवहारं मात्रा सह न अकरोत् यादृशः व्यवहारः पूर्वं मात्रा अनुष्ठितः आसीत्।

ग्रामे पूर्वतनं गृहम् अनावृतं जातम्। तत्र स्वच्छतादिकं कारयित्वा मङ्गलः मातुः अनुजायाः च कृते वासव्यवस्थां कल्पितवान्। मङ्गलः तु स्वयं पर्णकुटीरे अर्चकवर्येण सह वासं करोति स्म।

ग्रामे आगतवत्याः सोहन्याः बहूनि दिनानि अतीतानि। मङ्गलः अनुजायाः शुश्रूषां कर्तुं काञ्चित् महिलां नियोजितवान्। सः स्वयम् अपि प्रतिदिनं त्रिचतुर्वारं गत्वा तस्याः कुशलक्षेमं पृच्छति स्म।

अद्य यदा मङ्गलः आगतः तदा माता अपृच्छत्- "मङ्गल, बालान् न दर्शयिष्यति किम्?"।

"मातः भवती स्वयं तान् द्रष्टुम् इच्छां प्रकटयेत् इति अहं चिन्तयामि स्म। मोहिनी अपि बहुवारम् इच्छति स्म यत् आगत्य अहं भवत्याः चरणस्पर्शं कुर्याम्। किन्तु बिभेति स्म कदाचित् भवत्याः दुःखं भवेत्" इति मङ्गलः अवदत्।

"सत्यं पुत्र, तस्याः भयम् उचितम् एव। अहं यादृशं व्यवहारम् तया सह

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अकरवं, तदनन्तरं एवं चिन्तनं स्वाभाविकम् एव"।

"एवं नास्ति मातः। भवती अनुमतिं ददाति चेत् सा निश्चयेन अत्र आगत्य भवत्योः शुश्रूषां कुर्यात्"।

माता तूष्णीम् अतिष्ठत्। अनुजायाः यादृशी चिकित्सा श्वशुरगृहे भवति स्म सा इदानीं स्थगिता अभवत्। जलवायुपरिवर्तनं यावत् दीयमानानि औषधानि निषिद्धानि भवेयुः इति मङ्गलस्य चिन्तनम् आसीत्। एकदा सः अनुजाम् अवदत्- "सोहनि, इदानीं तव चिकित्सा अनुवर्तनीया" इति।

"भ्रातः, चिकित्सायाः आवश्यकता नास्ति। अहं पञ्चषेषु दिनेषु एव आत्मनि परिवर्तनं पश्यामि। स्वाभाविकी बुभुक्षा भवति। यत् खादामि तस्य पचनम् अपि सुष्ठुरूपेण भवति" इति सोहनी अवदत्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मायायाम् आधिपत्यम्

१

ऐन्द्रजालिकः जगदीशचन्द्रः मुम्बयीनगरात् धनोपार्जनं कृत्वा रामुणा सह स्वस्य ग्रामम् आगच्छत्। सः काश्मीरप्रदेशस्थिते जम्मुविभागे ऊधमपुरनगरस्य निवासी आसीत्। तस्य पार्श्वे बहु धनम् आसीत्। अतः सः तत्र नूतनं गृहं निर्मापयितुं प्रयत्नम् आरब्धवान्। तस्मिन् ग्रामे अपरम् अपि किञ्चन गृहं तस्य आसीत् एव। तस्मिन् प्राचीने गृहे तस्य मातापितरौ भगिनीभ्रातरौ च निवसतः स्म। ते सर्वे जगदीशचन्द्रस्य आचारविचारैः प्रसन्नाः न आसन्। तेषां समीपे समययापनार्थं किमपि करणीयं कार्यं न आसीत्। अतः जगदीशचन्द्रेण सह सर्वदा कलहं कुर्वन्ति स्म। तेभ्यः उद्विग्नः भूत्वा एव पूर्वं जगदीशचन्द्रः ऊधमपुरतः किश्तवारं प्रति, पुनः ततः भारतस्य सीमां लङ्घयित्वा तिब्बतप्रदेशं गतवान् आसीत्। पञ्चदशवर्षाणि यावत् बहिः स्थित्वा यदा सः प्रत्यागतः तदा तस्य बन्धवः इतोऽपि रुष्टाः अभवन्। यतः ते बन्धवः तस्य अनुपस्थितौ भूमौ स्वस्य आधिपत्यं मन्यन्ते स्म। इदानीं जगदीशचन्द्रस्य उपस्थितौ तत् आधिपत्यं तस्मै प्रत्यर्पणीयम् एव। जगदीशचन्द्रः तान् वदति स्म यत् मह्यं भूमिः न अवश्यकी। किन्तु ते तस्मिन् विश्वासं एव न कुर्वन्ति स्म। तेषां मतम् आसीत् यत् अकर्मण्यः एषः जगदीशचन्द्रः पितुः देहावसानस्य पश्चात् अस्मान् पीडयेत् इति।

तेषां मनसि विद्यमानम् एतं भावम् अवगत्य एव जगदीशचन्द्रः धनम् अर्जयितुं मुम्बयीनगरं प्रति आगच्छत्। तत्र सः रामुणा अमिलत्। मुम्बयीनगरे सार्धैकलक्षम् उपार्ज्य यदा सः गृहं प्रत्यागतः तदा तस्य मातापितरौ अन्ये बन्धवः च नितान्तं रुष्टाः आसन्। यतः अकर्मण्यशीलं जगदीशचन्द्रं भोजयितुं पाययितुं च भारं सोढुं ते कथं शक्नुयुः। एकदा तस्य पिता तम् एकान्ते आहूय "जगदीशचन्द्र, अयं कः अस्ति? युवयोः

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पालनस्य व्ययभारं वयं कथं सोढुं शक्नुमः?" इति अपृच्छत्।

"पितः, एषः स्वस्य व्ययं स्वयम् एव करिष्यति"।

"किन्तु, किमर्थम् एषः आगतः अस्ति?"

"मत्तः मदीयां विद्यां शिक्षितुम्"।

पिता स्मितम् अकरोत्। सः अपृच्छत्- "कीदृशीं विद्यां त्वं जानासि?"

"यां कामपि जानामि, तत्सर्वम् एकदा भवतः पुरतः प्रकटयिष्यामि"।

"किमपि भवतु। वयम् एतस्मै भोजनाय स्वल्पम् अपि अन्नं न दास्यामः" इति निर्णयं श्रावितवान् जगदीशचन्द्रस्य पिता।

"यत्किमपि आवां स्वीकरिष्यावः तस्य मूल्यं भवते दास्यावः"।

ग्रामात् बहिः कस्माच्चित् पञ्चशतेन रुप्यकैः भूमिक्रयणं कृत्वा गृहनिर्माणस्य कार्यम् आरब्धम्। जगदीशचन्द्रेण आरब्धं कार्यं दृष्ट्वा, तथा तस्य आहारविहारस्य स्तरम् अभिज्ञाय मातापितरौ आश्वस्तौ जातौ। इदानीं तयोः मतम् आसीत् यत् रामुः कश्चन धनिकपुत्रः अस्ति। अपि च जगदीशचन्द्रः स्वेन मायाजालेन तं वञ्चते इति।

षड्मासाभ्यन्तरे गृहं निर्मितं जातम्। तन्मध्ये जगदीशचन्द्रः रामुम् मनः एकाग्रं कर्तुम् उपायम् अवदत्। उभौ अपि प्रातः उत्थाय ग्रामात् दूरं अरण्यं गच्छतः स्म। स्वीयानि इन्द्रियाणि वशीकृत्य पूर्णशक्त्या कस्मिंश्चित् वस्तुनि मनः केन्द्रितं कुरुतः स्म।

चञ्चलस्वभाववतः रामोः कृते एतत् कार्यं किञ्चित् कठिनम् आसीत्। तथापि सः तत्कार्यं न अत्यजत्। बहुविधानि चित्राणि निर्माय वृक्षेषु उद्बन्धनं कृत्वा ध्यानं साधयितुं प्रयत्नं करोति स्म। जगदीशचन्द्रः तं जपितुं किञ्चन मन्त्रम् अपि उपदिष्टवान् आसीत्।

यावत् गृहं निर्मितं जातं तावत् रामोः एकाग्रचित्तता अपि क्रमशः प्रवृद्धा। तस्मात् तस्य स्मरणशक्तिः तीव्रतरा जाता। तस्य बुद्धिः अपि तीक्ष्णा जायमाना आसीत्। जगदीशचन्द्रः पूर्वं तिब्बते वासं कुर्वन् संस्कृतम् अपि पठितवान् आसीत्। रामुः अपि तस्मात् संस्कृतं पठति स्म। जगदीशचन्द्रः तिब्बततः प्रत्यागत्य वर्षचतुष्टयं यावत् आंग्लम् अपि पठितवान् आसीत्। अतः रामुः तत् अपि पठति स्म। जगदीशचन्द्रः संगीतम् अपि अभ्यस्तवान्। रामोः मनः अपि संगीतेन आकृष्टं जातम्।

रामोः बुद्धेः विकासः जायमानः आसीत्। एतादृशः विकासः आयुषः कारणात् न, अपि तु योगसाधनाभ्यां भवति। तेन सह सम्भाषणं कर्तुम् इच्छुकस्य जनस्य भाषणात् पूर्वम् एव सः तस्य जनस्य मनोगतं भावम् अवगत्य समाधानं चिन्तयति स्म।

संयमेन शक्तिः वर्धते इति एकदा जगदीशचन्द्रः तम् अबोधयत्। पुनः सः "अन्ततोगत्वा सा शक्तिः तावत् वर्धते, यया शक्त्या सर्वे अपि जनाः वशीकर्तुं शक्याः। यः कोऽपि जनः यदि तस्याः शक्तेः परिधौ आगच्छति तर्हि सः तथैव चिन्तयति यथा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संयमी पुरुषः चिन्तयति। ततः यत्किमपि कार्यं वशीभूतस्य तस्य द्वारा कारयितुं शक्यते" इति अवदत्।

रामुणा पृष्टे सति जगदीशचन्द्रः संयमस्य अर्थम् अपि बोधितवान्। सः अवदत् यत् इन्द्रियाणां वशीकरणम् एव संयमः कथ्यते। वशीकरणस्य एतत् तात्पर्यं नास्ति यत् तेषां प्रयोगः एव न करणीयः। यथेच्छम् इन्द्रियाणां द्वारा स्वस्य कार्यसाधनम् इति वशीकरणस्य अर्थः भवति।

रामुः जगदीशः च नवनिर्मितं गृहं गतवन्तौ। तत्र मनः एकाग्रं कर्तुम् अधिकम् आनुकूल्यम् प्राप्तवन्तौ। जगदीशचन्द्रस्य बन्धवः चिन्तयन्ति स्म 'तत् गृहं रामोः अस्ति' इति। तस्मात् रामोः मानः जगदीशचन्द्रस्य तु अपेक्षया अपि अधिकः जातः। जगदीशचन्द्रः एतयोः मानापमानयोः विषये किमपि नैव चिन्तयति स्म।

कालः अतीतः। गच्छता कालेन रामुणा योगाभ्यासद्वारा अधिकाधिकः लाभः प्राप्तः। तस्य प्रगतिम् अवलोक्य जगदीशचन्द्रः अपि सन्तुष्टः अभवत्। एकस्मिन् दिने योगाभ्यासं समापितवन्तं रामुम् आहूय जगदीशचन्द्रः अपृच्छत्- "रामो, तव वयः किम्?" इति।

"गुरुदेव! अहं द्वाविंशतिवर्षीयः अस्मि"।

"मम पिता बहुभ्यः दिनेभ्यः एकं विषयं वदन् अस्ति। तं विषयं त्वां कथयितुम् इच्छामि स्म। किन्तु मम अनुज्ञायाः पालनं न भवेत् इति भयम् आसीत्। ते इच्छन्ति यत् त्वं मम अनुजायाः पाणिग्रहणं कुरु इति। अहं तु अद्यावधि तं विवाहविषयम् अपसारयामि स्म। किन्तु अद्य सर्वं विषयं वक्तुं विवशः जातः अस्मि। अतः सर्वं प्रकटनम् एव वरम् इति मन्ये"।

"गुरुदेव! मम साधना इदानीं पूर्णा न जाता"।

"अस्तु! अहं एतस्मिन् विषये दुराग्रहं न करोमि। यदि त्वम् इच्छसि तर्हि दिनद्वयस्य पश्चात् विवाहस्य प्रबन्धनं कर्तुं शक्यते"।

"भवतः आदेशः अस्ति चेत् मया क्रियमाणा साधना अपि त्यक्तुं शक्यते। भवतः अनुज्ञायाः अवहेलनां न करिष्यामि"।

"मनसः प्रेरणया कार्यं कुरु। साधनायाः प्रश्नः अस्ति चेत् तस्याः स्तरः तु त्वया तावत्पर्यन्तं प्राप्तः अस्ति यत् केनापि सः न्यूनीकर्तुं न शक्यते"।

"किन्तु, गुरुदेव! मम धृष्टतायाः कृते क्षमां याचे। भवान् अद्यावधि किमर्थं विवाहं न अकरोत्?" इति रामुः अपृच्छत्।

जगदीशचन्द्रः स्मितं कुर्वन् रामोः मुखम् अपश्यत्। रामुणा पुनः पृष्टे सतिः सः अवदत्- "अहम् अद्यावधि जीवनसङ्गिनीं न आप्नुवम्"।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"कोऽपि विवाहस्य आग्रहं न कृतवान् कदाचित्?"

"एवं नास्ति। अहं मम योगसाधनाबलेन पूर्वजन्मनः सङ्गिनीम् अन्विष्टवान् अस्मि। सा अतीव सुन्दरी, मम हृदयस्य च अधिनायिका अस्ति। सा अधुना अस्मिन् एव जगति अस्ति। किन्तु वयसा कनीयसी अस्ति। यदा सा विवाहयोग्या भविष्यति तदा तस्याः पाणिग्रहणं करिष्यामि"।

"सा कुत्र निवसति?" इति आश्चर्येण अपृच्छत् रामुः।

२

"सियालकोटात् द्विमीलमितं दूरं कश्चन बडानामकः ग्रामः अस्ति। पित्रा पोष्यमाणा सा तस्मिन् एव ग्रामे अस्ति"। इति जगदीशचन्द्रः अवदत्।

"बडाग्रामः! सः तु मदीयं जन्मस्थलम् अस्ति। सा कस्य पुत्री अस्ति?"

"अहं विगतजन्मनि नेपालदेशस्य कस्मिंश्चित् ग्रामे निवसामि स्म। अहं तस्याः पाणिग्रहणम् अकरवम्। तस्याः नाम भामिनी आसीत्। आवयोः परस्परं बहु प्रेम आसीत्। यथा मम स्मरणम् अस्ति तथा तु पूर्वजन्मसु तया सह एव विवाहः जातः आसीत्......

"आवयोः विवाहस्य पञ्चमासानां पश्चात् कश्चन सर्पः माम् अदशत्। मम देहावसानः जातः। तस्मिन् समये भामिन्याः उदरे पुंशिशुः आसीत्। सा तं पालयितुम् एव जीविता आसीत्..........

"यदा बालकः विंशतिवर्षीयः अभवत् तदा तस्य विवाहः जातः। ततः पौत्रः जातः। पौत्रस्य पालनं कुर्वती भामिनी पञ्चपञ्चाशत्तमे वर्षे दिवङ्गता। तन्मध्ये मम इतोऽपि एकं जन्म अभवत्। विवाहः अपि जातः। किन्तु तदानीन्तनायां भार्यायां मदीयं प्रेम न आसीत्। आवां आजीवनं कलहम् एव कुर्वः स्म। पञ्चानां वर्षाणां पश्चात् अहम् आत्महननम् अकरवम्। गङ्गायां मदीयं शरीरं विसर्जितं जातम्। एतस्मिन् काले भामिन्याः अपि पुनः जन्म अभवत्। किन्तु पञ्चदशतमे वयसि एव तस्याः देहान्तः अभवत्। अधुना चौधरिमङ्गलस्य गृहे तस्याः जन्म अभवत्। इदानीं तस्याः वयः केवलं नव एव। षड्वर्षाणि इतोऽपि प्रतीक्षां कृत्वा ताम् आह्वास्यामि" इति पूर्वजन्मसु प्रवृत्तं सर्वं जगदीशचन्द्रेण उक्तम्।

"मङ्गलचौधरी! बडाग्रामः! सियालकोटात् द्विमीलमितं दूरं .... गुरुदेव! मङ्गलः मम अग्रजः अस्ति। सा बालिका मम भ्रातृपुत्री अस्ति। भवान् किं तावत्कालं प्रतीक्षां करिष्यति?" इति अपृच्छत् रामुः।

"यद्यपि मम आयुः तदा सप्तचत्वारिंशत् भविष्यति तथापि अहं सिद्धिबलेन वयसः आन्तर्यं न्यूनीकर्तुं शक्नोमि। यदा अहं कदाचित् तस्याः चिन्तनं करोमि तदा ग्रामे कस्मिंश्चित् गृहे ताम् एव क्रीडन्तीं कूर्दन्तीं गृहकार्याणि कुर्वतीं भामिनीं पश्यामि।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वज्रचूर्णेन निर्मितं किञ्चन विशालं गृहम् अस्ति। वाटिकायां कश्चन कूपः अस्ति। अस्मिन् कूपे किञ्चन जलसंयत्रम् अस्ति। गृहे विद्युत्व्यवस्था अपि अस्ति। तत्र सर्वम् आनुकूल्यम् अस्ति"।

"किम् एतत् मङ्गलभ्रातुः गृहम् अस्ति?"

"आम्! सः विदेशं गत्वा बहु धनम् अर्जितवान्। अस्मिन् समये अपि सः परिश्रमेण प्रामाणिकतया च स्वस्य जीवननिर्वहणं करोति"।

रामुः तत् दिनम् अस्मरत्, यस्मिन् दिने मिथ्याभाषणं कृत्वा मातरं तद्विरुद्धां कृतवान् आसीत्। अद्यतनीयेन सम्भाषणेन तस्य मातुः स्मरणं जातम्। तस्य मनः मात्रा मेलितुम् ऐच्छत्। सः अकथयत्- "गुरुदेव, मम मनः मात्रा मेलितुम् इच्छति" इति।

"एतावता त्वं सिद्धेः तावन्तं स्तरं न आप्नोः येन मनः जेतुम् शक्यम्। कारणं तु एतद् एव यत् त्वदीयं मनः त्वां मात्रा सह मेलितुं प्रेरयत् अस्ति"।

"एषः विषयः नास्ति गुरुदेव! अहं तत्र गमनेच्छां परिवर्तयितुं शक्नोमि"।

जगदीशचन्द्रः स्मितं कुर्वन्- "एषः लज्जास्पदः विषयः नास्ति। अहम् अपि पूर्णतां न आप्नुवम्। अहम् इतोऽपि परब्रह्मणि परमात्मनि स्वकीयम् अस्तित्वं लीनं कर्तुम् अनर्हः अस्मि। एतादृशीं सिद्धिं प्राप्तवन्तं जनं योगेश्वरः इति वदामः। तदा एव सर्वम् एकरसमयम् एकरूपं च प्रतीतं भवति"।

"मम शिक्षायाः अभ्यासस्य तपस्यायाः च दशवर्षाणि व्यतीतानि। अस्मिन् काले मया बहु किमपि प्राप्तम्। परं ताम् अवस्थां न प्राप्तवान् यां भवान् प्राप्तवान् अस्ति"।

"सा स्थितिः तु कदापि न आगमिष्यति। यतः अहम् अपि अत्र प्रगतिं साधयितुं प्रयत्नं करोमि। यदि अहं यत्नशीलः तर्हि आवयोः मध्ये सदैव अन्तरं भवेत् एव। तथापि त्वयि सा शक्तिः तु उत्पन्ना एव या शक्तिः मयि त्वया सह प्रथममेलने विद्यमाना आसीत्"।

"आं, किन्तु तत्कार्यम् अहम् अधुना बालक्रीडा एषा इति भावयामि। तत् कौशलं दर्शयितुं मयि उत्साहः अपि नास्ति"।

"एषा एव स्थितिः मदीया आसीत्। मम भगिन्यः भ्रातरः च मां धनोपार्जनं कर्तुं विवशं कृतवन्तः आसन्। अतः एव यदा मम पार्श्वे विंशतेः वर्षाणां कृते आजीविकानिमित्तं धनम् आगतं तदा मुम्बयीनगरम् अत्यजम्। साध्यं धनं नास्ति। साध्यं तु आत्मोन्नतिः अस्ति"।

"अहम् ऐन्द्रजालिकस्य कौशलं शिक्षितुम् आगतः आसम्। किन्तु तत् कौशलम् इदानीं नीरसं साधारणम् इव प्रतीयते। मम इच्छा तु इदानीम् आकाशे चन्द्रलोके सूर्यलोके च भ्रमितुं भवति"।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"एषा इच्छा स्वाभाविकी एव। किन्तु एषा यदि पुनः पुनः उद्भवति तर्हि एतत् अपि एकस्मिन् समये वृथा चिन्तनम् इति प्रतीयते। मम विचारः तु एषः अस्ति यत् त्वं विश्वे अटनं कुरु। मनः इन्द्रियाणि च वशीकृत्य ज्ञानवृद्धिं कुरु"।

"गुरुदेव, भवान् अपि मया सह आगच्छतु। सियालकोटं गत्वा ततः बडाग्रामं प्रति गमिष्यावः। अग्रजेन सह मम कीदृशः व्यवहारः भवेत् इति वक्तुं न शक्नोमि। तथापि आवाभ्यां तत्र गन्तुं तु शक्यते एव।

"इदानीं मास्तु। अहम् इच्छामि यत् भामिनी इतोऽपि ज्येष्ठा भवेत्"।

"कानिचित् वर्षाणि यावत् तत्रैव स्थास्यावः। तदा भवान् तस्याः पाणिग्रहणं कर्तुम् अर्हति"।

"मीनायाः विवाहविषये तव कः अभिप्रायः?"

"अधुना मम इच्छा नास्ति"।

जगदीशचन्द्रः अहसत्।

३

चौधरिमङ्गलस्य कार्यं तथैव अनुवर्तते स्म। धनधान्येन सम्पन्नः सन् अपि सः स्वयं भूमेः कर्षणं सेचनं समीकरणं च करोति स्म। कः जनः कीदृशं कार्यं कर्तुम् अर्हः तथा च कः कियता कालेन किं कार्यं पूर्णं कुर्यात् इति अनुभवबलेन सः अवागच्छत्।

ऋतुपरिवर्तनकाले किञ्चित् अव्यवस्था भवति स्म। किन्तु श्रमेण शक्त्या च कार्यं निरन्तरम् अग्रे सरत् आसीत्। प्रतिवर्षं धान्योत्पादनेन लाभः भवति स्म। मङ्गलेन गृहस्य तादृशी व्यवस्था कृता आसीत् येन सर्वाः अपि आवश्यकताः गृहात् एव पूर्णाः भवन्ति स्म। तदर्थम् अतिरिक्तः व्ययः करणीयः न आसीत्। यदि स्वल्पः व्ययः आसीत् तर्हि केवलानां बालानां शिक्षणार्थम् एव।

मङ्गलस्य चत्वारि अपत्यानि आसन्। ज्येष्ठपुत्रस्य नाम कुलदीपः आसीत्। सः चतुर्दशवर्षीयः। अस्मिन् समये सः पठितुं नगरं प्रति गच्छति स्म। सः दशमकक्षायां पठति स्म। कृष्णचन्द्रः तस्य अनुजः आसीत्। एकादशवर्षीयः सः अष्टमकक्षायां पठति स्म। तृतीयम् अपत्यम् आसीत् मानिनी। सा नववर्षदेशीया। अस्याः जन्म नैरोबी इति नगरे अभवत्। सा पठितुं न गच्छति स्म। दीपः एव तां किमपि पाठयति स्म। चतुर्थम् अपत्यं प्रेमचन्दः आसीत्। षड्वर्षदेशीयः सः द्वितीयकक्षायां पठति स्म।

एतेषां त्रयाणां बालानां पाठनव्ययः प्रतिमासं विंशतिः रूप्यकाणि आसन्। एतस्मात् व्ययात् अतिरिच्य मङ्गलस्य गृहस्य सर्वाः अपि आवश्यकताः तत्रैव पूर्णाः भवन्ति स्म।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गृहे सः विद्युत्व्यवस्थां कारितवान् आसीत्। विद्युतः उत्पादनार्थं मृत्तैलयुक्तं किञ्चन यन्त्रं गृहस्य पृष्ठतः तेन स्थापितम् आसीत्। गृहस्य अन्तः नलिका अपि आसीत्। जलयन्त्रेण गृहस्य छदेः उपरि विद्यमाने जलागारे जलं पूर्यते स्म। गृहे सर्वाणि वस्तूनि आसन्। स्वच्छता सुरक्षा इति उभयम् अपि मोहिनी एव करोति स्म। ग्रामस्य द्वे महिले तस्याः कार्ये साहाय्यं कुरुतः स्म।

मङ्गलस्य माता अनुजा सोहनी च ग्रामे एव वासम् अकुरुताम्। सोहन्याः पतिः द्वितीयं विवाहम् अकरोत्। एतस्याः सर्वाणि अपि आभूषणानि नत्थूमलस्य पार्श्वे एव आसन्। एकम् अपि आभूषणं तेन न प्रदत्तम्। एकदा मङ्गलः मात्रा सह तस्मात् धनम् आनेतुं गतः आसीत्। किन्तु नत्थूमलः व्याजं प्रदर्श्य तौ ततः प्रतिप्रेषितवान्।

सोहनी तस्याः माता च एवम् अनुभवतः स्म यत् कथं ते वञ्चनां प्राप्य मूर्खे जाते इति। मङ्गलः तु जातानां घटनानाम् ईषत् अपि चर्चां विनैव तयोः कृते उचितं प्रबन्धनं कृतवान् आसीत्। सोहनी शीघ्रं स्वस्था अभवत्। तस्यां किञ्चित् बलम् अपि आगतम्। सा एकदा पतिम् आहूतवती आसीत्। किन्तु सः न आगतः। तस्य पुनः विवाहः जातः इति पश्चात् ज्ञातवती।

इत्थं नत्थूमलस्य कुटुम्बात् सम्बन्धविच्छेदः जातः। माता लज्जाम् अनुभूय मङ्गलं पितुः क्षेत्रेषु कर्षणं कर्तुम् अकथयत् परिणामतः मातुः अनुजायाः च जीवनं सुखमयं जातम्। मङ्गलस्य कृषिकार्याणि अपि सुचारुतया अग्रेसराणि आसन्।

सोहनी तस्याः माता च पुरातने गृहे एव वासम् अकुरुताम्। मङ्गलः तु अपत्यैः साकं नूतने गृहे वसति स्म। तथापि मोहिनी श्वश्र्वाः समीपं निरन्तरं गमनागमनं करोति स्म। कानिचित् दिनानि यावत् तस्याः श्वश्रूः ननान्दा च सङ्कोचम् अकुरुताम्। किन्तु कालक्रमेण मोहिन्याः सौजन्येन च तयोः सङ्कोचः अपगतः।

अद्य सा मानिनीं आत्मना सह तत्र अनयत्। सोहनी अपृच्छत्- "भ्रातृजाये! भोजनं कृतं न वा?" इति।

"नैव। इदानीम् एतस्याः पिता नगरात् न प्रत्यागतः। यदा सः आगमिष्यति तदा खादिष्यामि"।

"भ्राता कदा प्रत्यागमिष्यति?"

"मध्याह्नस्य पश्चात् एव तेन प्रत्यागन्तव्यम् अस्ति"।

"तावत् बुभुक्षिता एव प्रतिपालनं वा?" इति सोहनी आश्चर्येण अपृच्छत्।

"न, प्रातः अल्पाहारम् अकरवम्। अद्य भोजने किञ्चित् विलम्बः भवति चेत् कष्टं नास्ति" इति प्रत्यवदत् मोहिनी।

Funding by IKS-MoE

"अस्तु। किञ्चित् दाधिकं पिबतु" इति उक्त्वा सोहनी दाधिकेन पूर्णं चषकं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथा तस्य उपरि मुष्टिमितं नवनीतं संस्थाप्य आनयत्।

मोहिनी तत् पातुं मानिन्यै प्रादात्। सोहनी इतोऽपि दाधिकम् आनेतुं गच्छन्ती एव आसीत्। किन्तु तस्मिन् एव समये बहिर्भागतः मङ्गलस्य आह्वानध्वनिः श्रुतः- "मातः, पश्यतु कः आगतः" इति।

मोहिनी गृहस्य देहलीं प्रति आगता। किन्तु पत्या सह आगतवन्तं द्वाविंशतिवर्षीयं युवानं दृष्ट्वा संकोचवशात् पृष्ठतः अगच्छत्। मङ्गलः अहसत्।

मोहिनी अस्य हासस्य कारणं किम् इति अवगन्तुं प्रयत्नं कुर्वती एव आसीत् तदा एव रामुः अवनतः भूत्वा चरणस्पर्शं कुर्वन्- "भ्रातृजाये! प्रणमामि। माम् अभिज्ञातवती किम्?" इति अपृच्छत्।

मोहिनी तम् अभिज्ञातवती। सा अवदत्- "रामो, आगतः वा? एतावान् ज्येष्ठः जातः यत् तव अभिज्ञानम् एव न जातम्। आगच्छ, माता तव प्रतिपालनं कुर्वती वृद्धा जाता अस्ति" इति।

रामुः मोहिन्या सह अन्तः अगच्छत्। मङ्गलेन सह अपरः अपि कश्चन पुरुषः आसीत्। सः दृढकायः तेजसा भ्राजमानः सुन्दरः आकृतिमान् च। रामुः यदा अन्तः गतः तदा मङ्गलः अवदत्- "एषः रामोः गुरुः अस्ति। तेन सह एव आगतः। अन्तः गच्छतु! .... एषः द्वित्राणि दिनानि अत्र एव वासं करिष्यति" इति।

मोहिनी अत्यन्तं प्रभावशालिनम् एतं पुरुषं दृष्ट्वा स्तब्धा जाता। किन्तु एषः अत्र एव वासं करिष्यति इति अवगम्य सचेतनं प्राप्तम्। मङ्गलः जगदीशचन्द्रेण सह अन्तः आगच्छत्।

मङ्गलः अपश्यत् यत् रामुः मातुः चरणौ स्पृशन् क्षमां प्रार्थयति। माता नेत्राभ्याम् अश्रुधारां स्रावयन्ती आसीत्। सोहनी हस्ताभ्यां दाधिकमयं चषकं गृह्णती स्थिता आसीत्। मानिनी मन्दं दाधिकात् नवनीतं निष्कास्य खादन्ती आसीत्।

मङ्गलेन सह आगच्छन्तं तम् अपरिचितं पुरुषं दृष्ट्वा माता अश्रुमार्जनं कुर्वती- "पर्याप्तं, पुत्र! बहु सम्यक् कृतं यत् त्वम् अत्र आगतः" इति अवदत्।

४

रामुः जगदीशचन्द्रः च तस्मिन् प्रकोष्ठे वासम् अकुरुतां यस्मिन् प्रकोष्ठे पूर्वं मङ्गलः निवसति स्म। रामुः मातरम् एकदा अवदत् 'अहं गुरुणा सह कानिचित् दिनानि भ्रमितुं गमिष्यामि' इति। किन्तु माता न इच्छति स्म। सा पुनः पुत्रवियोगं सोढुं न शक्नोति स्म। तथापि जगदीशचन्द्रस्य प्रभावकारणतः सा विवशा जाता।

अत्र आगमनात् परम् अपरस्मिन् दिने एव जगदीशचन्द्रः अकथयत्- "मातः,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रामुणा अनुभवप्राप्त्यर्थं मया सह गन्तव्यम् एव" इति।

माता मौनम् आश्रयत्। सोहनी अवदत्- "गुरुदेव! माता तादृशं योग्यं पुत्रं द्रष्टुम् इच्छति यः जीविकोपार्जनं कर्तुं समर्थः भवेत्। ततः मातापितरौ सुखिनौ कृत्वा विवाहं कृत्वा वंशवृद्धिं कुर्यात्" इति।

"किं मङ्गलः एतत्सर्वं न करोति?"

सोहनी एतं प्रश्नं श्रुत्वा सङ्कोचवशात् तूष्णीम् अतिष्ठत्। सा मङ्गलं विरुध्य किमपि वक्तुम् न इच्छति स्म। मौनम् आश्रितवतीं तां दृष्ट्वा जगदीशचन्द्रः अवदत्- "रामुः यत् कार्यं कुर्वन् अस्ति, तेन तस्य तत्कुटुम्बस्य च, द्वयोः अपि कल्याणं भविष्यति" इति।

रामुः यदा लालनत्थूमलस्य कापट्यम् अवागच्छत् तदा तस्य मनसि मातुः सम्पत्तेः प्रत्यर्पणस्य विचारः आगतः। सः स्वस्य विचारं जगदीशचन्द्रस्य अग्रे अपि प्राकटयत्। तदा जगदीशचन्द्रः- "तथैव भवतु। तादृशः जनः निश्चयेन शिक्षणीयः" इति अवदत्।

रामुः तस्मिन् एव दिने सायङ्काले शङ्करनत्थूमलाभ्यां मेलितुम् अगच्छत्। आपणः पिहितः आसीत्। पितापुत्रौ गृहे एव आस्ताम्। यदा रामुः द्वारशब्दम् अकरोत् तदा वातायनात् शङ्करस्य माता आत्मानं निगूढयन्ती तम् अपश्यत्। सा रामुं न अभिज्ञातवती।

अत्तः सा अपृच्छत्- "कः भवान्?" इति।

"शङ्करेण मेलितुम् इच्छामि"।

"भवतः नाम किम्?"

"रामुः"।

शङ्करस्य माता तम् अभिज्ञाय- "अत्र तव भगिनी नास्ति" इति उक्तवती।

"अहं भगिन्या सह नैव, शङ्करेण सह मेलितुम् इच्छामि"।

"सः त्वया मेलितुं न इच्छति"।

"अधः आगत्य द्वारम् उद्घाटयतु नोचेत् सम्यक् न भवेत्"।

"गच्छ इतः, नोचेत् आरक्षकम् आह्वास्यामि"।

"आरक्षकाः तु मया एव आहूताः। पश्यतु तत्र" इति उक्त्वा अङ्गुलिनिर्देशेन वीथिमार्गं प्रति सङ्केतम् अकरोत् रामुः। वेशभूषां धृतवन्तः दश द्वादश वा आरक्षकाः तत्र स्थिताः सन्ति इति शङ्करस्य मातुः अभासत। सा भीता जाता। तस्याः पादौ प्रतिनिवृत्तौ अभवताम्। सा प्रत्यागत्य पतिं पुत्रं च सर्वम् अकथयत्। कम्पमानः शङ्करः अधः आगत्य द्वारम् उद्घाट्य अपृच्छत्- "वद, किं कार्यम् अस्ति?" इति।

"भवन्तं भवत्पितरं च किमपि प्रष्टुम् आगतः"।

"किम्?"

"अत्र वीथ्याम् एव श्रोतुम् इच्छति किम्? जनाः अत्र आगच्छन्तः सन्ति। किं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तेषां पुरतः एव वदानि?"

शङ्करः पादाग्रम् उपरि कृत्वा अपश्यत्। तत्र वीथ्यां कस्मिंश्चित् कोणे आरक्षकाः तेन दृष्टाः। तस्मात् भीतः सन् रामुम् गृहस्य अन्तः अनयत्। रामुः अवदत्- "लालवर्यम् अपि आह्वयतु" इति।

शङ्करः रामुं तत्रैव परित्यज्य पूर्वं गृहस्य द्वारम् पिहितवान्। द्वारं तालेन पिधाय सः पितुः प्रकोष्ठम् अगच्छत्। तस्य माता पूर्वम् एव रामोः आगमनस्य सूचनां दत्तवती आसीत्। लालनत्थूमलः तु शङ्करमुखात् सर्वं वृत्तान्तं श्रोतुम् औत्सुक्येन प्रतिपालनं कुर्वन् आसीत्।

शङ्करः तत्र प्राप्य सर्वां परिस्थितिम् विवृतवान्। अपि च- "अहं द्वारं तालेन पिधाय आगतः अस्मि येन कोऽपि अन्तः प्रवेष्टुं न शक्नुयात्। इदानीं भवान् निर्भयतापूर्वकं शङ्करेण सह वार्तालापं कर्तुं शक्नोति। आरक्षकाः इदानीं वीथ्याः अपरस्मिन् भागे सन्ति" इति अवदत्।

"पश्य! रामुणा सह सम्भाषणात् पूर्वं त्वम् आरक्षकैः मेलनं कृत्वा तेषाम् आगमनस्य कार्यस्य च रहस्यं ज्ञात्वा आगच्छ"।

एषा योजना शङ्कराय भृशम् अरोचत। लालनत्थूमलः रामुणा सह सम्भाषितुम् उपवेशनप्रकोष्ठम् आगतः। शङ्करः तु द्वारम् उद्घाट्य आरक्षकैः मेलितुं तेषां गुह्यं च अवगन्तुं बहिः अगच्छत्।

आगतं नत्थूमलं दृष्ट्वा हस्तौ योजयित्वा प्रणामं कुर्वन्- "लालवर्य! एवं भाति यत् भवतः आरोग्यं सम्यक् नास्ति" इति रामुः अवदत्।

"त्वं तु युवकत्वं प्राप्तः असि। वद, कुत्र आसीः एतावन्ति दिनानि?"

"अहं काश्मीरं गतवान् आसम्। तत्र केनचित् गुरुणा मेलितः। तस्य सेवायां दश वर्षाणि अतीतानि। इदानीं सः गृहम् आगन्तुम् अनुज्ञाम् दत्तवान् अस्ति"।

"तव विवाहः कदा भविष्यति?"

"इदानीं भवतः सान्निध्यम् आगतः अस्मि। भवान् कृपां करिष्यति चेत् सर्वं कार्यं भविष्यति"।

"त्वं मदीयः पुत्रसदृशः असि। यदि त्वं स्वस्य भूमेः रक्षणं कुर्याः तर्हि तव विवाहस्य प्रबन्धनं शीघ्रं करिष्यामि"।

लालनत्थूमलः वृथा एव सम्भाषणं कुर्वन् समययापनं कुर्वन् आसीत्। वस्तुतः सः शङ्करस्य आगमनस्य प्रतिपालनं कुर्वन् आसीत्। रामुः अपि स्वस्य आगमनस्य प्रयोजनम् अकथयन् एवम् अनभिज्ञः इव आत्मानं प्रकटयति स्म येन लालवर्यः तस्य चेतसि विद्यमानं सन्देहं द्वेषं वा न जानीयात्। अतः सः अवदत्- "लालवर्य! मम विवाहस्य व्यवस्थापनं जातम् अस्ति। भवान् जानाति एव यदि नूतना वधूः आगच्छेत् तदा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आभूषणानि आवश्यकानि एव। अत्र भवतः साहाय्यम् अपेक्षितम् अस्ति" इति।

"आम्! आम्! अहं युष्माकं कृते सर्वविधं साहाय्यं कर्तुम् उद्यतः अस्मि। वद, कीदृशं साहाय्यम् अपेक्षितम्?"

"मम माता भवतः पार्श्वे कानिचित् आभूषणानि स्थापितवती आसीत्। तेषु पञ्च आभूषणानि अपेक्षितानि। तानि कृपया ददातु"।

रामोः वचनं श्रुत्वा नत्थूमलस्य प्राणाः प्रत्यागताः इव। सः मनसि अचिन्तयत् 'एषा तु महती अभियाचना नास्ति। यदि एतावता एव आभूषणदानेन आरक्षकाः इतः गच्छेयुः तर्हि अहं नूनं रामोः अभियाचनां पूरयिष्यामि' इति। सः रामुम् अकथयत्- "तव माता तदीयानि सर्वाणि आभूषणानि न्यासरूपेण मम पार्श्वे अस्थापयत्। किन्तु त्वं तु मम पुत्रः इव असि। अहम् एतत् सर्वं तव कृते एव कर्तुं शक्नोमि। एतत् अपि वाञ्छामि यत् त्वं सर्वेषाम् आभूषणानां मूल्यं यथानुकूलं दास्यसि। एकस्मिन् कागदे हस्ताङ्कनं कृत्वा आभूषणानि नेतुम् अर्हसि" इति।

तस्मिन् एव काले प्रसन्नवदनः शङ्करः उपवेशनकक्षम् आगतः। सः आगत्य अनुक्षणम्- "पितः, आरक्षकाः तत्र न सन्ति। एवं भाति सर्वे तूष्णीं भूत्वा गताः" इति अवदत्।

एतां सूचनां प्राप्य लालवर्यस्य दृष्टिः परिवृत्ता जाता। सः सङ्केतेन अपृच्छत्- "द्वारे तालयोजनं कृतम् अस्ति खलु?" इति।

"आं, पितः"।

"रामो! तव माता आभूषणानि न्यासत्वेन स्थापयितुं मत्तः दश सहस्रं रूप्यकाणि स्वीकृतवती आसीत्। तस्य विषये अपि चर्चा आवश्यकी"।

"माता किमपि लिखित्वा प्रादात् भवते?"

"नैव। पुत्रवध्वाः मात्रा सह लेखनव्यवहारः मह्यं न अरोचत। किन्तु त्वम् आगतः असि। त्वया एव लिखित्वा दातव्यं खलु?"

रामुः अवदत्- "रूप्यकाणि माता स्व्यकरोत्। हस्ताङ्कनम् अहं किमर्थं कुर्याम्? मम तु एतावत् एव कथनम् अस्ति यत् पञ्च अल्पभारयुतानि आभूषणानि आवश्यकानि। यदि भवता तानि न दीयन्ते तर्हि मया आरक्षकाः आह्वातव्याः भवेयुः"।

"गच्छ, आह्वय तान्"!

"तत्र पश्यतु!" एवं कथयन् रामुः द्वारं प्रति सङ्केतम् अकरोत्। एकः प्रमुखः आरक्षकः द्वौ सामान्यौ आरक्षकौ च हस्ते निगडानि आदाय उपवेशनप्रकोष्ठं प्रति आगच्छन्तः आसन्। तान् दृष्ट्वा लालवर्यस्य मनसः घूर्णनं जातम् इव।

"एतान् किमर्थं त्वम् आहूतवान्?" इति लालवर्यः भीतः इव अपृच्छत्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"मम मात्रा स्थापितेषु आभूषणेषु पञ्च आभूषणानि आवश्यकानि सन्ति। लालवर्य! झटिति मदीया अभियाचना पूर्यताम्"।

शङ्करः धावन् एव द्वारं प्रति अगच्छत्। तत्र तालयुक्तं द्वारं यदा अपश्यत् तदा शिरः हस्ताभ्यां गृह्णन् तत्रैव उपविष्टवान्।

अन्तः लालनत्थूमलः रामुम् अवदत्- "त्वम् एतान् प्रतिप्रेषय। यत् इच्छसि तत् दास्यामि" इति।

रामुः स्मितं कुर्वन् आरक्षकप्रमुखम्- "आरक्षकमहोदय, भवान् किञ्चित्कालं बहिः तिष्ठतु" इति अवदत्।

प्रमुखः आरक्षकः अपरौ द्वौ आरक्षकौ च निगडानि पुनः पुनः उत्क्षिपन्तः ततः बहिः गतवन्तः। रामुः पुनः- "लालवर्य, अहं भवन्तं पितृतुल्यं भावयामि। भवान् इदानीं मया उक्तं कार्यं शीघ्रम् आचरतु। मया शीघ्रम् एव ग्रामं प्रति गन्तव्यम् अस्ति" इति अवदत्।

विवशः नत्थूमलः उपवेशनप्रकोष्ठात् उत्थाय बहिः गतः। बहिः आगत्य सः 'इदानीम् अपि द्वारे तालः योजितः अस्ति। तत्र द्वारम् आश्रित्य शङ्करः हस्ताभ्यां शिरः गृह्णन् अस्ति' इति अपश्यत्। तत्र कोऽपि आरक्षकः नास्ति इत्यपि नत्थूमलः अपश्यत्। सः शङ्करं ताडयन् इव सावधानम् अपृच्छत्- "शङ्कर, अत्र उपविश्य किं कुर्वन् अस्ति?" इति।

"पितः, ते कुत्र गताः इत्येव चिन्तयन् आसम्"।

"ते केन द्वारेण गताः?"

"किं ते गताः?" इति आश्चर्येण प्रतिप्रश्नं पृष्टवान् शङ्करः।

"आम्, उपवेशनप्रकोष्ठात् ते बहिः गतवन्तः।

शङ्करः उत्थाय आश्चर्यचकिताभ्यां नेत्राभ्यां पितुः मुखम् अपश्यत्। नत्थूमलः- "त्वम् अन्तः गत्वा उपविश अहम् आगच्छामि" इति उक्त्वा ततः गतः।

शङ्करः तु उपवेशनप्रकोष्ठं प्रति गतः। नत्थूमलः भूमिगृहस्य द्वारम् उद्घाट्य अन्तः प्रविष्टः। शङ्करः उपवेशनप्रकोष्ठं गत्वा- "ते आरक्षकाः गताः वा?" इति रामुम् अपृच्छत्।

"नैव खलु! तत्र पश्यतु!" इति कथयन् उपवेशनप्रकोष्ठात् बहिः द्वारं प्रति संकेतम् अकरोत् रामुः। शङ्करः आरक्षकान् अपश्यत्। सः तान् दृष्ट्वा पुनः नेत्रे निमील्य उपविष्टवान्। रामुः तस्य स्कन्धे हस्तं स्थापयन्- "किं भवान् नूतनया वध्वा सह मेलनं न कारयिष्यति? सा तु मम भगिनी इव एव अस्ति" इति अवदत्।

शङ्करस्य मुखात् ध्वनिः न निर्गच्छति स्म। रामुः तस्य दशाम् अपश्यन् अवदत्- "अहं ताम् आह्वयानि?" इति। रामुः यदा उत्थाय अन्यं प्रकोष्ठं प्रति गन्तुम् उद्युक्तः जातः तदा शङ्करः तस्य हस्तौ गृहीत्वा अकथयत्- "सा त्वया मेलितुं न इच्छति" इति।

"एवं कथं वदति भवान्? तत्र पश्यतु! सा स्वयं मां द्रष्टुम् आगच्छन्ती अस्ति"।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शङ्करः यदा मुखं परिवर्त्य अपश्यत् तदा काचित् महिला उपवेशनप्रकोष्ठस्य द्वारस्य पृष्ठे आत्मानं गोपयन्ती इव स्थिता आसीत्। शङ्करः उच्चैः अभाषत- "किं करोषि अत्र? इतः पलायनं कुरु" इति।

रामुः अहसत्। तस्मिन् एव समये शङ्करस्य पिता काञ्चित् पेटिकाम् उन्नीय उपवेशनकक्षम् आगतः। तस्य मुखं विवर्णं जातम् आसीत्। तस्य पूर्णं शरीरं कम्पमानम् आसीत्। ललाटे स्वेदबिन्दवः आगताः। रामुः तु स्मितं कुर्वन् आसीत्। शङ्करः ततः उत्थाय पत्नीं तर्जयितुं द्वारं प्रति अगच्छत्। नत्थूमलः पेटिकां रामोः पुरतः संस्थाप्य स्वयं नातिदूरम् उपविष्टवान्। ललाटे स्थितान् स्वेदबिन्दून् मार्जयन्- "एषा पेटिका तव मातुः अस्ति। तव मात्रा स्थापितानि सर्वाणि आभूषणानि अस्यां पेटिकायां सन्ति। यावत् आवश्यकं तावत् स्वीकुरु" इति अवदत्।

"भवान् स्वयम् एव निष्कास्य ददातु। कङ्कणानि, नासिकाभरणं, कण्ठहारः, केशाभूषणं, कर्णलोलकम् इति पञ्च आभूषणानि मह्यम् अपेक्षितानि सन्ति" इति रामुः नत्थूमलम् अवदत्।

नत्थूमलः दूरात् उपविश्य एव कुञ्चिकां रामोः पुरतः क्षिपन्- "एतत् स्वीकुरु। यत् इच्छसि तत् नय" इति अवदत्।

रामुः कुञ्चिकया पेटिकाम् उद्घाट्य अन्तः स्थितम् आवरणम् उत्थाप्य अपश्यत्। अस्मिन् समये पत्नी उपरि प्रकोष्ठं गतवती इति अवगत्य शङ्करः रामोः पृष्ठतः उपविष्टवान्। सः आभूषणानि निष्कासयन्तं रामुं पश्यन् आसीत्। यदा रामुः पेटिकायाः आवरणम् उद्घाटितवान् तदा शङ्करः उच्चैः चीत्कारम् एव अकरोत्। नत्थूमलः अपि ततः पलायितुम् उद्युक्तः अभवत्। रामुः झटिति आवरणं पिधाय तत्र तालयोजनं कृतवान्। तस्मात् पितापुत्रौ सन्तुष्टौ जातौ। यदा तौ उपविष्टौ तदा रामुः- "लालवर्य! किम् एतानि एव आभूषणानि सन्ति यानि मम माता भवतः पार्श्वे स्थापितवती आसीत्?" इति अपृच्छत्।

"आम्, एतानि एव। यदि त्वं इच्छसि तर्हि सर्वं नय"।

"यदा माता भवते आभूषणस्यूतं प्रादात् तदा भवान् तुलायां तोलनं कृतवान् आसीत् खलु? इदानीं तथैव तोलनं कृत्वा मह्यं ददातु"।

"नैव, नैव! त्वं सर्वं नय। वयं एतस्मात् किमपि न स्वीकुर्मः। रामो! एतां पेटिकां शीघ्रम् इतः नय"।

रामुः पेटिकां स्वीकृत्य ततः उत्थितवान्। नत्थूमलः शङ्करः च ततः किञ्चित् दूरं स्थितवन्तौ। यदा रामुः गच्छन् आसीत् तदा शङ्करः धावित्वा द्वारम् उद्घाटितवान्। रामुः बहिः गतः। शङ्करः गच्छन्तं रामुं द्वारे स्थित्वा अपश्यत्। दूरे वीथ्याः कोणे आरक्षकाः अपि तेन दृष्टाः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

५

रामोः गमनस्य पश्चात शङ्करः [illegible] आगच्छत्। तस्य पिता तम्- "आश्चर्यं जातं पुत्र! पेटिकायां किम् आसीत् इति दृष्टम् खलु त्वया?" इति आश्चर्यं प्रकटयन् अपृच्छत्।

"आम्, पितः! फणायुक्ताः सर्पाः आसन्। तेन अपि दृष्टं स्यात् खलु। किन्तु आश्चर्यं नाम सः पेटिकां स्वीकृत्य अगच्छत् ....

"आरक्षकाणाम् आगमनस्य उद्देशः कः इति मया न ज्ञातम्। पूर्वं ते वीथ्याः कस्मिंश्चित् कोणे स्थिताः आसन्। किन्तु यदा अहं तत्र अगच्छं तदा ते तत्र न आसन्। ततः प्रत्यागत्य गृहं यदा आगतं तत्समये ते गृहस्य अन्तः उपस्थिताः आसन्। गृहस्य द्वारम् अन्तस्तात् तालेन पिहितम् आसीत्। पश्चात् ते अत्र अपि न आसन्। तालम् अनुद्धाट्य एव ते पुनः वीथिमार्गम् आगताः ....

"तस्यां पेटिकायां पञ्चदश वा विंशतिः सर्पाः आसन्। कदाचित् अधिकाः एव स्युः। रामुः अपि तान् दृष्टवान् स्यात्। अतः एव पेटिकाम् उद्घाट्य अनुक्षणम् आवरणं पिहितवान् आसीत्। यदा सः पेटिकाम् उद्घाटितवान् आसीत् तदा अहं तस्य पृष्ठतः एव स्थितः आसम्। अहं तत्र फणायुक्तानां सर्पाणां बहून् गुच्छान् दृष्टवान् आसम्" इति विवृतवान् शङ्करः।

"मम पूर्णः विश्वासः अस्ति यत् अहं रामोः मातुः सर्वाणि आभूषणानि तत्र स्थापितवान् आसम्। जनाः वदन्ति यत् धनस्य रक्षणं कर्तुं सर्पाः आगच्छन्ति। किन्तु ते तालेन पिहितां पेटिकां कथं प्रविष्टाः?" इति आश्चर्यं प्रकटितवान् नत्थूमलः।

"पितः, एतत् सर्वं वञ्चनामयम् अस्ति"।

"तर्हि किम् अन्धः अहम्। त्वम् अपि अन्धः जातः किम्? यदा भूमिगृहं गत्वा लोहमञ्जूषातः आभूषणपेटिकाम् निष्कास्य नेयदीपस्य प्रकाशे पेटिकायाः आवरणम् उद्घाटितवान्, पुनः ततः किञ्चन आभूषणं स्वीकर्तुं हस्तं यदा अन्तः स्थापितवान् तदा एव कश्चन सर्पः फुत्कारम् अकरोत्। अनुक्षणं हस्तं बहिः आनयम्"।

पुत्रः तूष्णीम् आसीत्। किन्तु तस्य मनसि सन्देहः आसीत् एव। तस्य हृदये पूर्वपत्न्याः सोहन्याः कृते बहु प्रेम आसीत्। परं पितुः उद्दीपनात् सोहन्या सह तन्मात्रा सह च अनुचितं व्यवहारं करोति स्म। तस्य अनुचितस्य व्यवहारस्य कारणतः एव ते सेविके इव कार्यं कुरुतः स्म। तस्मात् सोहन्याः मनः खिन्नं जातम्। मातुः अवमाननं शरीरं प्रविष्टः शीतलोहः इव जातम्। अतः एव सा अस्वस्था जाता।

अद्य एतत् सत्यं शङ्करेण अवगतम्। स्वस्था भूत्वा यदा सोहनी मातृगृहं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रत्या[illegible] तदा तया काचित् समानपतिका प्राप्ता आसीत्। तस्याः समानपतिकायाः तन्नाम द्वितीयायाः पत्न्याः पिता शङ्कराय यौतुकरूपेण विंशतिसहस्रं धनं दत्तवान् आसीत्। किन्तु सा कुरूपा आसीत्। तस्मात् शङ्करः पौनः पुन्येन सोहनीं स्मरति स्म। अद्य आरक्षकाणां सर्पाणां दर्शनेन च एवं प्रतीयते स्म यत् एषः तेषाम् एव कुकर्मणां परिणामः इति। तदा स्वेन पित्रा च आचरितानि पापकर्माणि तेन बहुवारं स्मृतानि। सोहन्याः तन्मातुः च कृते तेन कृतान् अपराधान् स्मृत्वा विषण्णः।

सः पितरम्- "पितः, एतत् सर्वं अस्माभिः किं कृतम्? कदाचित् आवाभ्यां कृतानाम् अपराधानां फलं तु नास्ति एतत्?" इति अपृच्छत्।

"वयं किमपि अनुचितं कर्म तु न अकरवाम। सोहन्याः मातुः कृते दशवर्षाणि यावत् या अन्नपानादिव्यवस्था कल्पिता आसीत् तस्याः निमित्तम् एव तु धनं याचे। वस्तुतः लेखनपुस्तिकायां यत् लिखितम् अस्ति तत् तु दोषयुक्तं भवितुं न अर्हति खलु"।

"किन्तु, पितः! अन्ततोगत्वा तत् तु अनुचितम् एव। पैसाद्वयात्मकस्य दध्नः मूल्यं पैसाचतुष्टयं लिख्यते स्म"।

"एषः तु वाणिज्यस्य विषयः। प्रत्येकस्मिन् वाणिज्यकार्ये अस्माभिः लाभः प्राप्तव्यः एव"।

पितुः युक्तिः पुत्राय न अरोचत। तदनन्तरं तौ बहुकालं यावत् स्वस्वविचारसागरे निमग्नौ जातौ। अन्ततोगत्वा शङ्करः ततः उत्थाय गृहस्य छदेः उपरि अगच्छत्। तत्र प्राप्य सः- "लक्ष्मि!" इति आह्वयत्। लक्ष्मीः शङ्करस्य द्वितीयायाः पत्न्याः नाम आसीत्। शङ्करसोहन्योः किमपि अपत्यं न आसीत् न वा शङ्करलक्ष्म्योः। प्रकोष्ठतः एव लक्ष्मीः उत्तरम् यच्छन्ती- "तत्र स्थित्वा एव किमर्थम् आक्रोशति भवान्? अन्तः किमर्थं न आगच्छति?" इति अपृच्छत्।

लक्ष्मीः शङ्करस्य द्वितीया पत्नी आसीत् इत्यतः नियमानुकूलं सा तं नित्यं तर्जयति स्म। परम् अद्यतनं तर्जनं तस्य खिन्नतायै अलम् आसीत्। सा कस्यचन धनिकस्य पुत्री आसीत्। तस्मात् शङ्करः तर्जनं सोढुम् अभ्यसवान् जातः आसीत्। यदा सः भीतः मार्जारः इव प्रकोष्ठं प्रविष्टः तदा लक्ष्मीः अपृच्छत्- "किं जातम्?" इति।

"त्वम् अधः किमर्थम् आगता आसीः?"

"भवान् एव तु आहूतवान् आसीत्"।

"अहं! नैव खलु! अहं नैव आहूतवान्"।

"साधु! भवान् एव उक्तवान् आसीत्- 'लक्ष्मि! अधः आगच्छ! पश्य, तव भ्राता आगतः अस्ति' इति। अतः अहं गता। तत्र विद्यमानम् अपरिचितं पुरुषं दृष्ट्वा विस्मिता जाता। तस्मात् पृष्ठतः आगच्छम्"।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"अहं तु किमपि न उक्तवान् आसम्"।

"तर्हि किं सामान्यस्य एतस्य विषयस्य कृते अनृतं वदन् अस्ति भवान्? भवता सह मम निर्वहणं कथं शक्यम? इदानीं तु विवाहस्य वर्षद्वयम् एव अतीतम्"।

शङ्करः प्रहेलिकाम् एताम् अवगन्तुम् असमर्थः आसीत्। सः सोहनीं प्रति तेन कृतस्य व्यवहारस्य कारणतः दुःखम् अनुभवति स्म। सः मनसि सोहनीम् आनेतुं योजनां कुर्वन् आसीत्। अनया योजनया लक्ष्मीः कुपिता भवेत्, जीवनं नरकतुल्यं भवेत् च, इत्थं विचिन्त्य सः तूष्णीं भूत्वा उपविष्टः।

तूष्णीं भूत्वा उपविष्टं शङ्करं लक्ष्मीः "सः कः आसीत्"? इति अपृच्छत्।

"श्रीमति!" इत्येवं कथयन् कुपितः सन्- "अहं त्वाम् न आहूतवान् आसम्। सः मम पूर्वपत्न्याः अनुजः रामुः आसीत्। स्वस्य मातुः आभूषणानि स्वीकर्तुम् आगतः आसीत्। तानि स्वीकृत्य च गतः। अत्र उपविश्य एव सः उक्तवान् आसीत् यत् सः तव भ्राता अस्ति। त्वया मेलितुम् इच्छति। ततः अहम् अवदं यत् त्वं तेन सह मेलितुं न इच्छसि। परं अहम् अपश्यं त्वं द्वारस्य पृष्ठतः स्थिता आसीः। ततः सः हसन्- 'पश्यतु, सा तु स्वयम् एव आगता' इति अवदत्। तस्मात् अहं बहुः लज्जितः अभवम्"।

"भवान् मातरं पृच्छतु। सा अपि भवतः आह्वानध्वनिम् अशृणोत्"।

तत् श्रुत्वा शङ्करः इतोऽपि खिन्नः जातः। सः अस्याः प्रहेलिकायाः अर्थम् अवगन्तुम् इच्छति स्म। सः प्रकोष्ठात् बहिः आगतः। मातुः समीपं गत्वा तेन पृष्टम्- "मातः, किम् अहं लक्ष्मीम् अधः आहूतवान् आसम्?" इति।

"आम् पुत्र! त्वम् आहूतवान् आसीः"।

६

मातुः कथनेन सः लज्जितः सन् गृहात् बहिः गतः। विपणितः भाटकधनेन शकटम् आरुह्य रामोः ग्रामं प्रति प्रस्थितवान्। मार्गमध्ये तस्य मनसि नैके विचाराः प्रादुर्भवन्। तस्य मस्तिष्कं गुञ्जितं जातम्। सः चिन्तयन् आसीत्- 'धनपेटिकायां विद्यमानान् सर्पान् रामुः अपि दृष्टवान् आसीत्। तथापि सः तां पेटिकां बाहुकक्षेण नीतवान् एव। आरक्षकाः ये बहिः स्थिताः आसन् ते तालबद्धं द्वारम् अतिक्रम्य कथम् अन्तः आगताः? प्रवृत्तां घटनां विचिन्त्य सः इदानीम् इतोऽपि विस्मितः अभवत्। अहं न आकारयं, किन्तु माता लक्ष्मीः च वदतः यत् मया लक्ष्मीः आकारिता। एतत् सर्वं किं प्रचलति? इति पूर्णं मार्गं यावत् एतत् एव चिन्तनं तस्य। किन्तु किमपि न अवगम्यते स्म। अस्मिन् एव ऊहापोहे स्वमनः प्रवर्तयन् सः बडाग्रामे श्वश्र्वाः गृहस्य पुरतः स्थितः अभवत्। द्वारसमीपम् उपगम्य- "रामुभ्रातः!" एवम् आह्वानम् अकरोत्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रामुः तत्समये पेटिकायां विद्यमानानि आभूषणानि मातरं दर्शयन् आसीत्। माता वदति स्म- "मम स्मरणानुसारम् यानि आभूषणानि मया दत्तानि आसन् तानि सर्वाणि आभूषणानि अत्र सन्ति। किञ्चित् अपि न्यूनं नास्ति" इति।

सोहनी अपि पुरतः उपविश्य आभूषणानि पश्यन्ती आसीत्। जगदीशचन्द्रः तत्र कस्मिंश्चित् प्रकोष्ठे उपविश्य किमपि चिन्तनं कुर्वन् आसीत्। यदा सः बहिर्भागतः आगतं ध्वनिम् अशृणोत् तदा ततः उत्थाय बहिः आगच्छत्। खिन्नमनः शङ्करं दृष्ट्वा सः प्रवृत्तं सर्वम् अवगतवान्। रामुः शङ्करगृहात् आगत्य प्रवृत्तं सर्वम् तम् उक्तवान् आसीत्। जगदीशचन्द्रः शङ्करं दृष्ट्वा अपृच्छत्- "भवतः नाम शङ्करः खलु?" इति।

कस्यचित् अपरिचितस्य मुखात् स्वस्य नामश्रवणं तस्मिन् विस्मयम् अजनयत्। जगदीशचन्द्रः- "भवान् पत्न्या सोहन्या सह मेलितुम् आगतः वा?" इति शङ्करस्य मनोभावम् अवगत्य अपृच्छत्।

शङ्करः इतोऽपि विस्मितः जातः। "भवान् कः? अहं तु पूर्वं भवन्तं न अपश्यम्?" इति सः विस्मयेन जगदीशचन्द्रम् अपृच्छत्।

"अस्तु, अहम् ऐदम्प्राथम्येन अत्र आगतः। तथापि भवतः विषये ज्ञातुम् इच्छामि। वदतु तावत्, कम् आह्वयानि? रामुम् उत सोहनीम्?"

शङ्करः जगदीशचन्द्रस्य व्यवहारेण प्रभावितः जातः। सः एतत् स्मर्तुं यत्नं करोति स्म यत् तेन कदा जगदीशचन्द्रः दृष्टः इति। सः तत्रैव स्थितः सन् चिन्तयन् आसीत् यत् एषः सर्वथा अपरिचितः नास्ति। ततः अभिज्ञाने अशक्तः सन्- "भवान् अत्र कदा आरभ्य अस्ति?" इति पुनः तम् अपृच्छत्।

"दिनद्वयात्"।

"भवान् कुत्रत्यः?"

"काश्मीरप्रदेशीयः"।

"अहं पूर्वं भवन्तं कुत्रापि अपश्यम्"।

"भवान् विस्मरन् अस्ति। भवान् इतः पूर्वं कुत्रापि मां न दृष्टवान्"।

"अहं रामुणा मेलितुम् इच्छामि"।

"तर्हि, आगच्छतु! तद् प्रकोष्ठं गच्छतु" इति उक्त्वा स्वेन उष्यमाणं प्रकोष्ठं प्रति अनयत् जगदीशचन्द्रः। तत्र नीत्वा एकस्मिन् कटे उपावेशयत्। ततः- "रामुः अत्रैव आगमिष्यति। यानि आभूषणानि भवता प्रतिदत्तानि तानि मातरम् अग्रजां च दर्शयन् अस्ति"।

"भूषणानि अस्माभिः प्रत्यर्पितानि? कुत्र सन्ति तानि? अहम् अपि द्रष्टुम् इच्छामि"।

"तानि दर्शयित्वा एव तु आनीतवान् रामुः"।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"अस्माभिः तु कानिचित् अपि भूषणानि न प्रत्यर्पितानि"।

"तर्हि भवान् अपि अन्तः गत्वा द्रष्टुम् अर्हति। रामुः वदति स्म यत् भवतः पिता- 'नय, सर्वं नय' इति उक्तवान् आसीत्"।

"शङ्करः अन्तः अगच्छत्। किन्तु क्षणानन्तरम् एव धावनम् आक्रोशं च कुर्वन् ततः प्रत्यागतः। जगदीशचन्द्रः- "भवान् किमर्थम् आक्रोशं कुर्वन् अस्ति? किमर्थं धावनम्?" इति तं निरुध्य अपृच्छत्।

शङ्करः ततः पलायितः अभविष्यत् यदि जगदीशचन्द्र तं न अवरोधयिष्यत्। जगदीशचन्द्रस्य लौहमये बाहुपाशे सः गृहीतः जातः। सः द्वाराभिमुखं पश्यन् भीतः जातः। जगदीशः तं स्वेन उष्यमाणं प्रकोष्ठं प्रति नीत्वा अधः स्थलायाम् उपवेश्य- "किं जातम्? त्वं भूषणानि न अपश्यः?" इति अपृच्छत्।

"भूषणानि तु आसन्। परं भूषणगुच्छानि परितः त्रयः भयङ्कराः फणधराः सर्पाः प्रेङ्खणं कुर्वन्तः आसन्। तत्र अन्यः कोऽपि न आसीत्। एवं भाति यत् रामोः माता तदग्रजा च तान् दृष्ट्वा पलायिते जाते। यां भूषणपेटिकां वयं दत्तवन्तः आस्म, सा पेटिका सर्पपूरिता आसीत्। प्रायः तत्र अधः भूषणानि आसन्, उपरि च सर्पाः आसन्।

जगदीशचन्द्रः तद्वचनं श्रुत्वा उच्चैः अहसत्। सः "आगच्छतु मया सह। दर्शयतु कुत्र सन्ति सर्पाः? अहं सर्पान् वशीकर्तुं जानामि" इति शङ्करम् अवदत्।

शङ्करः अन्तः गन्तुं न इच्छति स्म। किन्तु यदा जगदीशचन्द्रः अवदत् आगच्छतु इति तदा सः विवशीभूय तेन सह प्रस्थितः। तस्य हृदयं तीव्रं स्पन्दते स्म। जगदीशचन्द्रः यदा तस्य बाहुद्वयम् अगृह्णात् तदा तस्य शरीरं निम्बपर्णम् इव कम्पते स्म। अन्तः गत्वा शङ्करः पेटिकायां भूषणानि स्थापयन्त्यौ मातृपुत्र्यौ च अपश्यत्। जगदीशः शङ्करं वीक्ष्य अपृच्छत्- "कुत्र सन्ति सर्पाः? वदतु?" इति।

शङ्करः आश्चर्येण सर्वं पश्यन् आसीत्। तस्य मुखम् उद्घाटितम् एव आसीत्। परं वक्तुम् अशक्तः जातः। विस्फाटिताभ्यां नेत्राभ्यां सः भूषणानि पश्यन् आसीत्। आगतं जगदीशचन्द्रं दृष्ट्वा अन्ये अपि तत्र स्थिताः अभवन्। सोहनी शिरोवस्त्रं किञ्चित् अधः कृतवती।

शङ्करस्य चिन्तनं तु सोहनी अनारोग्यात् उल्लाघं प्राप्य इतोऽपि सुन्दरी प्रतीयते इति प्रचलति स्म। जगदीशचन्द्रः सर्वान् उपवेष्टुम् अकथयत्। सः अपि शङ्करेण सह तत्र उपाविशत्। शङ्करस्य मनसि कश्चन विशेषः प्रवर्तमानः आसीत्। तस्य अर्थः तेन अपि न अवगम्यते स्म। जगदीशचन्द्रः मौनं भञ्जयन्- "शङ्करदास! अत्र तु कोऽपि सर्पः नास्ति?" इति शङ्करम् अपृच्छत्।

"किन्तु, अहं तान् दृष्टवान् आसम्"।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"अहं बोधयामि। भवता कृतानि पापकार्याणि एव सर्पाः भूत्वा भवतः पुरतः आगच्छन्ति। न तु पूर्वं पेटिकायां सर्पाः आसन् न वा इदानीं सन्ति" इति जगदीशचन्द्रः अवदत्।

अस्मिन् क्षणे शङ्करः पितुः वचनम् अस्मरत्। सः तत् एव पुनः अवदत्-"अस्माभिः किमपि पापकर्म न कृतम्। सर्वं लेखनं लेखापुस्तिकायां कृतम् अस्ति। व्ययीकृतायाः एकस्याः वराटिकायाः अपि लेखनं कृतम् अस्ति। भवन्तः आगत्य अस्माकं गणनापुस्तिकां परिशीलयितुं शक्नुवन्ति" इति।

"ताम् अपि द्रक्ष्यामः। भवान् वदति चेत् श्वः तद् द्रष्टुम् आगच्छाव? किन्तु भवतः सर्पदर्शनेन एवं प्रतीयते यत् भवतः मनसि पापम् अस्ति। अतः एव भवतः अन्तरात्मनि विद्यमानं भयं भवन्तं प्रतिबोधयति। भवान् जघन्यं पापम् आचरितवान् इति भाति। तेषां प्रायश्चित्तं करोतु। नोचेत् निश्चयेन सर्पयोनिं प्रवेक्ष्यति"।

एतत् श्रुत्वा शङ्करस्य पूर्णे शरीरे कम्पनम् आरब्धम्। सः श्रुतवान् आसीत् यत् सर्पाः पञ्चशतं वर्षाणि यावत् जीवन्ति। तर्हि किं अहं पञ्चशतं वर्षाणि यावत् बिलेषु एव जीवेयम्। इत्येषः विचारः तस्मिन् भीतिं जनयितुं पर्याप्तम् आसीत्।

तस्य मनसि असकृत् एतत् चिन्तनं प्रवर्तते स्म 'निस्सन्देहम् एते अस्मद्द्वारा वञ्चिताः सन्ति। पिता तद्द्वारा असत्यमयं लेखनं कारितवान्। यत् धनं श्वश्र्वे दत्तं तत् कुसीदेन द्विगुणितं त्रिगुणितं वा कृत्वा अधिकं धनं लेखितम् आसीत्। श्वश्रूम् असकृत् उत्प्रेर्य मङ्गलेन सह कलहः कारितः। तेन किमर्थं पापकर्माणि कृतानि? स्वस्य कर्मणः फलं तु स्वेन एव भोक्तव्यं भवेत्' इति।

इत्थं विचिन्तयन् तस्य शिरोभ्रमणं जातम्। सः अनुक्षणम् उत्थाय ततः धावन् गृहात् निर्गतः। बहिः किञ्चन शकटं स्थितम् आसीत्। तेन सः नगरं प्रति प्रस्थितः।

७

यस्मिन् दिने जगदीशः रामुः च ग्रामम् आगतौ तस्मिन् दिने मोहिनी पुत्र्या मानिन्या सह श्वश्र्वा मेलितुम् आगता आसीत्। यदा जगदीशचन्द्रः रामोः मातरं नन्तुम् अन्तः अगच्छत् तदा मानिनी दाधिकात् नवनीतं निष्कास्य खादन्ती आसीत्। तां दृष्ट्वा जगदीशचन्द्रः शीघ्रम् अवागच्छत् यत् एषा एव भामिनी यस्याः अन्वेषणे सः द्वाभ्यां जन्मभ्याम् अटन् आसीत्। तस्याः चित्रं तु पूर्वम् एव तस्य मनसि चित्रितम् आसीत्। इदानीं मनसि विद्यमानं तत् चित्रं साक्षात् पुरतः तेन प्रत्यक्षीकृतम्। मानिनी अपि आगतं तम् अपश्यत्। सा दाधिकपानं व्यस्मरत्। रामोः मातुः अनुज्ञायाः पश्चात् यदा जगदीशचन्द्रः विद्यमानायां पार्श्वस्थायां खट्वायाम् उपविशत् तदा मानिनी नवनीतं खादित्वा दाधिकमयं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चषकं तत्रैव अत्यजत्। ततः उत्तरीयस्थेन अञ्चलेन मुखं मार्जयित्वा उत्थितवती। तदनन्तरं बहुध्यायेन जगदीशचन्द्रं पश्यन्ती आसीत्।

जगदीशचन्द्रः आत्मनः अभिमुखं पश्यन्तीं मानिनीम् अङ्गुलिनिर्देशेन स्वसमीपम् आहूतवान्। यथा कश्चन लौहः चुम्बकेन आकर्षितः भवति तथा एव मोहिनी जगदीशचन्द्रस्य समीपम् आगत्य स्थिता अभवत्।

"किं नाम तव?" इति जगदीशचन्द्रः तस्याः संकोचं दूरीकुर्वन् अपृच्छत्। मानिनी तु लज्जाम् अनुभवति स्म। सा पादाङ्गुष्ठेन भूमौ रेखां कुर्वती आसीत्। जगदीशः अहसत्। सः- "पश्य, अहं तव नाम जानामि। सर्वे त्वां मानिनी इति नाम्ना सम्बोधयन्ति खलु?" इति अवदत्।

मङ्गलः विस्मितः जातः। सः अचिन्तयत् 'एतस्याः अभिधानम् एतेन कथं ज्ञातम्?" इति। मानिनी तु स्वस्य नाम श्रुत्वा सकृत् मुखम् उपरि कृतवती। तस्याः लज्जां संकोचं च अवगत्य सर्वे अहसन्। परन्तु तस्याः माता मोहिनी चिन्तयन्ती आसीत् 'तस्याः संकोचस्वभावः किमर्थम्? अन्येषां पुरतः तु सा सर्वदा कोलाहलं चटुलतां च प्रदर्शयति' इति।

मानिनी तत्रैव भूमौ उपविष्टवती। एवम् अभासत तस्याः पादौ शिथिलौ जातौ। तदा जगदीशचन्द्रः- "अहं तव द्वितीयं नाम अपि जानामि। प्रायः त्वं जानीयाः अपि। तव नाम भामिनी अपि आसीत्" इति अकथयत्।

मानिन्याः एवम् अभासत यत् सा निद्रया वशीभूता जाता। जगदीशचन्द्रः ततः ध्यानम् अपनीय- "मातः! अहं रामुः च देशभ्रमणार्थं गच्छावः। रामुणा प्राप्यमाणायां शिक्षायाम् एषा एव न्यूनता अस्ति इदानीम्" इति रामोः मातरम् अकथयत्।

"इदानीं पुनः गच्छसि?"

"आम्, मातः!" इति रामुः उत्तरम् यच्छन्- "आवां यदा एतेन नगरमार्गेण गच्छावः स्म तदा भवत्याः स्मरणं जातम्। अहं गुरुवे निवेद्य दिनत्रयं यावत् ग्रामे स्थातुम् तस्य अङ्गीकारं प्राप्तवान्। दिनत्रयस्य पश्चात् आवाम् इतः गमिष्यावः। तदनन्तरं भवत्याः गृहे कश्चन उत्सवः भविष्यति" इति।

"किं भविष्यति? त्वं कामपि वधूम् आनेष्यसि किम्?"

"तथैव आशां करोमि"।

"परन्तु, तावत्कालं किम् अहं जीवेयम्?"

"आम्, मातः! भवती प्रपौत्राणाम् अपि मुखं द्रक्ष्यति" इति जगदीशचन्द्रः उत्तरम् अवदत्।

"त्वदीयं वचनं देवः सत्यं कुर्यात्" इति मातुः मुखात् निःसृतम्।

Funding by IKS-MoE.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्थं रामोः गमनं निश्चितं जातम्। इदानीं जगदीशचन्द्रस्य ध्यानं सोहनीं प्रति अगच्छत्। सा म्लानमुखी सती स्वस्य भविष्यचिन्तायाम् निमग्ना आसीत्। तस्याः मनसि उद्भूतान् विचारान् अवगम्य- "सोहन्याः विवाहः कश्चन प्रमादः आसीत्। एतया शङ्करेण सह अधुना न गन्तव्यम्" इति सः अवदत्।

मङ्गलः गम्भीरेण स्वभावेन- "गुरुदेव, शुनकस्य पुच्छं कथमपि ऋजु भवितुं न अर्हति। एषा एव कथा एतस्याः श्वशुरस्य पत्युः च अस्ति। तौ अत्यन्तं स्वार्थिनौ स्तः" इति अवदत्।

"मङ्गलभ्रातः, यत् अहं कथयामि तत् सुष्ठुरूपेण जानातु। एकस्मिन् वर्षे वर्षद्वये वा सोहनी अस्मात् बन्धनात् मुक्ता भविष्यति। तत्पश्चात् तस्याः सुदिनानि एव भविष्यन्ति"।

एतस्मिन् काले मानिनी तन्द्राकारणतः शयितवती। मोहिनी तु न इच्छति स्म यत् सा दिने निद्रां कुर्यात्। अतः सा ताम् उत्थापयितुं प्रयत्नम् अकरोत्। किन्तु जगदीशचन्द्रः तां तथाकर्तुं न्यवारयत्। सः- "मा उत्थापयतु। सा इदानीं दीर्घं स्वप्नं पश्यन्ती अस्ति। एषा स्वप्नं पश्यतु। दृश्यमानस्य स्वप्नस्य एतस्याः भाविजीवनेन सह दृढः सम्बन्धः अस्ति" इति उक्तवान्।

तत् श्रुत्वा मोहिनी स्तब्धा जाता। सा अपश्यत् यत् मानिन्याः मुखं स्मितं कुर्वत् अस्ति। तस्याः अधराभ्यां मन्दहासः निर्गच्छन् अस्ति। किञ्चित् विशेषं तेजः तस्याः मस्तिष्कं प्रविशत् अस्ति इति।

मानिन्याः अधरयोः विद्यमानं मन्दहासं दृष्ट्वा तत्र उपस्थिताः सर्वे विस्मिताः अभवन्। जगदीशचन्द्रः अवदत्- "मातः, एषा अतीतकालस्य स्वप्नं पश्यन्ती अस्ति। इदानीम् एषा नववर्षीया अस्ति। एतस्मिन् लघुनि वयसि अपि एषा बहु किमपि दृष्टवती अस्ति। किन्तु स्वप्नेषु मानवाः कदाचित् पूर्वजन्मसु प्रवृत्ताः घटनाः अपि पश्यन्ति। एषा प्रायः ताः एव पश्यन्ती स्यात्" इति।

इदानीं सः मङ्गलम्- "एषा बालिका किं पठन्ती अस्ति?" इति अपृच्छत्।

"एतां विद्यालयं प्रति न प्रेषयामि। एषा गृहे एव स्वस्य भ्रातुः दीपस्य सकाशात् हिन्दीम् आंग्लं च पठति"।

"एतयोः भाषयोः पाठनेन किं प्रयोजनम्? हिन्दीसाहित्यस्य तु इदानीं सर्जनम् अपि न जातम्। आंग्ल-साहित्यं तु दूषितं विकृतमनोवृत्तेः प्रतीकम् च अस्ति। मम मतानुसारं तु एतां संस्कृतं पाठयतु। तेन एषा वास्तविकरूपेण देवी इव भविष्यति। तदा सा पत्या अपि पूजिता भविष्यति। समस्तं विश्वम् एतस्याः चरणरजः लब्ध्वा आत्मानं कृतार्थं करिष्यति"।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"किन्तु, गुरुदेव! संस्कृतशिक्षकं कुतः अन्विष्यानि?"

"अन्वेषणेन प्राप्यते एव। यदि भवान् संस्कृतशिक्षणस्य व्यवस्थां कर्तुम् अक्षमः भवेत् तर्हि विश्वभ्रमणात् अनन्तरं प्रत्यागमनकाले मया एव व्यवस्था करणीया भवेत्। मया अपि अभ्यासद्वारा एव संस्कृतशिक्षणं प्राप्तम् अस्ति। अभ्यासकारणात् एषा अपि जानीयात् एव"।

अस्मिन् क्षणे मानिनी मन्दहासं कृतवती। तस्याः निद्राभङ्गः जातः। सा विस्मिता सती सर्वे माम् एव पश्यन्ति इति ज्ञात्वा लज्जाम् अनुभूतवती। सा उत्थाय उपाविशत्।

तन्मध्ये एव रामुः बहिः गत्वा मङ्गलस्य प्रकोष्ठं स्वच्छीकृत्य जगदीशचन्द्रस्य वासाय व्यवस्थां कल्पितवान्।

यदा मोहिनी मानिनीं स्वीकृत्य स्वगृहं प्रति गच्छन्ती आसीत् तदा मार्गमध्ये- "मातः, सः कः पुरुषः आसीत्?" इति मानिनी मातरम् अपृच्छत्।

"तयोः एकः तव पितृव्यः अस्ति। दशभ्यः एकादशभ्यः वा वर्षेभ्यः पूर्वं सः गृहात् निर्गतवान् आसीत्। अद्य प्रत्यागतः अस्ति। अपरः तव पितृव्यस्य गुरुः अस्ति। उभौ पुनः देशाटनं कर्तुं गमिष्यतः"।

"किमर्थं गमिष्यतः?"

"देशाटनेन ज्ञानवृद्धिः भवति। गुरोः जगदीशचन्द्रस्य मतानुसारं देशाटनं विना रामोः शिक्षणम् अपूर्णं भवेत्"।

"मातः, यदा अहं सुप्तवती आसं तदा विचित्रं स्वप्नम् अपश्यम्। उन्नताः उन्नताः पर्वताः सन्ति। तत्र गुरुवर्यः उपविष्टः अस्ति। अहम् अपि तत्र अस्मि। आवां बालौ स्वः। कस्याश्चिद् नद्याः तटे क्रीडावः। एतस्य नाम नटेश्वरः अस्ति। मम भामिनी। ततः एषः मम पाणिग्रहणं कुर्वन् अस्ति। किन्तु तस्मिन् दिने यथा कामिन्याः विवाहः जातः तथा नैव। मम स्वप्ने काचित् वेदिका निर्मिता अस्ति। तन्मध्ये यज्ञः प्रवर्तमानः अस्ति। आवाम् उद्गम्यमानम् अग्निं परितः परिक्रमां कुर्वः। अस्माभिः अनवगम्यमानया भाषया महिलाः गीतं गायन्त्यः सन्ति। सर्वे प्रसन्नाः सन्ति इति भाति"।

"एतत्सर्वं तव भ्रान्तिः" मोहिनी अवदत्- "सः तु त्वत्पितुः अपेक्षया अपि ज्येष्ठः इति भाति। तस्य विवाहः त्वया सह भवितुं न शक्यते" इति।

"किन्तु, मातः! अहं तु स्वप्नविषयं वदन्ती अस्मि। सः लघुः बालः एव आसीत्। आवां समानवयस्कौ इति भाति स्म"।

"अस्तु, त्यज्यताम् एषः विषयः"।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

८

नगरं प्राप्य शङ्करः अपश्यत् यत् तस्य पिता भीतिवशात् अनारोग्यः जातः। तस्य पितुः हृदयं वेगेन स्पन्दमानम् आसीत्। सः स्वस्मिन् कक्षे शयानः आसीत्। वैद्यः परिशीलनार्थम् आगतः आसीत्। वैद्यः तदा- "यावता प्रमाणेन विश्रान्तिः भविष्यति तावत् शीघ्रं स्वस्थः भविष्यति" इति रात्रिकालस्य कृते औषधं यच्छन् उक्तवान्।

यदा शुल्कं स्वीकृत्य वैद्यः गतः तदा शङ्करः- "पितः, किं जातम्?" इति अपृच्छत्।

"मम नेत्रयोः पुरतः सर्पाः एव दृश्यमानाः सन्ति। एवं भाति यत् सर्वे सर्पाः माम् एव दष्टुम् अनुधावन्ति"।

"मदीयं मनः चिन्तयति यत् एतत्सर्वम् अस्माकं पापकर्मणां फलम् एव। अस्माकं पापकर्माणि एव सर्परूपं धृतवन्ति सन्ति। अहं सोहन्याः मातृगृहं गतवान् आसम्। अन्तः प्रविष्टे सति मया आभूषणानि दृष्टानि। तानि परितः त्रयः दीर्घाः सर्पाः अपि दृष्टाः। अहं आक्रोशं कुर्वन् ततः पलायितः। तत्र रामोः गुरुः माम् आश्वास्य स्वं प्रकोष्ठम् अनयत्। रामुः तस्य माता, मोहिनी च भूषणानि अपश्यन्। तदा तत्र सर्पाः न आसन्। रामोः गुरुः अपि कथयति स्म यत् अस्माभिः कृतानि पापकर्माणि एव सर्परूपं धृत्वा आगतानि सन्ति। वयं प्रायश्चित्तं कुर्याम"।

"कीदृशं प्रायश्चित्तम्?"

"सोहन्याः मातुः यत्किमपि अस्ति, तत्सर्वम् अस्माभिः प्रत्यर्पणीयम्" इत्येतत् वचनं शङ्करः स्वगतम् एव उक्तवान्। एतत् तु सः जानाति स्म यत् तस्य श्वश्रुसकाशात् अस्माभिः अनुचितरीत्या धनं स्वीकृतम् अस्ति इति। अतः सः सर्वं धनं प्रत्यर्पयितुम् इच्छति स्म। एतां वार्तां सः स्वस्मात् मुखात् वक्तुं न इच्छति स्म।

शङ्करस्य पिता अवदत्- "किन्तु वत्स, अस्माकं गणनापुस्तिका तु उच्चन्यायालयेन अपि आद्रियमाणा अस्ति। तर्हि सा कथं दोषयुक्ता जाता? तेषाम् अनुसारेण यत् किमपि दातव्यं भवेत् वयं दास्यामः" इति।

"तेषाम् अनुसारेण किं किं दातव्यम् अस्माभिः? तानि भूषणानि अपि तेषाम् एव आसन् खलु?"

"मम एतस्मिन् विषये किमपि स्मरणं नास्ति। किन्तु तैः स्थापितेषु धनेषु किञ्चित् अवशिष्टम् अस्ति एव। अतः एव रामुः पञ्च आभूषणानि याचितुम् आगतः आसीत्। अहं तानि दातुं सज्जः एव आसम्। किन्तु यदा पेटिकायाः आवरणम् उद्घाटितं तदा सर्पाः दृष्टाः। अहं पेटिकाम् एव तस्य पुरतः अस्थापयम्। इदानीं त्वम् वदसि यत् तस्यां भूषणानि आसन्"।

"आम्, पितः! एतत् सत्यम् अस्ति"।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अस्मिन् समये लालनत्थूमलस्य हृत्कम्पनं पुनः आरब्धम्। सः हृदये हस्तं निधाय तूष्णीम् उपाविशत्।

बहूनां दिनानां पश्चात् नत्थूमलस्य आरोग्यम् सम्यक् जातम्। तन्मध्ये शङ्करः अपि पितुः शुश्रूषार्थं गृहे एव आसीत्। वैद्याः तद् गृहं प्रति गमनागमनं कुर्वन्ति स्म। अतः आपणस्य सर्वं वाणिज्यं समाप्तं जातम्।

कालक्रमेण नत्थूमलस्य मनसि विद्यमाना भीतिः न्यूना जायमाना आसीत्। उल्लाघतां प्राप्य सः आपणं प्रति अगच्छत्। पितुः आपणं प्रति आगमनात् पूर्वम् एव शङ्करः आपणस्य कार्यं पश्यति स्म। सः एकदा गणनापुस्तिकाम् उद्घाट्य रामोः गणनां परिशील्य आश्चर्यम् अनुभूतवान्। तत्र तत्सर्वं लिखितम् आसीत् यत् रामोः मातुः सकाशात् प्राप्तम्। किन्तु व्ययस्य विषये कुत्रापि उल्लेखः न आसीत्। सः गणनापुस्तिकायाः पृष्ठानि परिवर्तितवान्। किन्तु तेन किमपि न अवगतम्।

सः एतां सूचनां पित्रे दातुं भीतिम् अनुभवति स्म। तस्य भयम् आसीत् कदाचित् पुनः पितुः हृत्कम्पनं न भवेत्। किन्तु एषा वार्ता बहूनि दिनानि यावत् निगूहिता न जाता। लालनत्थूमलः आपणम् आगच्छत्। शङ्करेण निगूहिते सति अपि रामोः धनस्य गणना नत्थूमलस्य दृष्टिपथम् आगता। यदा सः गणनापृष्ठं रिक्तम् अपश्यत् तदा निर्निमेषं पश्यन् एव आसीत्। खिन्नमनः सः - "रामोः धनस्य गणना कुत्र अस्ति?" इति शङ्करम् अपृच्छत्।

"पितः! अत्र अस्माकं कर्म लिखितम् अस्ति। भगवान् एव जानाति यत् गणनापुस्तिकायां रामोः धनस्य गणना कुत्र गता?" इति।

"किमपि भवतु! भूषणानि तु गतानि। किन्तु रामोः धनस्य गणनाविषये तान् न कथय"।

"पितः, धनम् अधिकृत्य कोऽपि कलहः न भवेत् तदर्थम् अहं तैः सह सम्भाषणं कर्तुम् इच्छामि"।

"किम्?"

"अहं सोहनीं गृहम् आनयामि। यदा सा अस्माकं समीपे वासं करिष्यति तदा तस्याः माता अग्रजः वा कदापि कलहं न कुर्यात्"।

"तर्हि लक्ष्म्याः विषये किं चिन्तितम्? तस्याः मातापितरौ अपि कलहं कुर्यातां खलु"।

"वयं न उपकृताः तैः। यदि इच्छन्ति तर्हि नयन्तु स्वपुत्रीम्। मेनका इव सुन्दरी तु नास्ति सा यां विना मदीयं जीवनं दुष्करं भवेत्?"

"किन्तु, तस्याः पिता धनिकः अस्ति। अस्माकं वाणिज्ये अनिष्टं कर्तुं शक्नोति सः"।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"केनापि दत्तं भोजनं वयं न खादामः। परिश्रमं कृत्वा खादामः। पुनः लक्ष्म्याम् अपरः गुणः कः? तस्याः सोहन्याः च का समानता?"

"तर्हि एवं प्रतीयते यत् त्वम् एव गणनापुस्तिकायाः तत् पृष्ठं पर्यवर्तयः। एतादृशी कृतघ्नता? पित्रा सह?"

"पितः, एवं नास्ति। अहं किमपि पृष्ठं न परिवर्तितवान्"।

लालनत्थूमलः मौनम् आश्रितवान्। सः मनसि निश्चयम् अकरोत् अहं शङ्करात् जागरूकः भवेयम् इति। पिता मयि सन्देहं करोति इति विचिन्त्य शङ्करः शोकाकुलः जातः। सः इतोऽपि कलहं अनुवर्तयितुं न इच्छति स्म। सः पितुः आरोग्यं प्रति सावधानः आसीत्। शङ्करस्य पिता अपि पुत्रस्य मनोवृत्तिम् अवगत्य खेदम् अन्वभवत्। तदारभ्य सः पुत्रे न विश्वसिति स्म। तस्य परिणामः एवं जातः यत् शङ्करः आपणे यदा कदा एव उपविशति स्म। रोकधनं स्वस्य समीपे एव अस्थापयत् नत्थूमलः।

पूर्वम् आवश्यकतानुसारं शङ्करः धनकोषात् धनं निष्कासयति स्म। परन्तु इदानीं धनकोषस्य कुञ्चिका लालनत्थूमलः स्वस्य समीपे स्थापयति स्म। तस्मात् एकस्याः वराटिकायाः कृते अपि शङ्करः पितुः मुखं पश्यति स्म।

धनस्य न्यूनताकारणतः शङ्करं प्रति पत्न्याः लक्ष्म्याः आदरः न्यूनः अभवत्। पूर्वं तु सा मम पितुः अपेक्षया श्वशुरस्य पार्श्वे न्यूनं धनम् अस्ति इति चिन्तयति स्म। किन्तु वर्तमानपरिस्थितौ तु सा श्वशुरं पतिं च महामूर्खं मन्यते स्म। यदा सा अवागच्छत् यत् मम पतिः पितुः पुरतः एकां वराटिकाम् अपि प्राप्तुम् अकिञ्चनः जातः तदा सा इतोऽपि तौ मूर्खौ इव मन्यते स्म।

एकदा रात्रौ लक्ष्मीः- "अहं विपणितः कानिचित् वस्त्राणि क्रीत्वा आनयम्। सः आपणिकः भवन्तं मत्पितरं च सम्यक् जानाति। अतः धनेन विना सर्वं स्वीकृत्य आगतवती। श्वः गत्वा तस्मै धनं दीयताम्" इति पतिं शङ्करम् अवदत्।

"कति रूप्यकैः वस्त्राणि आनीतवती?"

"इदानीं तु केवलेन सार्धद्विशतेन एव आनीतवती। इतोऽपि वस्त्रम् इच्छामि स्म। किन्तु अन्यत् किमपि उत्तमं वस्त्रं तस्य पार्श्वे न आसीत्। तस्य पार्श्वभागे विद्यमानस्य आपणस्य आपणिकः परिचितः एव न आसीत्। पुनः कदाचित् अपरस्मै आपणिकाय धनं दत्त्वा वस्त्राणि आनेष्यामि"।

"परं, सहसा एतावद्भिः वस्त्रैः किं प्रयोजनम्?"

"अग्रजस्य विवाहः अस्ति। मम नूतनानि वस्त्राणि अपेक्षितानि"।

"एतत् तु जानामि। परन्तु एकं परिधानं पर्याप्तं न आसीत्?"

"वाह! दिनत्रयं यावत् विवाहकार्यक्रमः। तर्हि किम् एकम् एव परिधानं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रतिदिनं धारयेयम्? विवाहदिनेषु एकविधस्य एव परिधानस्य धारणेन किं भवतां नासिका छिन्ना न भवेत्?"

शङ्करः जानाति स्म यत् लक्ष्म्या सह सम्भाषणं लाभकरं नास्ति। यद्यपि पितुः पुरस्तात् धनयाचनेन तस्य अवमाननं भवेत् इति जानाति स्म तथापि निरुपायः सन् अन्येद्युः सः पितरम्- "पितः! पञ्चशतं रूप्यकाणि आवश्यकानि" इति अवदत्।

"किं करिष्यसि एतावत्रूप्यकैः?"

"लक्ष्म्याः अग्रजस्य विवाहः अस्ति। तदर्थं परिधानम् आवश्यकम्"।

"तर्हि पञ्चशतस्य का आवश्यकता? शतं रूप्यकाणि एव पर्याप्तानि खलु?"

"सा पञ्चशतात् न्यूनं न स्वीकरिष्यति"।

"तर्हि तां वद, शतरूप्यकात् अधिकं धनं तस्यै न दास्यते"।

शङ्करः मौनम् आश्रितवान्। मध्याह्नकाले यदा नत्थूमलः सुप्त्वा श्रान्तिम् अपनयति स्म तदा शङ्करः तस्य उपधानस्य अन्तः विद्यमानां कुञ्चिकां स्व्यकरोत्। तया सः पितुः धनकोषम् उद्घाटितवान्। तत्र स्थापितेषु रूप्यकेषु पञ्चशतं स्वीकृत्य अचिन्तयत् प्रतिदिनं याचनायाः अपेक्षया इतोऽपि अधिकं धनम् इतः स्वीकरणीयम् इति। एवं विचिन्त्य सः दशरूप्यकाणाम् सहस्ररूप्यकात्मकम् एकं बन्धं स्वीकर्तुम् ऐच्छत्। तन्मध्ये एव तस्य पितुः निद्राभङ्गः जातः। उपधानस्य अन्तः कुञ्चिकाम् अप्राप्य ततः पलाय्य धनप्रकोष्ठम् आगतः। तत्र सः अपश्यत् धनकोषः उद्घाटितः अस्ति। तथा च उद्घाटितात् धनकोषात् शङ्करः स्वस्य करांशुकस्य कोषे सहस्ररूप्यकाणां बन्धं स्थापयन् अस्ति इति। पिता तं तर्जयन्- "एतत् किं कुर्वन् अस्ति"? इति अपृच्छत्।

शङ्करस्य हस्तौ तु कम्पितौ जातौ। रूप्यकाणां सः बन्धः अधः भूमौ पतितः। पिता तम्- "एतत् चौरकर्म केन शिक्षितम्?" इति अपृच्छत्।

"पितः, एतत् आवश्यकम् आसीत्" इति कम्पमानेन स्वरेण अवदत् शङ्करः।

"अरे, पत्निसेवक! गृहं विनष्टुं कृतसङ्कल्पः जातः किम्? दर्शय, कति स्वीकृतानि?" इति।

सहस्ररूप्यकाणां पतितं बन्धम् उत्थाप्य नत्थूमलः अपृच्छत्- "इतोऽपि स्वीकृतं किम्?" इति।

शङ्करः तूष्णीम् अतिष्ठत्। तं तूष्णीं दृष्ट्वा नत्थूमलः- "निर्गच्छ, इतः। शतं रूप्यकाणि ददामि। ततोऽधिकं न। गच्छ इतः" इति तर्जयन् शङ्करम् अवदत्।

शङ्करः प्रकोष्ठात् बहिः गतः। लक्ष्म्यै दातुं यत् पञ्चशतं धनं स्वीकृतवान् आसीत् तत् तु तस्य करांशुकस्य कोषे एव आसीत्। तस्मिन् गते सति नत्थूमलः सर्वं धनम् अगणयत्। धनकोषे काचित् लेखपुस्तिका अपि आसीत् यत्र नत्थूमलेन स्थापितस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धनस्य सर्वं विवरणं लिख्यते स्म। नत्थूमलः धनं गणयित्वा लेखापुस्तिकायां लिखितेन विवरणेन सह तुलनाम् अकरोत्। तदा तेन ज्ञातं यत् पञ्चशतं न्यूनम् अस्ति इति। तस्मात् नत्थूमलः कुपितः जातः। सः धनकोषं पिधाय बहिः आगत्य शङ्करम् आह्वयन्- "अरे चोर! शङ्कर! अत्र आगच्छ, कुत्र असि?" इति अवदत्।

शङ्करः लक्ष्म्यै पञ्चशतं दत्त्वा बहिः गतवान् आसीत्। लालनत्थूमलः तस्य निर्गमनविषयम् अजानन् प्रकोष्ठात् बहिः स्थित्वा आह्वयन् आसीत्।

लक्ष्मीः कपाटस्य पृष्ठतः स्थित्वा- "कः विशेषः लालवर्य? सः गृहे नास्ति इदानीम्" इति अवदत्।

"वञ्चकः सः! पञ्चशतं चोरितं तेन धनकोषात्"।

तच्छ्रुत्वा लक्ष्मीः कुपिता जाता। सा- "कुतः चोरितम्? स्वस्य धनम् एव आसीत्। आवश्यकतायां सत्याम् स्वीकृतं तेन" इति श्वशुरं नत्थूमलम् अवदत्।

"स्वस्य धनम्! यावत् अहं जीवामि, तस्य किमपि नास्ति। एतत् चौर्यम् एव। अहं तं न्यवारयं, तथापि सः किमर्थं धनम् आनयत्"।

"तर्हि किं सः कुटुम्बसदस्यः न? सेवकः अस्ति गृहे?"

"कोऽपि भवतु नाम। मदीयां स्वीकृतिं विना सः धनकोषात् धनं स्वीकर्तुं न शक्नोति"।

"तर्हि स्वीकरोतु एतत्, स्थापयतु स्वसमीपे" इति उक्त्वा कपाटस्य पृष्ठभागात् एव पञ्चशतं नत्थूमलस्य मुखे क्षिप्तवती लक्ष्मीः।

लालवर्यः भाषणं कुर्वन् एव आसीत् तदैव लक्ष्मीः झटिति कपाटस्य द्वारं पिहितवती।

६

जगदीशचन्द्रः रामुः च ग्रामात् प्रस्थानपूर्वं मङ्गलेन मेलितुं गतवन्तौ। तौ यदा गृहसमीपं प्राप्तवन्तौ तदा मानिनी उद्यानात् पुष्पाणि अवचिनोति स्म। जगदीशचन्द्रः तां दृष्ट्वा स्थितः अभवत्। रामुः अपि गुरोः मनोभावान् अवगन्तुं तत्र एव स्थितः अभवत्। तौ माम् एव निर्निमेषं पश्यन्तौ स्तः इति अवगम्य मानिनी लज्जाम् अन्वभवत्। सा इतोऽपि पुष्पाणाम् अवचयनं परित्यज्य चितानि पुष्पाणि स्वीकृत्य गृहस्य पृष्ठभागं प्रति प्रस्थिता। तदा जगदीशः- "मानिनि! दर्शय अत्र! एतत् किं नयन्ती अस्ति?" इति आह्वानं कुर्वन् अपृच्छत्।

अनिच्छन्तौ अपि मानिन्याः पादौ अकस्मात् स्थितौ जातौ, तदभिमुखं जातौ च। वंशकण्डोले पुष्पाणि आसन्। सा कण्डोलं प्रदर्श्य उक्तवती- "पुष्पाणि नयन्ती

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अस्मि" इति।

"पुष्पैः किं करिष्यसि?"

"माता पूजां कर्तुं गच्छति। देवाय अर्पयिष्यति"।

"पूजां कर्तुं कुत्र गमिष्यति सा?"

"गृहे एव देवप्रतिमां स्थापितवती सा"।

"त्वम् अपि पूजां करोषि किम्?"

"आम्"।

"किं याचति देवम्?"

"याचितुं पूजा न क्रियते। पूजा तु देवस्य प्रीत्यर्थं क्रियते"।

"प्रसन्नः भूत्वा देवः किं करोति?"

"यथेच्छम् आचरति सः"।

"तर्हि देवस्य प्रसीदनेन कः लाभः?"

"लाभः तु स्वयम् एव भवति। वयं तु केवलं तं तोषयामः। अस्माकं कार्यं समाप्तम् इव। तदनन्तरं तस्य कर्तव्यम् अस्ति। अस्माभिः पूजितः सन्तुष्टः च सन् स्वेच्छया यत्किमपि फलं ददाति देवः"।

"बहु उत्तमम्! बहु उत्तमम्! मानिनि, एतत् सर्वं केन उक्तम्?"

इत्थं सम्भाषणं कुर्वन्तः ते गृहं प्रविष्टवन्तः। मानिनी ताभ्यां सह गच्छन्ती अवदत्- "एषः अपि शिक्षणविषयः किम्? देवः तु सर्वेषां पिता अस्ति। सः सर्वेषां विषये चिन्तयति एव"।

यदा ते गृहस्य उपवेशनकक्षं प्रविष्टवन्तः तदा मानिनी अन्तः गतवती। अन्तः गत्वा तयोः आगमनस्य सूचनां मात्रे दत्तवती। माता पुत्रं दीपं तयोः स्वागतं कर्तुं प्रेषितवती।

दीपः पितृव्यं गुरुं च यथास्थानम् उपवेशितवान्। तयोः कृते जलपानस्य अपि व्यवस्थाम् अकरोत्। जलपानं कुर्वन् एव जगदीशः दीपेन सह सम्भाषणम् आरब्धवान्। "कस्यां कक्षायां पठसि?" इति दीपम् अपृच्छत् जगदीशः।

"मैट्रिकपरीक्षा दीयमाना अस्ति मया अस्मिन् वर्षे"।

"पुनः किं करिष्यसि?"

"अहम् इंटरमीडिएटकक्षायां विज्ञानं पठितुं लाहौरनगरं गमिष्यामि"।

"एतेन किं प्रयोजनम्?"

"प्रपञ्चस्य ज्ञानं भविष्यति। अहम् अभियन्ता भवितुम् इच्छामि"।

"तर्हि, त्वम् अपि मानवस्य बन्धननिर्माणं कर्तुं इच्छसि?"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दीपः तस्य अभिप्रायं न अवगतवान्। तस्मात् जगदीशः पुरतः अवलम्बमाने पञ्जरे विद्यमानं शुकं प्रति अङ्गुल्या सङ्केतंयन्- "सः कः?" इति दीपम् अपृच्छत्।

"शुकः अस्ति"।

"अत्र पञ्जरं दर्शयितुं शुकः पिहितः उत शुकं प्रदर्शयितुं पञ्जरम् अवलम्बमानम् अस्ति? उभयोः किं प्राधान्यम्?"

"शुकस्य प्राधान्यम्। पिता बहून् शुकान् अफ्रीकातः आनीतवान् आसीत्। तेषु द्वौ एव अवशिष्टौ स्तः।

"यदि तव पिता मरणासन्नं शुकं सुवर्णपञ्जरे अस्थापयिष्यत् तर्हि त्वं किं तात्पर्यम् अज्ञास्यत्?"

"तत् व्यर्थम् इति अज्ञास्यम्"।

"मदीयः अभिप्रायः एवम् अस्ति यत् मानवः आत्मनः चिन्तनम् अकृत्वा केवलस्य शरीरस्य चिन्तां कुर्वन् पञ्जरं तु अलङ्करोति, किन्तु तस्मिन् विद्यमानस्य शुकस्य विषये न चिन्तयति। अथवा एवं वक्तुं शक्यते यत् अभियन्तारः तु प्रपञ्चं सुन्दरं विधातुं प्रयतन्ते। किन्तु तत्र विद्यमानानां मानवानाम् उपेक्षां कुर्वन्ति"।

दीपः एतत् उदाहरणम् अवागच्छत्। किन्तु एतत् श्रुत्वा तस्य मनसि ये विचाराः उदिताः तान् प्रकटयितुम् अपेक्षिता शक्तिः तस्मिन् न आसीत्। तस्मात् सः तस्य मुखम् एव पश्यन् आसीत्।

जगदीशः तु स्वकथनम् अनुवर्तयन्- "दीप! पञ्जरस्य सौन्दर्यीकरणं सुदृढीकरणं तथा अलङ्कारार्थं तस्य कुत्रचित् अवलम्बनम् इति अनुचितं नास्ति। किन्तु तस्मिन् शुकः एव मरणासन्नः चेत् कियत् कुरूपं भवेत् तत्? प्रपञ्चं सुन्दरं कर्तुम् इच्छति चेत् करोतु। किन्तु मानवताम् अविहाय। शरीराय सुखं दातुम् इच्छति चेत् दीयतां, किन्तु आत्महननम् अकृत्वा" इति अकथयत्।

इदानीं तयोः कृते दत्तः आहारः न समाप्तः। तावता एव मङ्गलः आगमनवार्तां ज्ञात्वा झटिति एव कूपात् गृहम् आगतः। सः हस्तौ संयोज्य तयोः स्वागतम् अकरोत्। तयोः पुरतः उपाविशत् च। जगदीशः तम् एव विचारम् अनुवर्तयितुम् इच्छति स्म। अतः सः - "चौधरिवर्य! मम कथनम् अस्ति यत् शुकं विना पञ्जरं यथा व्यर्थं भवति तथैव सजीवम् आत्मानं विना सुन्दरम् अपि शरीरं व्यर्थम्। अतः सुन्दरेऽस्मिन् शरीरे आत्मानं सजीवं स्थापयितुम् उपायाः चिन्तनीयाः" इति मङ्गलम् अवदत्।

"तर्हि किम् आत्मा सजीवः नास्ति? किम् एतम् सजीवं संरक्षितुं प्रयत्नः कर्तव्यः?" इति मङ्गलेन पृष्टम्।

"आत्मा तु सजीवः एव तिष्ठति। चैतन्ययुक्तः अपि। परन्तु तादृशाः सन्ति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अनेके विचाराः यैः आत्मा मूर्च्छितः क्रियते, तस्य हननं वा क्रियते। भारतं नाम कश्चन महान् देशः। एतस्य संस्कृतिः अत्रत्यानां भारतीयानां पितृसम्पत्तिः इव अस्ति"।

"किन्तु, गुरुदेव! का नाम संस्कृतिः?"

"शरीरे विद्यमानः आत्मा इव संस्कृतिः भवति। यथा शरीरस्य सञ्चालनम् आत्मनः कृते भवति तथैव जातीयं कर्म जातीयसंस्कृतिनिमित्तं भवति। जातीयजनानां कृते एतदर्थं भोजनं वस्त्रम् अन्यविधानि आनुकूल्यानि च दीयन्ते येन ते जीविताः भवेयुः। यतः जीविते शरीरे आत्मनः अर्थात् संस्कृतेः रक्षणं कर्तुं शक्यं भवति। संस्कृतिः तु जनानाम् आचारः व्यवहारः, तथा एतस्य आचारस्य व्यवहारस्य पृष्ठतः या प्रेरणादायिका विचारधारा भवति सा संस्कृतिः कथ्यते..............

"पश्यतु, दीपस्य माता पूजां कर्तुम् अगच्छत्। मानिनी पुष्पाणि अवचित्य आनीतवती। एतत् सर्वं किमर्थम्? अहं मानिनीम् अपृच्छं- 'देवं किं याचिष्यसि?' इति। सा अवदत्- 'याचनार्थं पूजा नैव क्रियते' इति। एषः विचारः तथा एतस्य विचारस्य प्रकटनाय प्रेरणादायिकाः भावनाः एव अस्माकं भारतीयतायाः प्राणाः सन्ति। भगवद्गीतायाम् एषा एव भावना निष्कामकर्मभावना कथ्यते। एषा भारतीया संस्कृतिः। एतया विना बाह्यप्रपञ्चस्य कल्पना शुकेन विना पञ्जरस्य निर्माणम् इव भवेत्। तस्मात् केवलस्य बाह्यप्रपञ्चस्य कल्पना इत्युक्ते मानवबन्धनम् एव नान्यत् किमपि"।

मङ्गलः जगदीशचन्द्रेण उक्तं वचनम् अवगन्तुं प्रयत्नं कुर्वन् आसीत्। दीपः तु गम्भीरे विचारे आत्मानं प्रवर्तयन् स्वप्नलोके विचरणं करोति स्म। सः सङ्कल्पम् अकरोत् 'अहं अभियन्तृपदं प्राप्य कदापि धर्मं न त्यक्ष्यामि। एतत् अपि कदापि न संभवेत् यत् आत्मतत्त्वं विस्मृत्य अहं केवलं शरीरम् एव पोषयेयम्' इति।

जगदीशः रामुः च अल्पाहारं समापितवन्तौ। तदा रामुः सम्भाषयितुम् इच्छन्- "भ्रातः, अहं गुरुदेवेन सह अटनार्थं गच्छन् अस्मि। अतः आशीर्वचोभिः अनुगृह्णातु माम्" इति मङ्गलम् अकथयत्।

"किन्तु, अटनार्थं व्ययः कुतः क्रियते? तव पार्श्वे सुवर्णखनिः तु नास्ति?"

"इदं मायामयं जगत्, भ्रातः! भवान् यत् यत् पश्यति तत्सर्वं मायानाम्ना व्यवह्रियते। धनम् अपि तथैव। अर्थात् अस्मिन् जगति किमपि शाश्वतं नास्ति। सर्वं भ्रान्तिमूलम् एव। तथैव वयं 'न' इत्यस्मात् सर्वं प्रकटयितुं शक्नुमः" इति जगदीशचन्द्रः मङ्गलम् अकथयत्।

"महाराज! निरक्षरः स्थूलमतिः च अहं भवता प्रतिपादितं विषयं न अवगतवान्। कथं भवान् शून्यात् सर्वं प्रकटयितुं शक्नोति?"

"पश्यतु, अहं बोधयामि। आवां लाहौरनगरं गन्तुम् इच्छावः। तत्र गमनाय तथा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

च तत्र वासादिव्यवस्थायै सहस्रं रूप्यकाणि आवश्यकानि आवयोः कृते। धनं तु मायायाः किञ्चन प्रतिरूपम् इव। अर्थात् कल्पनारूपम् तत्। तस्मात् यः अन्येषां कल्पनाः प्रोत्साहयितुं शक्नोति सः धनम् अपि प्राप्तुं शक्नोति। ईदृशीं शक्तिं काञ्चित् सीमां यावत् अहम् अवाप्नुवम्। रामुः अपि मम अपेक्षया किञ्चित् न्यूनं, तां शक्तिं प्राप्तवान् अस्ति। अतः आवयोः कृते धनस्य चिन्ता न भवति"।

मङ्गलः इदानीम् अपि जगदीशचन्द्रेण उक्तं वचनं न अवगतवान्। कथं सर्वं शून्यात् उत्पद्यते इति चिन्तयन् सः जगदीशचन्द्रस्य मुखम् एव पश्यन् आसीत्। निर्निमेषदृष्ट्या पश्यन्तं भ्रातरं मङ्गलं रामुः- "भ्रातः, पश्यतु अहं बोधयामि। एतत् पश्यतु, किम् अस्ति?" इति अपृच्छत्।

"दीपस्य अङ्कनी" इति मङ्गलः प्रत्युत्तरम् अदात्।

"तदभिमुखं भूत्वा पश्यन् एव भवतु"।

इति उक्त्वा रामुः अङ्कन्याः एकेन शिरोभागेन भूमौ न्यखनत्। तत्पश्चात् ताम् उपरि अकरोत्। यथा यथा अङ्कनी उपर्युपरि गच्छति स्म तथा तथा 'खन-खन' ध्वनिं कुर्वन्ति नाणकानि भूमौ पतन्ति स्म। निमेषाभ्यन्तरे एव नाणकानां राशिः निर्मितः जातः।

मङ्गलः विस्मिताभ्यां नेत्राभ्यां तं धनराशिं पश्यन् एव आसीत्। तदा रामुः अवदत्- "भ्रातः, एतानि गणयतु" इति।

मङ्गलः सर्वेषां गणनाम् अकरोत्। सहस्राधिकं रूप्यकाणि आसन्। सः गुरुदेवम् अपृच्छत्- "तर्हि किम् एतानि रूप्यकाणि शून्यात् प्रकटितानि, गुरुदेव?" इति।

"नैव! प्रकटितानि न किमपि। एतेषाम् अस्तित्वं पूर्वतः एव विद्यमानम् आसीत्। आवाभ्यां योगबलेन एतत् धनम् एकत्रीकृतम्। परन्तु एकाकिना मया एतावत् कष्टम् अपि न सह्यते। मदीयः कश्चन अपरः अपि उपायः अस्ति। अहं तु वदामि यत् यं जनं धनं याचिष्यामि सः निश्चयेन दद्यात्....

"चिन्तयतु, अहं भवन्तम् एवं वदामि- 'मङ्गलभ्रातः, पञ्चशतं रूप्यकाणि ददातु इति, तर्हि भवान् निश्चयेन दद्यात्। एषः अपि योगबलस्य परिणामः एव यत्किमपि कस्माच्चित् अपि जनात् स्वीकर्तुं शक्यते। अपि च अन्येषां द्वारा किमपि साधयितुं शक्यते"।

"एषा तु सन्तोषप्रदा वार्ता अस्ति"।

"आम्, किन्तु एतां शक्तिम् प्राप्तुं महती तपस्या आचरणीया भवति। यदि एतस्याः शक्तेः दुरुपयोगः क्रियते तर्हि स्वयम् एव सा शक्तिः मन्दं क्षीणतां प्रति गच्छति"।

"किन्तु, यत् किञ्चित् वार्ता कश्चन उपयुक्तं वदेत् अपरः तत् निरुपयोगि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपि वदेत् च। पुनः सा शक्तिः कदा कथं च क्षीणतां प्रति गच्छति?”

“कस्यचित् अपि कार्यस्य उत्तमतायै निकृष्टतायै च स्वस्मिन् अन्तरात्मनि विद्यमानाः भावनाः एव निर्णयं कुर्वन्ति। कस्यचित् योगिनः बुद्धिः एवमेव विकसिता भवति।

योगिनः अन्तरात्मनः निर्णयाः प्रायः सम्यक् एव भवन्ति। योगेश्वरः श्रीकृष्णः नैकानि कार्याणि स्वस्य आत्मनः प्रेरणया कृतवान्, यानि अस्माभिः चिन्तयितुम् अपि न शक्यन्ते। किन्तु परिणामं दृष्टवद्भिः अस्माभिः पश्चात् सत्यतायाः परिचयः प्राप्यते। कस्यचित् योगिनः आत्मा एव एतादृशं निर्णयं कर्तुं समर्थः। तथापि योगिनां आत्मपतनस्य सम्भावना अपि भवति। शक्तिशालिनः आसन्दस्य यदि ग्रहणं क्रियते तर्हि अहङ्कारः मोहः च इति उभौ अपि बुद्धिम् आच्छादयतः। एतादृशी एव अवस्था रावणस्य आसीत्”।

गमनाय समये उपस्थिते जगदीशचन्द्रः मङ्गलम्- “मदीयः आशयः एवम् अस्ति यत् मानिनीं संस्कृतं पाठयितुं भवद्भिः सर्वैः प्रयत्नः करणीयः। मम प्रत्यागमनात् पूर्वं तस्याः विवाहस्य निर्णयः न करणीयः” इति अवदत्।

“किमर्थम्?”

“अत्र किञ्चन रहस्यम् अस्ति। एतं रहस्यं मानिनी स्वयमेव भवतः सर्वान् वदिष्यति। यावत् तत् रहस्यं प्रकटयितुं तस्याम् अपेक्षिता शक्तिः न भविष्यति तावत् प्रतीक्षा करणीया। विवाहः अपि स्थगितः भवेत्”।

मङ्गलः जगदीशचन्द्रेण उक्तं रहस्यमयं वचनं न अवागच्छत्। तस्य मुखे विद्यमानं विस्मितभावम् अदृष्ट्वा जगदीशचन्द्रः रामुः च ततः उत्थितवन्तौ। गमनात् पूर्वं रामुः मङ्गलम्- “भ्रातः! एतस्य धनराशेः उपयोगः धार्मिककार्येषु क्रियताम्। एतस्मात् एका वराटिका अपि स्वकार्यनिमित्तं न उपयुज्यताम्”।

१०

शङ्करः इतोऽपि पितरि विश्वासं कर्तुम् असमर्थः सन् कदाचित् सोहन्या मेलनं कर्तुम् आगतवान्। ऐदम्प्राथम्येन सः पूर्वं तदा आगतः आसीत् यदा तस्य हस्तात् धनपेटिकायाः कुञ्चिका बलात् स्वीकृता आसीत् तत्पित्रा। सः यदा गृहम् आगत्य स्वस्य आगमनस्य सूचनां सोहन्याः समीपं प्रैषयत् तदा सूचनां प्राप्य सोहनी भ्रुवौ वक्रीकृत्य गृहस्य अङ्गणे खट्वां प्रसार्य उपविष्टवती। शङ्करम् उपवेशयितुं किञ्चन आसन्दं स्थापयितुं कमपि उक्तवती सा।

सा उत्थाय शङ्करस्य सत्कारं न अकरोत्। केवलम् एतत् एव सा “उपविशतु” इति अवदत्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्मिन् उपविष्टे सति- "कथम् आगमनम्? इति तया पृष्टम्।

"सोहनि! अनुचितं व्यवहारं कृतवता मया लज्जा अनुभूयते"।

"अस्तु! भवान् पुनः एवम् न आचरेत्"।

"तर्हि त्वं तद्गृहं आगमिष्यसि किम्?"

"नैव! आवयोः सम्बन्धः नाम कश्चन महान् दोषः आसीत्। सः दोषः इदानीं नष्टप्रायः एव। पुनरपि सः दोषः न अनुवर्तनीयः"।

"तर्हि त्वं मम परित्यागम् अकरोः किम्?

"अहम् एतस्य अर्थं न जानामि। परित्यागस्य आवश्यकता अस्मत्सदृशीनां हिन्दुमहिलानां कृते न भवति। कश्चन निर्धनः धनाभावात् नूतनवस्त्रक्रयणाभावात् च पुरातनं वस्त्रम् एव सीवित्वा धरति। 'वस्त्रं मलिनं पुरातनं च जातम्' इति विचिन्त्य मलिनं वस्त्रं वयं क्षिपामः खलु"।

"तर्हि किं, त्वं मां मलिनं वस्त्रम् इव अक्षिपः? इदानीं नूतनवस्त्रस्य अन्वेषणरता असि?

"मम वचनस्य अवगमनशक्तिः भवति नास्ति। अहं कमपि नूतनं भर्तारं न अन्विष्यामि। अहं तु एतावत् एव वक्तुम् इच्छामि यत् भवतः सम्पर्ककारणतः मदीयं शरीरं दूषितं जातम् आसीत्। एतत् क्षेप्तव्यम्। एतत् कार्यं तु अहं पूर्वमेव अकरिष्यं यदि रामोः गुरुः मह्यं किञ्चन मन्त्रम् उपदिष्टवान् अभविष्यत्। तस्य मन्त्रस्य जपनेन आगामिशरीरम् उत्तमं लभेय इति रामोः गुरोः अभिप्रायः अस्ति"।

"भगवान् एव जानीयात् यत् आगामिशरीरं कीदृशं भवेत्। इदानीन्तनं त्वदीयं शरीरं तु पूर्वस्य अपेक्षया अपि सुन्दरं भाति"।

"एतत् तु अहं पश्यामि। अन्यथा भवान् अत्र किमर्थम् आगच्छेत्? भवतः मम च शरीरेण सह एव सम्बन्धः आसीत्। सः सम्बन्धः शरीरस्य आरोग्यम् अनारोग्यम् आधारीकृत्य भवति स्म। आरोग्ये सति मानः, अनारोग्ये सति अवमाननम्। अतः एषः अवमानकरः सम्बन्धः इति अहं मन्ये"।

विवशः शङ्करः इष्टसिद्धिं विनैव गृहं प्रत्यागतः। आपणे पितुः दूषितमनोवृत्तेः कारणतः तथा च गृहे लक्ष्म्या तिरस्कृतः सन् सः पुनः एकस्मिन् दिने सोहन्या मेलितुं ग्रामम् आगतः। एतत् मेलनं तस्मिन् दिने जातं, यस्मिन् दिने सः धनपेटिकातः पञ्चशतं निष्कासितवान् आसीत्। तत् धनं लक्ष्म्यै प्रदाय सोहन्या मेलनं कर्तुं गच्छन् आसीत्। मध्येमार्गं सः एतत् एव चिन्तयन् आसीत् 'मया स्वीकृतं पञ्चशतं कथञ्चित् अपि पित्रा ज्ञायेत एव। पिता वाक्कलहं कुर्यात्। लक्ष्मीः एतेन कलहेन इतोऽपि कुपिता भवेत्। उभयोः वाक्कलहेन मम एव कष्टं भवेत्' इति। उभयोः वाक्प्रहारैः आत्मानं रक्षितुम् एव सः ग्रामं प्राप्तः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सोहनी तस्य कान्तिहीनं मुखम् अवलोक्य स्मितं कुर्वती- "किं जातम्? अद्य पित्रा सह कलहः जातः वा?" इति अपृच्छत्।

"आम्"।

"किमर्थम्?"

"अहम् एव तव मातुः आभूषणानि दापितवान् इति पिता मयि सन्देहं करोति"।

"तर्हि किं भवान् न दापितवान्?"

"प्रवृत्तस्य तस्य दिनस्य विषये किमपि न जानामि। आभूषणानां सर्परूपेण परिवर्तनं, पुनः आरक्षकाणां गमनागमनं चित्रमन्दिरे कस्यचित् चलनचित्रस्य प्रदर्शनम् इव विस्मयकारि आसीत्"।

"गुरुवर्यः यत् उक्तवान् तत् अपि भवता न ज्ञातम्?"

"तस्मात् ऋते अन्यत् किमपि कारणं मम न भाति। मया आचरितां कर्मणां प्रायश्चित्तम् अनुभोक्तुमेव तु पौनः पुन्येन तव पार्श्वे आगम्यते"।

"एतत् तु विचित्रं प्रायश्चित्तम् अस्ति येन कस्याश्चित् कुरूपिण्याः पत्न्याः स्थाने सुन्दरीं पत्नीं प्राप्तुं भवान् अभिलषति। प्रायश्चित्तकाले तु त्यागः तपस्या तितिक्षा च करणीयाः, न तु आनन्दं भोगविलासं वा प्राप्तुं प्रयत्नः कर्तव्यः"।

"तर्हि, अहं किं करवाणि?"

"अहं किं वदेयम्! भवान् भवत्पिता च एव वक्तारौ आस्ताम्। येन मार्गेण गन्तुं भवद्भ्याम् उक्तं तेनैव मार्गेण वयम् अगच्छाम। तस्मात् परिणामः एषः जातः यत् मदीया माता या स्वस्मिन् गृहे तिष्ठन्ती शासनं करोति स्म सा आदशभ्यः वर्षेभ्यः जामातृगृहे पात्राणि क्षालितवती"।

"यदि त्वं मया सह प्रस्थाय वासार्थम् अनुमतिं दद्याः तर्हि अहं पित्रा सह चर्चां कृत्वा मदीयं वाणिज्यम् अपि पृथक् कुर्यां, सुखेन आवां जीवितुं प्रयत्नं कुर्याव"।

"मम गृहगमने भवतः पित्रा सह चर्चाकरणे च कः सम्बन्धः? मम भवतः च विषये सम्यक् असम्यक् वा विचिन्त्य एव मया निर्णयः कर्तुं शक्यः। भवान् तु पितुः व्यवहारं परिशील्य एव तेन सह चर्चां करिष्यति। अहम् एतयोः द्वयोः परस्परं किमपि सम्बन्धं न भावयामि"।

"तर्हि स्वस्य मम च शुभाशुभं विचिन्त्य एव मया सह चल"।

"भवता सह वासकरणे मम कल्याणं नास्ति"।

"त्वं मम पत्नी। मया सह जीवनम् एव श्रेयसे भवेत्"।

"अस्तु! यदा भवान् द्वितीयवारं विवाहम् अकरोत् तदा एषः निर्णयः जातः एव

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्यात् खलु 'प्रथमपत्नी न आवश्यकी' इति। भवतः परतया एव आवयोः विवाहबन्धनं नष्टं जातम्। इदानीं किम् अपरया पत्न्या सह जातं विवाहबन्धनम् अपि नष्टं कर्तुम् इच्छति भवान्?"

"प्रायः सा एव एतत् नष्टुम् इच्छति"।

"तर्हि नश्यतु नाम। पश्चात् अहं मम विषये विचारं करिष्यामि"।

एतेन प्रत्युत्तरेण सन्तुष्टः सः नगरं प्रत्यागतः। गृहम् आगत्य तेन अवगतं लक्ष्मीः पञ्चशतं रूप्यकाणि तस्य पितुः मुखे क्षिप्तवती आसीत्। पिता धनं स्थापयितुं यदा गतः तदा सा मातृगृहं गतवती। पिता अपि आपणं गतवान् आसीत् इति। शङ्करः यदा आपणं गतः तदा "त्वं कुत्र गतवान् आसीः?" इति अपृच्छत् तस्य पिता लालनत्थूमलः।

"ग्रामं गतः आसम् .... सोहन्या मेलितुम्"।

"उभाभ्यां सह सम्बन्धं स्थापयितुम् इच्छसि? एकस्यै धनं ददासि, अपरस्यां प्रीतिं दर्शयसि?"

"भवान् एतावत्कालं स्वस्य सम्मोहिन्या शक्त्या मां मूर्खं कृतवान् आसीत्। भवतः कथनानुसारम् अहं सोहनीं तन्मातरं च मङ्गलस्य विरुद्धम् आचरितुं प्रेरितवान्। तस्य बहुधा अनिष्टं कर्तुं प्रयत्तवान्। भवान् एव सुन्दरीं पत्नीं परित्यज्य कयाचित् कुरूपिण्या सह विवाहं कर्तुं मां विवशम् अकरोत्। भवतः एषः प्रभावः अधिककालं यावत् न अतिष्ठत्। अहं मदीयं दोषम् अवगतवान् अस्मि। अहम् इच्छामि यत् भवान् मां भवत्सकशात् पृथक् करोतु"।

"तर्हि कः अवरुणद्धि त्वाम्? गच्छ, पृथक् आपणं कुरु"।

"मह्यं मदीयम् अंशं ददातु भवान्"।

"आवां किम् अंशग्राहिणौ वा? मया परिश्रमेण एतत् सर्वं धनम् अर्जितम् अस्ति। अहम् एतस्य स्वामी। अहं किमपि तुभ्यं न दास्यामि। निर्गच्छ आपणात्"।

तथापि शङ्करः स्वस्मात् स्थानात् विचलितः न जातः। सः पितुः मुखम् एव पश्यन् आसीत्। अनिश्चितमानसं पुत्रं वीक्ष्य लालनत्थूमलः पुनः अवदत्- "यदा आरभ्य त्वम् आपणे कार्यं कर्तुम् आरब्धवान् तदा आरभ्य एव तुभ्यं भोजनं वस्त्रं च यच्छन् अस्मि। त्वं मम गृहे चौर्यम् अकरोः। अहं त्वां गृहात् अपि निष्कासयामि" इति।

शङ्करः इदानीम् अपि विस्मयेन पित्रा उक्तं वचनम् अवगन्तुं प्रयतते स्म। पिता तदेव वचनम् अनुवर्तयन्- "इदानीं गच्छ, गच्छ इतः" इति अवदत् शङ्करम्।

विवशः शङ्करः उदतिष्ठत्। पादत्राणं धृत्वा सः ततः निर्गतः। सः आपणतः साक्षात् गृहम् अगच्छत्। तत्र स्वं प्रकोष्ठं गत्वा शयितवान्। शयनं कुर्वन् एव सः स्वस्य भाविजीवनस्य विषये चिन्तनं करोति स्म। तस्य पार्श्वे पत्न्याः आभूषणानि आसन्। तानि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आभूषणानि विक्रीय अन्यत्र गत्वा उद्योगः करणीयः इति विचारः तस्य मनसि अस्फुरत्। सः आपणे केवलं गणकत्वेन कार्यं करोति स्म। चत्वारिंशत् रूप्यकाणि मासिकवेतनं केवलम् आसीत्। एतावता एव कथं तस्य निर्वहणं भवेत्? चत्वारिंशत् रूप्यकाणि तु लक्ष्मीः फेनकं तैलम् इत्यादीनां निमित्तम् एव व्ययीकरोति स्म। आभूषणानां विक्रयणस्य पश्चात् लघुम् आपणं कर्तुं योजनां कुर्वन् आसीत् सः। परन्तु आभूषणानि कियन्ति सन्ति तथा च तेषां विक्रयणेन कियत् धनं प्राप्येत? एतत् विचिन्त्य सः कम्पितः जातः। आभूषणानि विंशतितोलकपरिमितानि प्रायः आसन्। तेषां मूल्यं प्रायः षट्शतम् आसीत्। तथापि 'कियन्ति आभूषणानि सन्ति इति मया पूर्वं द्रष्टव्यम्' इति विचारः तस्य मनसि जातः।

एवं विचिन्त्य सः शय्यातः उदतिष्ठत्। सः पत्न्याः पेटिकाम् उद्घाटयितुं कुञ्चिकाम् अन्वेष्टुम् इतस्ततः दृष्टिं प्रसारितवान्। कुञ्चिका पेटिकायाः अर्गले एव योजिता आसीत्। यदा पेटिकाम् उद्घाटितवान् तदा तत्र किमपि न आसीत्। कक्षे एकम् अपि आभूषणं बहुमूल्यं वस्त्रं वा तत्र न आसीत्। लक्ष्मीः सर्वं स्वीकृत्य गतवती आसीत्। यावत्यः पेटिकाः तत्र आसन् सर्वाः परिशीलितवान् सः। एका अपि वराटिका तत्र न लब्धा तेन। यानि नूतनानि वस्त्राणि लक्ष्म्या धनम् अदत्त्वा क्रीतानि आसन् तानि अपि तया नीतानि।

एतेन शङ्करः निराशः जातः। तेन दृष्टाः सर्वेऽपि स्वप्नाः सिकताभित्तयः इव नष्टाः जाताः। सः हताशः सन् शय्यायां पुनः उपाविशत्।

दिनम् अतीतम्। रात्रिकालः उपस्थितः। भोजनसमये माता शङ्करं खादितुम् आह्वयत्। सः बुभुक्षितः तु आसीत् एव। सः उत्थाय भोजनप्रकोष्ठम् अगच्छत्। भोजनं कुर्वन् सः- "मातः, पिता भोजनम् अकरोत् वा?" इति मातरम् अपृच्छत्।

"आम्। सः निद्रातुं गतः"।

"लक्ष्मीः त्वां किमपि उक्त्वा गतवती वा?"

"आम्। एतद् गृहं पुनः न आगमिष्यामि इत्युक्त्वा सा गतवती"।

"किमर्थम्?"

"सा वदति स्म यत् वयं वञ्चकाः स्मः इति"।

एतत् श्रुत्वा शङ्करः कुपितः अभवत्। किन्तु तं कोपम् अन्तः एव निगृह्य भोजनं समापितवान् सः। तदा माता- "एषः कलहः किमर्थं वत्स?" इति तम् अपृच्छत्।

"मातः, अस्माभिः बहु पापकर्म कृतम्। तेषाम् एव परिणामः एषः। पिता माम् आपणात् बहिष्कृतवान् अस्ति।

मम पार्श्वे एका अपि वराटिका नास्ति येन अहं स्वतन्त्रतया वाणिज्यं कर्तुं शक्नुयाम्। इतः लक्ष्मीः सर्वम् आभूषणं वस्त्रं च नीतवती"।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"मम वचनं पालय वत्स! कानिचित् दिनानि इतः निर्गत्य अन्यत्र वासं कुरु। यदा त्वां प्रति पितरि मोहः अधिकः भविष्यति तदा अहं त्वाम् आह्वास्यामि"।

"कुत्र गच्छानि? कोषे तु किञ्चित् अपि धनं नास्ति"।

"अहं श्वः प्रातः तुभ्यं पञ्चाशत् रूप्यकाणि दास्यामि। कानिचित् दिनानि यावत् कमपि अनुक्त्वा हरिद्वारं गच्छ। यदा तव पितुः कोपः शान्तः भविष्यति तदा त्वाम् अत्र आह्वास्यामि"।

शङ्करः तूष्णीम् अभवत्। तस्मै एषः उपायः तु अरोचत। किन्तु एषः उपायः कदा सफलः भविष्यति इत्यस्य ऊहां कर्तुं न अशक्नोत् सः। हस्तौ प्रक्षाल्य मुखचुलुकं कृत्वा प्रकोष्ठं प्रविश्य शयितवान् सः।

प्रातः माता आगत्य शङ्कराय पञ्चाशत् रूप्यकाणि यच्छन्ती- "यदि तव पितुः कोपोपशमने विलम्बः भवेत् तर्हि प्रतिमासं तुभ्यम् एतावत् धनं प्रेषयिष्यामि। परन्तु बहुः विलम्बः न भविष्यति इति आशां करोमि" इति अवदत्।

११

शङ्करः तावत्पर्यन्तं प्रकोष्ठे आत्मानं गोपितवान् यावत् तस्य पिता प्रातःकालिकम् अल्पाहारं स्वीकृत्य आपणं न अगच्छत्। तत्पश्चात् सः शय्यां यानस्यूतं च स्वीकृत्य शाकटिकाय भाटकं दत्त्वा शकटेन रेलस्थानकं प्रति गन्तुं प्रस्थितः।

सः गृहात् निर्गत्य किञ्चित् दूरं गतवान् आसीत् तावता एव अकस्मात् तस्य श्यालः मनसारामः हस्तेन सङ्केतं कुर्वन् शकटम् अवरुद्धवान्। शकटे स्थिते सति सः शङ्करम्- "अरे, भवान् कुत्र गच्छति?" इति अपृच्छत्।

"नरकधाम"।

"अहं भवन्तं नेतुम् आगतः अस्मि"।

"कुत्र?"

"स्वर्गधाम प्रति। आगच्छतु, लक्ष्मीः आह्वानसन्देशं प्रेषितवती अस्ति। 'भवतः कृते वाणिज्यं कर्तुम् अपि अहं व्यवस्थाम् कृतवती अस्मि' इति तस्याः सन्देशः अस्ति"।

एतां वार्तां श्रुत्वा शङ्करः तस्य मुखं पश्यन् एव आसीत्। यस्य कृते सः लालायितः आसीत् तत् कार्यं लक्ष्म्या पूरयिष्यते इति ज्ञात्वा सः नितरां विस्मितः जातः। भाग्यस्य गतिः अतीव विचित्रा खलु! सः मनसारामं शकटे उपावेशयत्। शकटं श्वशुरगृहं प्रति प्रस्थितम्।

लक्ष्मीः पितुः लालचूहडमलस्य पुरतः उपविष्टा आसीत्। शङ्करः तत्र आगतः। तस्य शय्यावस्त्रं यानस्यूतः च शकटे एव आसताम्। आगतं तं वीक्ष्य तस्य श्वशुरः-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"आगच्छ, वत्स! अत्र आगच्छ। अहं सर्वं विषयं लक्ष्मीद्वारा अश्रृण्वम् अवागच्छं च। जामातृपुत्रयोः कः भेदः? अहं तव कार्यस्य प्रबन्धनम् अकरवम्। मनसारामेण सह तव पञ्चाशत् प्रतिशतं वाणिज्ये अंशभागिता भविष्यति। इदानीं नूतने महाहट्टे युवां कार्यं कुरुतम्। यावत् धनम् इच्छसि तावत् लप्स्यसे" इति अवदत्।

"तस्मिन् महाहट्टे तु पितुः अपि आपणः अस्ति खलु?"

"तर्हि किम् अभवत्। त्वया तेन सह कलहः तु करणीयः नास्ति, न वा तस्मात् धनं स्वीकरणीयम्"।

"तथापि तेन सह प्रतिस्पर्धा तु भविष्यति एव"।

"त्वं प्रतिस्पर्धां मा कुरु। यदि सः करिष्यति तर्हि सः एव तस्याः फलं प्राप्स्यति"।

यद्यपि शङ्कराय एतत् न अरोचत, तथापि श्वशुरस्य सहानुभूतेः पितुः क्रौर्यस्वभावेन सह साम्यं कर्तुं सः विवशः जातः। ततः सः स्वस्याः जीवनरूपिनौकायाः नौदण्डं श्वशुराय प्रादात्।

तद्दिनात् एव सः तत्र गृहजामातृरूपेण वासम् आरब्धवान्। लालचूहडमलस्य गृहम् अतीव विशालम् आसीत्। तस्य कुटुम्बम् अपि विशालम् आसीत्। गृहस्य एकस्मिन् भागे प्रकोष्ठद्वयं लक्ष्मीशङ्करयोः कृते रिक्तं कारितं लालचूहडमलेन।

अन्येद्युः महाहट्टे मनसारामशङ्करदासयोः नाम्ना परार्थविक्रयणार्थं कश्चन आपणः उद्घाटितः अभवत्। सः च आपणः लालनत्थूमलस्य आपणस्य पार्श्वे एव आसीत्। यदा शङ्करः तत्र उपविष्टः तदा तस्य पिता विस्मयेन तद्मुखम् अपश्यत्। स्वस्मात् आपणात् अवकाशं प्रकल्प्य नत्थूमलः तत्र आगत्य पुत्रम्- "किं रे, त्वं तु हरिद्वारं गतः आसीः?" इति प्रश्नम् अपृच्छत्।

"तर्हि भवान् सर्वं जानाति। कदाचित् भवतः कथनेन एव माता मह्यं पञ्चाशत् रूप्यकाणि अदात्। सम्यक् जातं, हरिद्वारं न गतम् इति"।

"किन्तु, इदानीं त्वं मया सह प्रतिस्पर्धां करिष्यसि?"

"अद्य तु आपणस्य उद्घाटनमुहूर्तं सम्पन्नम्। पश्याम, कथम् आवयोः सामञ्जस्यं भवेत्। भवता इतोऽपि धनम् अर्जनीयं तु नास्ति। भवतः कुत्र अपत्यम् अस्ति, यस्य कृते धनसङ्ग्रहणस्य आवश्यकता भवेत्"?

लालचूहडमलस्य नीतिः तु न शङ्करेण अवगता न वा तत्पित्रा नत्थूमलेन। द्वयोः आपणयोः मध्ये संघर्षः तु भवेत् एव। लालचूहडमलः इतोऽपि एकम् उपायम् आचरत्। सः महाहट्टे तादृशं किञ्चन वातावरणं निर्मितवान् येन लालनत्थूमलस्य वाणिज्यव्यवहारः पूर्णतया समाप्तः भवेत्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यत्र नत्थूमलस्य वाणिज्यव्यवहारः पूर्वं लक्षाधिकानां रूप्यकाणां भवति स्म, इदानीं तु दशरूप्यकाणाम् अपि नास्ति।

येषां जनानां पार्श्वे नत्थूमलस्य नाम्ना धनार्पणादेशपत्रम् आसीत्, ते चिन्ताकुलाः अभवन्। एतस्मिन् काले एव लालचूहडमलः तानि धनार्पणादेशपत्राणि पञ्चविंशतिः प्रतिशतं न्यूनमूल्येन क्रेतुम् प्रारब्धवान्। यदा पत्रद्वयं क्रीतं तदा तेन इतोऽपि धनं न्यूनं कृतम्। इदानीं शतरूप्यकात्मकस्य कस्यचित् एकस्य धनार्पणादेशपत्रस्य मूल्यं पञ्चाशत् जातम्। नत्थूमलः सर्वेषां पत्राणां मूल्यं प्रतिदातुम् असमर्थः जातः। कारणं तु एतत् एव यत् तेन यत्र धनं योजितम् आसीत् ततः सर्वं धनं अकस्मात् न सङ्गृहीतम्।

मनसारामशङ्करदासयोः सः आपणः स्वस्य उद्घाटनदिनस्य तृतीये दिने एव दशलक्षमूल्यात्मकानां धनार्पणादेशपत्राणि क्रीतवान्। तेषु केषाञ्चित् समयसीमा अपि समाप्ता जाता आसीत्। अवशिष्टानि तानि पत्राणि मासे मासद्वये वा समाप्तानि भविष्यन्ति।

अस्मिन् समये लालनत्थूमलः रूप्यकाणां सङ्ग्रहणं करोति स्म। पूर्वं येषां केषाञ्चित् जनानां कृते साहाय्यं कृत्वा उपकारं कृतवान् आसीत् तेभ्यः, तथा वित्तकोषेभ्यः च धनस्य सङ्ग्रहणं करोति स्म। परन्तु दशलक्षरूप्यकाणां सङ्ग्रहणम् अतीव कठिनम् कार्यम्। परिणामः एषः अभवत् यत् नत्थूमलेन धनार्पणादेशपत्राणां मूल्यं प्रतिदातुम् असामर्थ्यं प्रकटनीयम् अभवत्। तस्य आपणः वस्तुभाण्डागारं च पिहितौ जातौ। तत्र तालौ योजितौ। सः ऋणदानाक्षमः जातः। तस्मात् तेन क्षमाप्रार्थना करणीया अभवत्।

ऋणप्रत्यर्पणे असमर्थस्य तस्य गृहं सर्वा अचलसम्पत्तिः च विक्रीता जाता। सा च सम्पत्तिः चूहडमलेन क्रीता। इत्थं क्रयविक्रयणस्य वर्षद्वयम् अतीतम्। इदानीं चूहडमलेन अन्तिमः प्रहारः कृतः। यस्मिन् गृहे नत्थूमलः वसति स्म तस्मात् गृहात् नत्थूमलं बहिः कर्तुं बहिष्कारस्य आज्ञापत्रं स्वीकृत्य शङ्करं प्रेषितवान् सः।

यदा शङ्करः गृहस्य स्वामित्वं प्रकटयितुं गतः तदा नत्थूमलः विनयेन- "शङ्कर, गृहस्य अन्तः एकस्मिन् प्रकोष्ठे वासाय मह्यम् अनुमतिं ददातु। प्रतिमासं भाटकं दास्यामि" इति पुत्रम् अयाचत्।

शङ्करः उदतरत्- "एतत् गृहं मया न क्रीतम्। क्रेतुः प्रतिनिधिरूपेण आगतः अस्मि। यदि भवान् वदति तर्हि अहम् एतस्मिन् विषये लालवर्येण सह सम्भाषणं करिष्यामि" इति।

"तर्हि किम् अद्य गृहात् मां न बहिष्करोषि?"

"एकं दिनम् इतोऽपि प्रतीक्षितुं शक्नोमि"।

गृहं गत्वा शङ्करेण यदा लालचूहडमलस्य पुरतः पितुः प्रस्तावः उक्तः तदा हसन्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सः- "पश्य, शङ्कर! नत्थूमलः मम सम्बन्धी अस्ति। किन्तु सः मम जामात्रे पञ्चाशत् रूप्यकाणि दत्त्वा गृहात् निष्कासितवान् आसीत्। सः मम पुत्र्यै वस्त्राणि क्रेतुं पञ्चशतं रूप्यकाणि दातुं निराकृतवान् आसीत्। इदानीं भगवान् विपरीतं सर्वं कृतवान्। अहम् अत्र किं कर्तुं शक्नुयाम्? अहं पूर्णं गृहं भाटकेन कस्मैचित् दातुं बद्धवचनः अस्मि। यदि सः त्वत्पित्रे निवासाय एकं प्रकोष्ठं ददाति तर्हि तत्र मम कोऽपि आक्षेपः न भविष्यति" इति अवदत्।

"सः कः अस्ति?"

"मम पुत्री लक्ष्मीः"।

"कियत्भाटकं निर्णीतं भवता?"

"प्रतिमासं पञ्चाशत् रूप्यकाणि"।

"भवतु। मम पिता गृहस्वामिन्या सह एव सम्भाषणं करिष्यति"।

रात्रौ लक्ष्म्या सह सम्भाषणं जातम्। सा अवदत्- "पिता मह्यं भाटकत्वेन तत् गृहं दत्तवान्। अहं स्वयं तत्र वासं करिष्यामि। अहं तत्र कस्मैचित् अपि भाटकत्वेन प्रकोष्ठं न दास्यामि। तस्य गृहस्य भाटकरूपेण स्वीकरणस्य किञ्चन अन्यत् अपि प्रयोजनम् अस्ति। तद्यथा भवतः पिता तस्मात् गृहात् बहिः निष्कासनीयः इति" इति।

"तर्हि त्वया एव एतत् कार्यं करणीयम्" इति शङ्करः कोपेन निष्कासनस्य आज्ञापत्रं तस्याः पुरतः क्षिपन् अवदत्।

लक्ष्मीः तत् पत्रम् उत्थापयन्ती- "भवान् कस्यचित् लज्जाहीनस्य पितुः पुत्रः अस्ति। अतः एव स्वस्य अवमाननं कारयित्वा अपि न लज्जते भवान्। परन्तु अहं तद्दिनम् कदापि विस्मर्तुं न शक्नोमि यदा मम श्वशुरः मम पतिं चोरः इति उक्तवान् आसीत्" इति अवदत्।

१२

मङ्गलस्य कार्यं सारल्येन प्रचलति स्म। मानिनी शरीरेण बुद्ध्या च द्रुतगत्या विकासं प्राप्नुवती आसीत्। अर्चकवर्यस्य बृजलालस्य साहाय्येन मानिन्याः शिक्षणस्य प्रबन्धनं जातम् आसीत्। हिन्दीं संस्कृतं च पाठयितुं कस्यचन शिक्षकस्य व्यवस्था कल्पिता आसीत्। आंग्लं गणितं च सा अग्रजस्य दीपस्य सकाशात् पठति स्म। किन्तु बुद्धेः विकासः तु केवलस्य शिक्षणस्य आधारेण एव न भवति। शिक्षणेन सह गृहस्य वातावरणं पूर्वजन्मनः संस्कारः च अपि कस्यचित् बुद्धेः विकासे सहयोगिनौ भवतः। मानिनी तु नानाविधसंस्कारैः पोष्यमाणा आसीत्।

मानिनी प्रायः रामोः गुरुवर्यस्य एव चर्चां कुर्वती भवति इति दृष्ट्वा मङ्गलः आश्चर्यम् अनुभवति स्म।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एकदा सर्वे उपविष्टाः आसन्। मङ्गलस्य माता, अनुजा सोहनी, पत्नी मोहिनी बालाः च तत्र आसन्। मङ्गलः रामुणा इन्द्रजालेन कृतस्य सहस्त्ररूप्यकात्मकस्य विषये चर्चां कुर्वन् आसीत्। तत्र मङ्गलः अवदत्- "नगरे किञ्चन गौरीशङ्करमन्दिरं निर्मीयमाणम् अस्ति। अहं तत्रैव सहस्त्ररूप्यकाणां राशिं दानरूपेण लेखितवान्। रामोः नाम्ना दानं कृतम्"इति। तदा मङ्गलस्य माता- "विचित्रः अयं विषयः। अवगन्तुं न शक्यते" इति अवदत्।

मानिनी तदा उदतरत्- "ह्यः रात्रौ नेयदीपं प्रज्वाल्य वृक्षस्य अधः उपविश्य पठन्ती आसम्। दूरतः कस्यचित् आगमनस्य ध्वनिः श्रुतः मया। यदा अहं तद्दिशि अपश्यं तदा तत्र कोपि न आसीत्। ध्वनिः तु श्रूयते स्म किन्तु कोऽपि न दृश्यते स्म। ततः मन्दं किञ्चन श्वेतवस्तु दृष्टम्। किञ्चित् कालानन्तरं कोऽपि श्वेतं धौतवस्त्रं करांशुकं च धृतवान् जनः दृष्टः। पुनः किञ्चित् समयस्य पश्चात् अवागच्छं यत् पुरस्तात् आगन्तुकः सः जनः अर्चकवर्यः बृजलालः अस्ति। यदा सः अत्यन्तं निकटे आगतः तदा मया दृष्टं यत् सः स्मितं कुर्वन् अस्ति............

"अहं तम् अवदम्- 'कीदृशं विचित्रम् एतत् यत् भवान् अपि आसीत्, मदीये नेत्रे अपि आस्तां, प्रकाशः अपि आसीत्, किन्तु भवान् न दृष्टः".......

"मदीयम् एतत् वचनम् आकर्ण्य सः आसन्दे उपविश्य- 'पुत्रि, मानिनि! मानवस्य शक्तिः सीमिता भवति। बुद्धिः सीमिता भवति। इन्द्रियाणाम् अनुभूतिः अपि सीमिता भवति। तस्मात् यत्किमपि प्रतीयमानं कार्यं सीमितशक्तेः आभ्यन्तरे भवति। तदेव सर्वं दृश्यते। पूर्वम् अहं तव नेत्रयोः अनुभवशक्तेः परिधितः बहिः आसम्। मन्दं अहं तस्य परिधौ आगतः। ततः तव दृष्टिपथि अपि आगतः'।

"तस्य कथनम् आसीत् ' यथा यथा मानवः शक्तिसम्पन्नः भवति तथा तथा सः भूतस्य भविष्यतः च अधिकाधिकं अनुभूतिं कर्तुं सफलः भवति....

"पुनः सः अवदत् यत् योगाभ्यासेन ज्ञानचक्षुषी तीव्रतरे भवतः। तेन मानवः पूर्वजन्मनां कर्माणि अपि द्रष्टुं शक्नोति। अहं चिन्तयामि यत् मया अपि पूर्वजन्मनः अस्पष्टम् इव चित्रं दृश्यमानम् अस्ति" इति सविस्तरं विवृतवती मानिनी।

मानिन्या उक्तं वचनं श्रुत्वा तत्र उपस्थिताः सर्वे व्यहसन्। ऐदम्प्राथम्येन मानिनी एवं न उक्तवती आसीत्। अद्य सा अन्धकारमये विस्तृते क्षेत्रे दीपकप्रकाशभागस्य सीमोल्लेखं कृत्वा बोधयितुं प्रयत्नं कृतवती आसीत्। मङ्गलः तस्याः एतादृशैः वचनैः नितरां विस्मितः भवति स्म। मोहिनी तु तस्याः वचनं श्रुत्वा गम्भीरचिन्तायां पतति स्म।

दीपः मानिन्याः परिहासोद्देशेन अपृच्छत्- "तर्हि त्वम् अपि योगाभ्यासं प्रारब्धवती?" इति।

"आम्! अहं रामुनिकृट्यां गता आसम्। सः किञ्चन विषयं माम् अवदत्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तेन मम एवं भाति यत् अहम् इतः बहु दूरं पर्वतस्य उपरि नद्याः तटे कस्मिंश्चित् ग्रामे वसामि स्म। रामोः गुरुवर्यः मया सह क्रीडति स्म.........

"पश्चात् आवयोः विवाहः जातः। किन्तु ततः किम् अभवत् इति न ज्ञायते। यथा दीपकस्य प्रकाशात् कश्चन अन्धकारे विलीनः भवति तथा एव सः नटेश्वरः कुत्रः गतः इति न ज्ञायते। अहम् इदानीं पश्यामि यथा अर्चकवर्यः रात्रौ अन्धकारात् प्रकाशं प्रति आगतः तथैव सः नटेश्वरः अपि पुनः प्रकाशं प्रति आगतः अस्ति इति"।

"मुग्धे, मोहिनि!" इति मङ्गलस्य माता उक्तवती- "सः तु तव पितुः अपेक्षया अपि वयसा ज्येष्ठः अस्ति" इति।

"किन्तु, एतत् अहं नित्यं स्वप्नेषु कदाचित् एकान्ते अपि उपविश्य विचारं कुर्वती पश्यन्ती च भवामि"।

"तव मस्तिष्कम् एव सुपथभ्रष्टं जातम् इति भाति" इति मोहिनी पुत्रीं मानिनीम् अकथयत्।

"मातः, एषा वार्ता नास्ति। योगेश्वरः कृष्णः अपि गीतायाम् उक्तवान्- 'मम नैकानि जन्मानि अभवन्। हे अर्जुन! भवतः अपि बहूनि जन्मानि अभवन्। भवान् न जानाति, किन्तु अहं जानामि" इति।

इदानीं पुनः दीपः अपृच्छत्- "किञ्चित् विवरणं कुरु, योगाभ्यासं कथं करोषि त्वम्?" इति।

सर्वे अहसन्। परन्तु मानिनी पुनः- "अर्चकवर्यः एतत् जानाति। अहम् एकदा पूजां कुर्वती आसं तदा सः मदीयं दोषम् बोधितवान् आसीत्" इति उक्तवती।

मङ्गलस्य एवं भाति स्म एतस्याः विवाहः जगदीशचन्द्रेण सह एव भविष्यति न अन्यत्र। तस्य चिन्तायाः प्रश्नः एषः आसीत् 'जगदीशचन्द्रः सप्तचत्वारिंशद्वर्षीयः अष्टचत्वारिंशद्वर्षीयः वा स्यात्। एतादृशः विवाहः कथं फलदः सुखमयः च भवेत्?' इति।

मङ्गलः सप्ताहे द्वित्रवारं कार्यार्थं नगरं गच्छति स्म। गत्वा नगरस्य वार्ताः विभिन्नेभ्यः जनेभ्यः श्रुत्वा, ग्रामम् आगत्य सर्वान् ग्रामवासिनः श्रावयति स्म। एकदा सः 'शङ्करः पित्रा सह कलहं कृत्वा पृथक् एव आपणम् उद्घाटितवान्' इति वार्तां ग्रामे अश्रावयत्। पुनः एकदा तेन 'लालनत्थूमलः अकिञ्चनः इव जातः' इत्येषा वार्ता उक्ता। तदनन्तरं जनैः श्रुतं यत् सः इदानीं भिक्षुकः जातः अस्ति। तस्य सर्वा सम्पत् विक्रीता अभवत्। एकस्मिन् दिने एषा वार्ता सर्वत्र प्रसृता 'नत्थूमलः गृहात् निष्कासितः अभवत्' इति।

एकस्मिन् दिने मङ्गलः महाहट्टे स्वस्य वस्तूनां तोलनं कारयन् आसीत्। तदा समस्ते महाहट्टे एषा एव चर्चा प्रवर्तमाना आसीत् यत् लालनत्थूमलः शय्यापात्रादीनि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वीकृत्य गृहात् कुत्रापि निर्गतः इति। कश्चन वदति स्म यत् नत्थूमलः पद्भ्याम् एव हरिद्वारगमनस्य विचारम् अकरोत्। अपरः कश्चन एवम् अपि वदति स्म 'तस्य पार्श्वे बहुधनम् अस्ति। एषा निर्धनता तु पाखण्डमात्रम् अस्ति' इति।

'लालनत्थूमलेन सह मेलनं कृत्वा प्रवृत्तं सर्वं विषयं जानीयाम्' इति मङ्गलः अचिन्तयत्। तस्मात् तत्र नत्थूमलस्य विषये वार्तालापं कुर्वन्तं कमपि सः अपृच्छत्- "लालनत्थूमलस्य विषये सम्भाषणं कुर्वन् अस्ति वा?" इति।

"आम्"।

"सः गृहात् निर्गतः वा?"

"आम्, इदानीम् एव वार्ता आगता यत् लालचूहडमलस्य पुत्री स्वयम् एव निष्कासनाज्ञापत्रं नीत्वा गतवती। तां दृष्ट्वा लालनत्थूमलः तत्पत्नी च शय्यापात्रादीनि स्वीकृत्य गृहात् निर्गतौ इति"।

"तौ कुत्र गतवन्तौ?" इति मङ्गलः पुनः अपृच्छत्।

"इतः साक्षात् कुल्यातटेन स्थितेन मार्गेण गुजराँवाला इति स्थानं गमिष्यतः। ततः लाहौरनगरं, पुनः ततः हरिद्वारगमनस्य वार्ता सर्वत्र प्रसृता अस्ति"।

मङ्गलः एकं क्षणं विचारम् अकरोत्। तत्पश्चात् वस्तुतोलनकार्यम् आपणिकाय निवेद्य लालनत्थूमलम् अन्वेष्टुं ततः प्रस्थितः। तस्य चिन्तनम् आसीत् यत् नत्थूमलः पद्भ्याम् एव कुल्यां प्रति गतः स्यात्। तस्मात् सः कस्मिंश्चित् शकटे उपविश्य गुजराँवाला इति गमनमार्गे तम् अन्वेष्टुं कुल्यां प्रति किञ्चित् दूरं गतः।

नगरात् त्रिमीलमिते दूरे मार्गस्य पार्श्वे विद्यमानस्य कूपस्य वेदिकायाम् उपविश्य लालनत्थूमलः तत्पत्नी च विश्रामं कुरुतः स्म। मङ्गलः तौ दृष्ट्वा अभिज्ञाय च शकटात् अवतीर्य तयोः समीपम् अगच्छत्। नत्थूमलः तम् अपश्यत् अपृच्छत् च- "कुत्र गच्छति मङ्गल?" इति।

"भवन्तम् अन्वेष्टुं निर्गतः आसम्। भवान् शीघ्रम् एव प्राप्तः इति सन्तोषम् आप्नुवम्"।

"किं भवता अपि अस्मत्तः किमपि स्वीकरणीयम् अस्ति? अस्मिन् समये तु मम समीपे किमपि नास्ति"।

"अहं किमपि स्वीकर्तुं न आगतः। कश्चन विचारः भवतः अग्रे वक्तुम् इष्यते मया। आदिशति चेत् निवेदनं करवाणि?"

"आम्, भवान् अपि वदतु"।

"भवान् मदीये ग्रामे वासं करोतु। तत्र भवतः वार्धक्यं सुगमतया व्यतीतं भविष्यति इति मम विचारः अस्ति"।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"आवयोः समीपे भोजनाय एका वराटिका अपि नास्ति"।

"लालवर्य! वराटिकाः रूप्यकाणि वा न खाद्यन्ते न वा पीयन्ते। अन्नं वस्त्रं च ग्रामे निर्मितं भवति। तत् भवान् प्राप्तुम् अर्हति"।

"भवता किमर्थं तत् मह्यं दीयेत? मम पुत्रः एव आवाभ्यां दूरं गतः अस्ति"।

"तत्र ग्रामे भवतः पुत्रवधूः अस्ति। सा भवते सर्वां व्यवस्थां करिष्यति"।

"सा किमर्थं कुर्यात्? तया सह उत्तमः व्यवहारः न आचरितः आवाभ्याम्"।

"पश्यतु, लालवर्य! उत्तमानुत्तमानां कार्याणां निर्णयकरणं तेषां फलप्रदानं च अस्मत्सदृशाः प्राणिनः न कुर्वन्ति। एतत्सर्वं भगवतः अधीनं भवति। वयं तु स्वस्य कर्तव्यपालनं कुर्याम। सोहनी भवते किञ्चित् अपि न द्विषति। सः भवतः जीवनं सुखकरं कर्तुं प्रयतिष्यते"।

"भवान् ताम् अपृच्छत् किम्?"

"इदानीं तु पृष्ट्वा न आगच्छम्। किन्तु भवतः विषये वर्षद्वयात् चर्चा क्रियमाणा अस्ति। अहं विश्वसिमि यत् सा तथैव चिन्तयति यथा अहं कथयन् अस्मि"।

"किं शङ्करस्य मातः, कः अभिप्रायः तव?" इति लालनत्थूमलः पत्नीं सम्बोधयन् अपृच्छत्।

"अहं तु गङ्गातटे प्राणत्यागं कर्तुम् इच्छामि"।

"मातः, एतत् सौभाग्यं तु पूर्वजन्मनां कर्मानुसारं प्राप्यते। यदि भवत्या गङ्गातटे प्राणत्यागः करणीयः भवेत् तर्हि ग्रामे निवसन्ती अपि तत्र गन्तुं शक्यते एव। यदि तादृशं भाग्यं नास्ति तर्हि गङ्गातटे निवसन्ती अपि अन्यत्र कुत्रापि गन्तव्यं भवेत्"।

"तथापि प्रयत्नः तु करणीयः एव"।

"एवं चेत् तत्र पद्भ्यां गमनम् नितरां कष्टदायकम्। मम पार्श्वे किञ्चित् धनम् अस्ति। एतत् स्वीकृत्य रेलयानेन तत्र गच्छतु"।

इत्युक्त्वा मङ्गलः कोषात् पञ्चविंशतिः रूप्यकाणि निष्कास्य तत्पुरतः स्थापितवान्। लालनत्थूमलः रूप्यकाणि दृष्ट्वा निराकरणस्य उद्देश्येन शिरः कम्पयन्- "न मङ्गल! यदि मरणम् एव निश्चितं तर्हि दानं स्वीकृत्य मरणम् उचितं नैव भवेत्" इति मङ्गलम् उक्तवान्।

"तर्हि एतस्य तात्पर्यं यत् भवतः पार्श्वे किञ्चित् धनम् अस्ति?"

"आम्! अहं मिथ्याभाषणं न करोमि। परन्तु तावत् न्यूनम् अस्ति यत् एकस्याः अपि वराटिकायाः रक्षणं करणीयम् एव भवेत्"।

मङ्गलः रूप्यकाणि प्रतिस्वीकृत्य कोषे स्थापयन्- "तथैव भवतु! पश्यतु ग्रामे भवतः पुत्रवधूः वसति। आवश्यकतायां सत्यां तस्याः गृहं भवतोः कृते सर्वदा उद्घाटितम् एव भवेत्"।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एवम् उक्त्वा मङ्गलः शकटेन पुनः नगरं प्रत्यागतः। यदा सः दृष्टिपथात् तिरोहितः जातः तदा शङ्करस्य माता- "धनम् अस्ति इति किमर्थं तम् उक्तवान् भवान्?" इति पतिम् अपृच्छत्।

"मङ्गलस्य सहानुभूतिपूर्णेन व्यवहारेण अहं तस्मात् किमपि गोपयितुम् असमर्थः जातः"।

"वस्तुतः भवान् नष्टबुद्धिः इव जातः अस्ति। सः इदानीं नगरं गत्वा सर्वत्र प्रकटयेत् यत् आवयोः समीपे प्रच्छन्नं किमपि धनम् अस्ति यस्य विषये आवाभ्यां ऋणप्रत्यर्पणसमये न उक्तम्"।

"यावत् एषा वार्ता सर्वत्र प्रसरेत्, आवां ग्रहीतुं प्रयत्नः भवेत् तावत् आवाम् अन्यत्र कुत्रापि गतौ स्याव" इति लालनत्थूमलः पत्नीम् अवदत्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निर्वाणदीपे किमु तैलदानम्

१

"यदा भवान् स्वस्य मातापितृभ्यां सह उचितं व्यवहारं कर्तुं न अर्हः तदा मया सह कथं तं व्यवहारं रक्षितुं शक्नोति?" इति सोहनी पुरतः उपविष्टं शङ्करम् अवदत्। 'मम द्वितीयया पत्न्या लक्ष्म्या सह सम्यक् सम्बन्धः नास्ति। अहं तस्यां न स्निह्यामि। यदि त्वं मया सह चलिष्यसि तर्हि पूर्ववत् व्यवहारं पुनः न करिष्यामि' इति शङ्करः तां वक्तुम् आगतः आसीत्।

शङ्करः सोहन्या कृतेन आरोपकल्पनेन हताशः न अभवत्। सः अवदत्- "मदीयौ मातापितरौ एव सर्वेषां कलहानां कारणरूपेण आस्ताम्। तौ एव तव भ्रातुः मङ्गलस्य विरुद्धं मां प्रेरितवन्तौ। तयोः उद्दीपनात् एव अहं तव मातरं मोहिनिमङ्गलयोः विरुद्धम् अकथनीयं वचनम् उक्तवान् आसम्। तौ एव लक्ष्मीं पीडयितुं मह्यं धनप्रदानं निराकृतवन्तौ। तयोः कृते मयि स्वल्पा अपि श्रद्धा नास्ति इदानीम्। तस्मात् एव कारणात् यदा तौ विपद्ग्रस्तौ जातौ तदा तयोः पूर्वकर्मणां फलम् इदम् इति विचार्य किञ्चिदपि साहाय्यं न कृतं मया" इति।

"मातापित्रोः प्रीतिः धनार्थं तु न क्रियते। एषः सम्बन्धः प्रकृत्या प्रदत्तः भवति। तेन सम्बन्धेन एव तयोः आदरः सेवा च क्रियेते। यदा तौ किञ्चन पात्रं धनं च नीत्वा गृहात् बहिः गन्तुम् उद्युक्तौ तदा अन्यत्र वासव्यवस्थां कल्पयित्वा तयोः सेवाकरणं साहाय्यकरणं च भवतः धर्मः आसीत्" इति उक्तवती सोहनी।

"अस्तु! एतत् चिन्तनं तव विचारानुगुणम् अस्ति। किन्तु मम चिन्तनानुसारं तु तौ मया सह दुर्व्यवहारम् समाचर्य स्वस्य सर्वम् अधिकारं नाशितवन्तौ" इति अवदत् शङ्करः।

"इदानीं भवान् गन्तुं शक्नोति। मया मातुः कृते दुग्धं सज्जीकरणीयम् अस्ति" इति सोहनी उक्त्वा शङ्करं ततः प्रस्थातुं सङ्केतं कृतवती।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शङ्करः यदा ग्रामात् प्रत्यागतः तदा मङ्गलः इदानीम् अपि महाहट्टे वस्तूनां तोलनं कारयित्वा देयादेयस्य गणनां कुर्वन् आसीत्। अद्य तस्य एतस्मिन् कार्ये विलम्बः जातः। तत्र कारणं तु सः लालनत्थूमलस्य हरिद्वारगमनं निराकर्तुं गतः आसीत्। शङ्करः मङ्गलस्य समीपम् आगत्य- "मङ्गलभ्रातः, दृष्टं भवता खलु, किं प्रवृत्तम् इति?" इति अपृच्छत्।

"आम्, दृष्टम्"।

"अहम् एतस्मिन् विषये भवता सह सम्भाषणं कर्तुम् इच्छामि" इति शङ्करः उक्तवान्।

"करोतु"।

"इतः अवकाशं प्राप्य मम आपणं प्रति आगमिष्यति चेत् सम्यक् भवेत्"।

"मया ग्रामं प्रति गन्तव्यम् अस्ति। अन्धकारः प्रसरन् अस्ति"।

"अहं भवता सह ग्रामपर्यन्तम् एव गमिष्यामि"।

"तथैव भवतु"।

मार्गे गच्छन् शङ्करः मातापितृभ्यां सह प्रवृत्तस्य कलहस्य सर्वं वृत्तान्तं सविस्तरम् अवदत्। एतस्मिन् वृत्तान्तकथने सः एतत् अपि अवदत् 'लक्ष्म्या सह विवाहः मम पितुः कुतन्त्रस्य परिणामः एव आसीत्। अहम् आरम्भात् एव सोहन्यां स्निह्यामि। एषः स्नेहः एव पितापुत्रयोः मध्ये कलहस्य मूलं कारणम् आसीत्' इति। अन्ते सः पुनः सोहन्या सह सम्बन्धं कल्पयितुं मङ्गलं प्रार्थयत। सः अवदत्- "अहं लक्ष्मीं त्यक्तुं सज्जः अस्मि। यदि सोहनी प्रत्यागच्छेत् तर्हि पार्थक्येन गृहनिर्माणं कृत्वा तया सह वासं करिष्यामि" इति।

मङ्गलः तं पौनः पुन्येन अबोधयत्- "शङ्कर, अहं सोहन्याः विषये हस्तक्षेपं कर्तुम् अनर्हः अस्मि। तस्याः गमने अगमने वा सा पूर्णतया स्वतन्त्रा अस्ति। अहं तस्याः निर्णये बाधकः भवितुं न इच्छामि" इति।

"एतत् तु सम्यक् एव। तथापि भवान् ज्येष्ठः सन् स्वस्य अभिप्रायं तु वक्तुं शक्नोति। स्त्रीभिः पत्युः गृहे एव भवितव्यम्"।

"शङ्कर, अहं तां किमपि न वदिष्यामि। भवान् एव किमर्थं न तया सह सम्भाषते? भवतः मार्गः तु केनापि न अवरुद्धः। एकं विषयम् इतोऽपि वदामि। सः अस्ति त्यागस्य भावना। अहम् अद्यावधि कदापि मम जीवनस्य वाणिज्यं न कृतवान्। सर्वदा एतत् एव चिन्तयामि यत् अपरेषां कल्याणाय अहं किं कर्तुं शक्नुयाम् इति। सोहनी यदि भवता सह गन्तुम् इच्छति तर्हि अहं तां न निवारयिष्यामि। यदि सा गन्तुं न इच्छति तर्हि अहं तां सुखिनीं कर्तुं पूर्णरूपेण प्रयत्नं करिष्यामि। अहं तस्याः इच्छां विरुध्य आचरेयम् इत्येतत् कदापि न भवेत्"।

रात्रौ शङ्करः गृहं प्राप्तः। तदा प्रमुदितेन मनसा लक्ष्मीः- "अहं वृद्धं वृद्धां च

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गृहात् निष्कासितवती” इति अवदत्।

शङ्करः निर्निमेषं तस्याः मुखम् अपश्यत्। लक्ष्मीः तु तदेव अनुवर्तयन्ती- “तौ एतया आशया आगतौ आस्तां यत् भवान् अत्र उपस्थितः स्यात् इति। किन्तु मां दृष्ट्वा तौ विस्मितौ जातौ। यदा अहं गृहनिष्कासनस्य आज्ञापत्रं दर्शितवती तदा अधः स्थितं प्रकोष्ठं भाटकत्वेन मां याचितवन्तौ। अहं तदपि निराकृतवती। तयोः कृते अस्मिन् गृहे किञ्चित् अपि स्थानं नास्ति इति स्पष्टरूपेण अवदम्।

शङ्करः इदानीम् अपि किमपि न अवदत्। ततः लक्ष्मीः “अहं चिन्तयामि यत् श्वः आरभ्य एव आवां तस्मिन् गृहे वासं कुर्याव। अत्र एकस्मिन् एव प्रकोष्ठे निवासकरणेन अहं जामिताम् इव अनुभवामि” इति उक्तवती।

इदानीम् अपि शङ्करः किमपि न अवदत्। तस्मात् विस्मयभावं प्रकटयन्ती लक्ष्मीः अपृच्छत्- “भवान् किमर्थं किमपि न वदति?” इति।

“मया किमपि वक्तव्यम् एव नास्ति। इदानीं तु त्वदीयः आदेशः एव सर्वत्र प्रशस्तः अस्ति” इति शङ्करः उदतरत्।

“अस्तु! किन्तु एतत् सर्वं भवतः लाभाय एव अस्ति”।

“स्यात्”।

“किं भवतः सन्देहः अस्ति अत्र?”

“अहं तु अत्र विनाशस्य आरम्भं पश्यन् अस्मि”।

“कथम्?”

“अहम् इदानीं केनचित् मेलनं कृत्वा आगतः अस्मि। सः कथयन् आसीत् ‘पितापुत्रयोः सम्बन्धः प्राकृतिकः भवति। एषः हानिलाभयोः आधारेण कल्पितः नैव भवति’ इति। अहं मातापितरौ गृहात् निष्कास्य तस्य प्राकृतिकसम्बन्धस्य अवमाननम् अकरवम्। तस्मात् प्रकृतिः निश्चयेन प्रतिकारं साधयिष्यति। सः कीदृशः प्रतिकारः भवेत् इति वक्तुं न शक्यते”......

“मदीयः पिता मातापुत्रयोः प्राकृतिकसम्बन्धे विघ्नम् उपस्थापितवान् आसीत्। तस्य परिणामतः एव पितापुत्रयोः सम्बन्धः विच्छिन्नः जातः। अहम् अनुभवामि यत् यदि अहम् अपि मातापितृभ्यां सह मूलसम्बन्धस्थापने कञ्चित् अन्यं विचारं विघ्नरूपेण आनयामि तर्हि मया अपि तस्य फलं भोक्तव्यं भवेत् एव” इति सविस्तरं निरूपितवान् शङ्करः।

“एतत् भीरूणां वचनम् अस्ति। भवान् मम साहाय्यं करोति चेत् प्रकृतिं जेतुं शक्नुमः वयम् इति पश्चात् ज्ञातुं शक्यते। प्रकृतिः तु अस्माभिः निर्मीयते। प्रकृत्या वयं निर्मिताः न भवामः” इति अवदत् लक्ष्मीः।

शङ्करस्य मुखात् हासः निर्गतः। लक्ष्मीः तं प्रश्नयुक्त्या दृष्ट्या अपश्यत्। तदा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शङ्करः- "अहम् अपि पूर्वम् एवं वदामि स्म, किन्तु प्रकृतिः मां परास्तम् अकरोत्" इति।

"तत् एतदर्थं यत् भवतः पिता भवता सह अनुचितं व्यवहारं कुर्वन् आसीत्"।

"प्रकृतेः विरोधः अपि अनुचितः अस्ति खलु।"

लक्ष्मीः शङ्करेण उक्तं वचनं न अवगतवती। अन्येद्युः सेवकस्य साहाय्येन सा स्वस्य वस्तूनां बन्धनं सज्जीकृत्य श्वशुरगृहं गन्तुं सज्जा अभवत्।

शङ्करः यदा आपणं गन्तुम् उद्युक्तः जातः तदा लक्ष्मीः- "अद्य मध्याह्नकालिकं भोजनं तद् गृहम् आगत्य करोतु भवान्" इति तम् अवदत्।

"कस्मिन् गृहे?"

"यत् स्वकीयम् अस्ति। यस्मात् गृहात् भवतः पिता आवां निष्कासितवान् आसीत्। किञ्च यत्र पितुः साहाय्येन मम पूर्णः अधिकारः जातः अस्ति"।

शङ्करः दीर्घं निःश्वासं कुर्वन्- "अहं तत्र न गमिष्यामि" इति अवदत्।

"तर्हि किम् अत्र श्वशुरस्य गृहे भोजनं कृत्वा आनन्दम् अनुभवति भवान्?"

"अहं तु अत्रापि न स्थास्यामि"।

"तर्हि कुत्र गमिष्यति?"

"इदानीं निश्चयं न अकरवम्"।

"किम् अहं तद्गृहं न गच्छानि?"

"अहं तुभ्यम् आदेशं दातुं न शक्नोमि"।

"यदि किञ्चित् अन्यत् गृहं गमिष्यामि तर्हि किं भवान् तत्र वासं करिष्यति?"

"कीदृशं गृहम् अस्ति इति ज्ञात्वा एव वदिष्यामि"।

शङ्करः इतः पूर्वं स्वस्मिन् व्यवहारे एतावतीं दृढतां कदापि न प्रकटितवान् आसीत्। अद्यापि लक्ष्मीः तस्मिन् न विश्वसितवती। सा स्वस्य सर्वाणि वस्तूनि स्वीकृत्य श्वशुरगृहं गतवती।

मध्याह्ने शङ्करः तत्र न आगतः। सः सेवकं प्रेषयित्वा ज्ञातवान् आसीत् लक्ष्मीः तद् गृहं गतवती इति। शङ्करः पार्श्वे विद्यमानं किञ्चन भोजनगृहं गत्वा, खादित्वा पुनः आपणं प्रत्यागतः। सायं यावत् कार्येषु व्यग्रः आसीत्। अतः एव तेन आगामिषु विषयेषु विचारं कर्तुं समयः एव न लब्धः।

यदा आपणस्य कार्यं समाप्तं जातं तदा तस्य पुरतः 'अहं कुत्र गच्छेयम्? इत्येषा समस्या उपस्थिता जाता। श्वशुरस्य गृहगमनेन किमपि प्रयोजनं न आसीत् एव। यतः तस्य पत्नी तत्र न आसीत्। स्वस्य पुरातनं गृहं गन्तुं न इच्छति सः। मातापितरौ गृहात् निष्कास्य स्वस्य तत्र वासकरणम् इत्येतेन सः अन्तःकरणे आत्मग्लानिम् अनुभूतवान्। अतः सः गृहस्य अन्वेषणार्थम् इतस्ततः अभ्रमत्। रात्रिकालः उपस्थितः आसीत्। तस्मात्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गृहस्य अन्वेषणं सहजं न जातम्। सः एकस्मिन् भोजनमन्दिरे भोजनं कृत्वा रेलस्थानकस्य पार्श्वे काञ्चित् धर्मशालां गत्वा विश्राममम् अकरोत्।

धर्मशालायाः प्रबन्धकः तं परिचिनोति स्म। अतः सः शङ्करस्य धर्मशालायां विश्रामकारणात् विस्मयभावं प्राकटयत्। पश्चात् शङ्करेण बोधितः सः तूष्णीकः जातः।

२

आरात्रि शङ्करस्य प्रतीक्षां कुर्वती लक्ष्मीः नितरां कुपिता जाता। सा प्रातः एव मातृगृहं गतवती। पिता शौचादिकर्म समाप्य पूजार्थं गच्छन् आसीत् तदा लक्ष्मीः "पितः! किं सः रात्रौ अत्र आगतः आसीत् वा?" इति अपृच्छत्।

"कः, शङ्करः? सः गृहं न गतः आसीत् वा?" इति पिता चूहडमलः प्रतिप्रश्नं कृतवान्।

"आरात्रि तस्य प्रतिपालनं कृतवती, किन्तु सः न आगतः"।

लालचूहडमलः एतेन चिन्तितः तु अभवत्। किन्तु पूजार्थं गतः सः। लक्ष्म्याः माता अपि मनसि अशुभं विचारं कुर्वती आसीत्। सा अवदत्- "इदानीं कुत्र अन्वेषणं कुर्याम तस्य?" इति।

शङ्करः पुरातनं गृहं गन्तुं निराकृतवान् आसीत् इति लक्ष्मीः मातापितरौ न उक्तवती। तस्मात् कारणात् गृहे कोलाहलः आरब्धः। प्रातः अष्टवादने आपणः उद्घाटितः जातः। प्रतिदिनम् इव शङ्करः समयेन आपणं गत्वा उपविष्टः। लक्ष्म्याः अग्रजः मनसारामः किञ्चित् विलम्बेन आगतः। तेन सह तस्य पिता लालचूहडमलः अपि आसीत्। आगमनस्य समनन्तरम् एव चूहडमलः तर्जयन्- "कुत्र आसीत् रात्रिपर्यन्तं शङ्कर?" इति अपृच्छत् शङ्करम्।

"धर्मशालायां लालवर्य"।

"किमर्थं? गृहे किम् आसीत्?"

"तत्र गन्तुं मनः न अभवत्"।

"किमर्थम्?"

"मम पिता तत्र वासार्थम् एकं प्रकोष्ठं याचितवान् आसीत्। किन्तु वयं दातुम् असमर्थाः अभवाम। अहं तत्र वासकरणे लज्जाम् अनुभवामि" इति शङ्करः श्वशुरम् अवदत्।

"तर्हि किं पत्नीं तत्र एकाकिनीं त्यक्त्वा लज्जां न अनुभवसि?"

"अहं तत्र न गमिष्यामि' इति अहं ताम् उक्तवान् आसम्। तथापि सा तत्र गता, तर्हि अहं किं करवाणि?"

"करणीयं किम् आसीत्। गत्वा त्वं तां बोधयेः। युवयोः पितापुत्रयोः व्यवहारः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न ज्ञातः मया। उभौ अपि युवां उद्धतौ क्षुद्रघोटकौ इव स्थः"।

स्वस्य पितुः कृते चूहडमलेन क्रियमाणा व्यङ्ग्योक्तिः शङ्कराय किञ्चित् अपि न अरोचत। सः दन्ताभ्याम् ओष्ठं सम्पीड्य कोपम् अपिबत् एव। सः गणनापुस्तिकायां गणनां कर्तुम् प्रारब्धवान्। श्वशुरेण कथ्यमानं वचनं श्रुत्वा अपि प्रत्युत्तरं किमपि अयच्छन् कार्यं कुर्वन् आसीत् शङ्करः।

स्वस्य अवमाननं विज्ञाय लालचूहडमलः शङ्करस्य पार्श्वे उपविशन्- "इदानीं गृहं गमिष्यसि न वा?" इति अपृच्छत्।

"मम तस्मिन् गृहे वासाय मनः नास्ति"।

"लक्ष्मीः अस्माकं गृहम् आगता अस्ति। आगच्छ, तया सह वार्तालापं कृत्वा तां नय" इति सस्नेहं बोधितवान् लालचूहडमलः।

शङ्करः एतत् श्रुत्वा उत्थितवान्। ततः श्वशुरगृहम् अगच्छत्। तत्र लक्ष्मीः तस्य प्रतिपालनं करोति स्म। सा ज्ञातवती आसीत् तस्याः पतिः आपणे कार्यं कुर्वन् अस्ति इति। यदा शङ्करः आगतः तदा लक्ष्मीः तं पृथक् प्रकोष्ठम् आनीय अपृच्छत्- "रात्रौ कुत्र आसीत् भवान्?" इति।

"धर्मशालायाम्"।

"तत्र कति दिनानि स्थास्यति?"

"यावत् वासाय योग्यं गृहं न प्राप्येत"।

"तर्हि किं तद्गृहं वासाय योग्यं नास्ति?"

"मम कृते नास्ति"।

"महाधनिकस्य पुत्रः खलु भवान्। तद् गृहं वासयोग्यं नास्ति! यत्र जन्म अभवत्, पालनं जातं, ज्येष्ठः अभवत्, इदानीं तदेव स्थानं न रोचते"।

"लक्ष्मि!" इति सम्बोधयन् शङ्करः संक्षेपेण- "एषः तु रुचिकरः विषयः अस्ति। किन्तु एषा अभिरुचिः आयुकारणात् समयकारणात् परिस्थितिकारणात् च परिवृत्ता भवति। इदानीम् अहं तत्र वासं न करिष्यामि" इति।

"तथैव भवतु! यावत् गृहस्य व्यवस्था न भवति तावत् कालं मदीये गृहे वासं करोतु"।

"नैव! इदानीं तत्र वासं न करिष्यामि" इति दृढेन स्वरेण अवदत् शङ्करः।

"अहं मत्पिता च यत्किमपि भवतः कृते साहाय्यं कृतवन्तौ तत्सर्वं विस्मृत्य भवान् कृतघ्नताम् आचरन् अस्ति"।

"अहं तस्य विरोधं न करोमि। सः अत्यन्तं चातुर्येण मम पितरं ऋणदाने असमर्थं कृतवान्। एतत् कृत्यं सम्यक् आसीत् उत न इति तस्मिन् काले मया न ज्ञातम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गृहम् आवाभ्यां प्राप्तम्। आवाभ्यां तत्र कश्चन एकः प्रकोष्ठः तयोः कृते भाटकत्वेन प्रदातुं शक्यते स्म, किन्तु न दत्तः। एषः विषयः मया न ज्ञातः एव"।

"सः मम भवतः च अवमाननं कृतवान् आसीत्"।

"किमपि भवतु, सः मम पिता अस्ति"।

"मम कृते सः किमपि नास्ति।"

"तव कथनस्य तात्पर्यम् एवम् अस्ति 'अहं तव कृते किमपि नास्मि' इति। मयि सति एव सः कोऽपि स्यात्" इति शङ्करः अवदत्।

"यः कोऽपि सः भवेत्, यादृशः योग्यः आसीत् तादृशम् एव स्थानं प्राप्तं तेन" इति लक्ष्मीः अवदत्।

शङ्करः एतादृशानि वचनानि श्रुत्वा श्रुत्वा जामिताम् अनुभूतवान् आसीत्। तस्मात् सः उत्थाय अवदत्- "अस्तु। किं करणीयम् इति अहम् इदानीं निश्चयं न अकरवम्। इतः पूर्वम् अहं चिन्तयामि स्म 'किमपि गृहं भाटकत्वेन स्वीकृत्य वासं कुर्याम्' इति। किन्तु अद्यतनसम्भाषणस्य कारणेन अहम् एतं विषयम् अपि प्रकटयितुं विवशः जातः अस्मि यत् मया स्वीक्रियमाणे गृहे अन्या का भवेत्? त्वम् उत अन्या काचित्?" इति।

सर्पदशनं प्राप्तवती इव लक्ष्मीः ततः उत्थाय- "किम् उक्तवान्?" इति अपृच्छत्।

"यत् त्वम् अशृणोः तदेव"।

सः आपणं प्रत्यागतः। तेन सह गृहस्य सेवकः अपि आगतः। आगत्य सः मनसारामस्य कर्णे किमपि उक्त्वा ततः गतः। शङ्करः मध्याह्नं यावत् कार्यम् अकरोत्। मध्याह्नकालिकं भोजनं कर्तुं यदा सः प्रस्थितः तदा लालचूहडमलः शङ्करस्य समीपम् आगत्य अपृच्छत्- "कुत्र गच्छसि?" इति।

"भोजनं कर्तुम्"।

"कुत्र?"

"कुत्रचित् भोजनमन्दिरे"।

"गृहे किमर्थं न?"

"गृहं गन्तुं मनः नास्ति"।

"पश्य, अहं त्वां वक्तुम् इच्छामि यत् यदि त्वं गृहे पत्न्याः पार्श्वे गन्तुं न शक्नोषि तर्हि आपणं प्रति आगमनस्य अपि आवश्यकता नास्ति"।

"तर्हि किम् एषः आपणः अपि लक्ष्म्याः कृपया एव मया प्राप्तः आसीत्?"

"किमपि अवगच्छ। यदि त्वं पत्न्या सह सम्बन्धं स्थापयितुं न इच्छसि तर्हि अस्माभिः सह अपि तव कोऽपि सम्बन्धः नास्ति एव"।

"तर्हि गणनां कृत्वा मदीयः अंशः दीयताम्"।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"गणना जाता अस्ति। तव यत्किमपि आसीत् त्वया प्राप्तम् एव। पुनः अत्र मा आगच्छ"।

"मम गणनानुसारं दशसहस्रं भवता मह्यं दातव्यम् अस्ति"।

"अहं कथयामि यत् किमपि मया दातव्यं नास्ति। यदि मयि विश्वासः नास्ति तर्हि न्यायालयं गत्वा मम नाम्ना अभियोगं कुरु" इति लालचूहडमलः शङ्करम् अवदत्।

शङ्करः तस्य मुखं पश्यन् एव आसीत्। इदानीं तस्य कोषे रूप्यकद्वयं किञ्चित् नाणकं चैव आसीत्। तस्य मातापितरौ गृहात् निर्गमनकाले तस्मै पञ्चाशत् रूप्यकाणि तु दत्तवन्तौ आस्ताम्। अधुना श्वशुरालयजनाः एकाम् अपि वराटिकां दातुं निराकृतवन्तः आसन्।

शङ्करः ततः अगच्छत्। विपणौ विद्यमाने कस्मिंश्चित् भोजनमन्दिरे भोजनं कृत्वा धर्मशालां प्राप्य चिन्तनं कर्तुम् आरब्धवान्। तेन कोऽपि मार्गः न दृश्यते स्म। न्यायालयगमनं तावत् सुकरं न आसीत्। तत्र तु धनं विना किमपि कार्यं न भवति। तेन अभियोगः कथं करणीयः इति तस्य कृते प्रश्नः न आसीत्। विचारणीयः विषयः एषः आसीत् यत् सः स्वस्य जीवननिर्वहणं कथं कुर्यात्? इति। बहु चिन्तनं कृत्वा सः धर्मशालातः महाहट्टं गत्वा तत्रत्ये कस्मिंश्चित् आपणे गणकरूपेण कार्यं कर्तुं वार्तालापम् अकरोत्।

यस्मिन् आपणे मङ्गलस्य वस्तूनां गणना प्रचलति स्म तत्र उद्योगः प्राप्तः तेन। अन्येद्युः पञ्चविंशतिरूप्यकात्मकं मासिकं वेतनम् अङ्गीकृत्य कार्यं कर्तुम् आरब्धवान्।

एतावत् एव न प्रवृत्तम्। लक्ष्मीः स्वस्य जीवननिर्वहणार्थम् अभियोगं कृतवती शङ्करं विरुध्य। तस्याः कथनम् आसीत् यत् शङ्करेण सह तस्याः विवाहः अभवत्। इदानीं सः गृहं परित्यज्य अगच्छत्। अतः जीवननिर्वहणार्थं मया किमपि प्राप्तव्यम् एव।

शङ्करः न्यायालयस्य परतया आह्वानपत्रं प्राप्नोत्। तत्र लिखितम् आसीत् 'भवतः पत्न्याः जीवननिर्वहणार्थं किमर्थं न भवन्मासिकवेतनात् किञ्चित् धनं न्यायालयेन स्वीकरणीयम्?' इति। तत् पठित्वा अकस्मात् तस्य मुखात् हासः निर्गतः। आपणस्य स्वामी उन्मत्तम् इव हसन्तं तं दृष्ट्वा विस्मयेन अपृच्छत्- "शङ्कर! किं जातम्?" इति।

"मदीया पत्नी साधिकारं धनं प्राप्तुं न्यायालये अभियोगं कृतवती अस्ति। मया मासिकवेतनात् कश्चन अंशः तस्यै दातव्यः इति"।

शङ्करस्य आपणस्वामी जानाति स्म यत् लक्ष्म्याः पार्श्वे तावत् धनम् अस्ति येन सा शङ्करसदृशेभ्यः दशगणकेभ्यः वेतनं दातुम् अर्हति इति।

शङ्करस्य स्वामिनः नाम लालवंशीधरः। सः अपृच्छत्- "इदानीं किं करिष्यसि शङ्कर?" इति।

"किमपि न। अहम् एवं लिखित्वा दास्यामि यत् मम मासिकं वेतनं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

केवलानि पञ्चविंशतिः रूप्यकाणि सन्ति। तस्मात् न्यायालयः यावत् इच्छति तावत् न्यूनं करोतु नाम" इति उपायम् असूचयत् शङ्करः।

"कदाचित् वेतनस्य अर्धं भागं सः स्वीकरोति चेत् किं सार्धद्वादशरूप्यकैः तव जीवननिर्वहणं भवेत्?" इति पृष्टवान् वंशीधरः।

"प्रयत्नं करिष्यामि"।

"किन्तु त्वं वाग्व्यवहारं किमर्थं न करोषि? इच्छसि चेत् अहं तव साहाय्यं कर्तुं शक्नोमि। तस्मिन् दिने मङ्गलः आगतः आसीत्। तेन उक्तम् आसीत् यदि किमपि आवश्यकम् अस्ति तर्हि अहं शङ्करस्य साहाय्यं कर्तुं शक्नोमि" इति अवदत् वंशीधरः।

"अहम् अभियोगं न करिष्यामि। एतत् तु विदितम् एव दौर्भाग्येन अहम् एव प्रवृत्तानां घटनानां विषये दोषी अस्मि"।

शङ्करः तदेव कृतवान् यत् चिन्तितवान् आसीत्। अभियोगचर्चादिने शङ्करः 'अहं पञ्चविंशतिः रूप्यकाणि प्रतिमासं प्राप्नोमि। न्यायालयः इच्छति चेत् वेतनात् उचितं भागं स्वीकर्तुं शक्नुयात्' इति किञ्चन प्रार्थनापत्रं लिखित्वा न्यायालयाय दत्तवान्।

शङ्करः पुनः न्यायालयं न गतः। एकदा सः न्यायालयस्य परतया निर्णयपत्रं किञ्चन प्राप्नोत्। तत्र लिखितम् आसीत् 'सप्तरूप्यकाणि भवतः वेतनात् न्यूनीकृत्य लक्ष्म्यै दास्यते' इति।

३

शङ्करस्य जीवननिर्वाहः पञ्चविंशतिरूप्यकैः काठिन्येन प्रचलति स्म। इदानीं सप्तरूप्यकाणि इतोऽपि न्यूनानि जातानि। अष्टादशरूप्यकात्मकात् मासिकवेतनात् त्रीणि रूप्यकाणि भाटकप्रकोष्ठाय प्रतिमासं ददाति स्म। अवशिष्टेन धनेन भोजनं वस्त्रम् इत्यादयः अन्याः आवश्यकताः च पूरयितुं न शक्यन्ते स्म। सः घृतेन विना रोटिकां खादितुं प्रयत्तवान्। सूपः रोटिकाद्वयं च प्रातः सायङ्काले च रोटिकाद्वयम् एव सः खादति स्म। दुग्धं घृतम् इत्यादीनि खाद्यानि पूर्णतया निषिद्धवान्। द्वित्रमासेषु सकृत् शाकं खादति स्म। वस्त्राणि मलिनानि जीर्णानि नष्टानि वा स्युः नाम सः तानि समीकृत्य धृत्वा च कार्यं साधयति स्म। तस्य पार्श्वे नूतनवस्त्रस्य कृते धनं न आसीत्।

परिणामतः सः अस्वस्थः जातः। पूर्वं तस्य शरीरे कण्डूयनम् आरब्धम्। तस्य चिकित्सायै धनं न आसीत्। तस्मात् सर्वकारीयचिकित्सालयतः ओषधानि आनीतानि। ओषधसेवनेन कासः आरब्धः। कासकारणात् ज्वरग्रस्तः अभवत्। चिकित्सकैः तु 'क्षयरोगस्य लक्षणम् एतत्' इति उक्तम्।

Funding by IKS-MoE

एतस्यां परिस्थितौ अपि शङ्करः ज्वरग्रस्तः सन् कासं कुर्वन् आपणे कार्यं करोति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्म। स्वल्पभोजनकारणतः तस्य शरीरम् अत्यन्तं दुर्बलं जातम् आसीत्।

प्रातः उत्थाय स्नानं कृत्वा सः चिकित्सालयं प्राप्नोति स्म। ततः ओषधकूप्याम् ओषधं प्रपूर्य, आपणम् आगत्य आदिनं तत् पिबति स्म। एकदा सः कासते स्म तदा मङ्गलः गोधूमपूर्णैः वृषभशकटैः सह आपणम् आगतः। सः बहुमासानां पश्चात् नगरं प्रति आगतः अस्ति। यदा आपणस्य अग्रे शकटानि स्थितानि, मङ्गलः लालवंशीधराय जय श्रीराम इति वक्तुं सोपानानि आरुह्य उपाविशत् तदा तस्य दृष्टिः पार्श्वे उपविष्टे शङ्करे अपतत्। सः तावान् दुर्बलः जातः आसीत् यत् अभिज्ञातुम् अपि काठिन्यम् अनुभूयते स्म मङ्गलेन। तम् अभिज्ञाय निर्निमेषम् एव सः पश्यन् आसीत्। शङ्करः नेत्रे अधः कृत्वा लेखापुस्तिकायाम् एव किमपि लिखन् आसीत्।

अधीरः सन् मङ्गलः तम्- "भोः शङ्कर! किं जातम्? किमर्थं शरीरं निष्प्राणम् इव जातम्?" इति अपृच्छत्।

शङ्करः किमपि वक्तुम् ऐच्छत् किन्तु तस्य कासः आरब्धः। सः कोषात् मलिनं करवस्त्रं निष्कास्य मुखोपरि स्थापयित्वा कासं कर्तुम् आरब्धवान्। तस्मात् मङ्गलः इतोऽपि चिन्ताभावेन तम् अपश्यत्। मुखे कफः आगतः। शङ्करः कम्पमानाभ्यां पद्भ्याम् उत्थाय आपणात् बहिः निष्ठीवितुं गतः। निष्ठीवनेन किञ्चित् कफः तस्य कपोले लग्नः एव अभवत्। शङ्करः तं करवस्त्रेण अमार्जयत्। मार्जनकाले तस्य कफे रक्तम् अपि दृष्टं मङ्गलेन।

एतत् सर्वम् अवलोक्य शङ्करस्य समीपं गत्वा मङ्गलः- "शङ्कर, कदा आरभ्य रुग्णः असि?" इति अपृच्छत्।

"नैव, रुग्णः नास्मि" इत्युक्त्वा पुनः स्वस्थानं गन्तुम् उद्यतः अभवत्। किन्तु तदा तस्य शिरोभ्रमणम् इव जातम्। सः पतन् आसीत्। मङ्गलः तं हस्ताभ्यां गृहीतवान्। शङ्करः पतनात् तु रक्षितः किन्तु तस्य शरीरस्पर्शेन मङ्गलः अवागच्छत् यत् सः नितरां ज्वरपीडितः अस्ति इति।

मङ्गलः त्वरया गोधूमतोलनं कारयित्वा लेखापुस्तिकायां गणनां लेखयित्वा गृहं प्रति यदा प्रस्थितः तदा तेन आपणिकः उक्तः- "लालवर्य! शङ्करः रोगपीडितः अस्ति। अहम् एतं केषाञ्चित् दिनानां कृते ग्रामं प्रति नयामि। भवान् एतस्मै सप्ताहद्वयस्य विरामं ददातु कृपया" इति।

"अहं तु बहुदिनेभ्यः वदन् अस्मि यत् कानिचित् दिनानि विश्रामं करोतु इति। किन्तु एषः वदति अहं रुग्णः नास्मि। मङ्गल, एतं ग्रामं प्रति नयतु। यदा स्वस्थः भविष्यति तदा कार्यस्य आरम्भः भवतु" इति आपणिकः मङ्गलम् उक्तवान्।

शङ्करः अवदत्- "मङ्गलभ्रातः, अहं रुग्णः नास्मि। द्वित्रमासेभ्यः एवं कासः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भवति। ओषधीनाम् औष्ण्यकारणतः कण्ठतः रक्तं किञ्चित् निर्गच्छति। मां नीत्वा किं करिष्यति भवान्?" इति।

"न, शङ्कर! अहम् इदानीं शकटम् आनयामि। त्वया ग्रामं प्रति गन्तव्यम् एव" इति उक्त्वा मङ्गलः विपणितः शकटम् आनीय तत्र शङ्करम् उपवेश्य ग्रामम् अनयत्।

मङ्गलः तं मातुः गृहं नीतवान्। सोहनी यदा तं दृष्टवती तदा सा अवाङ्मुखी जाता। आश्रयबलात् सः शकटात् अवतारितः जातः। ततः गृहस्य अन्तः प्रवेशितः सः। सोहनी एतत् सर्वम् अवलोक्य प्रवृत्तं किञ्चित् अवगम्य धावित्वा अन्तः गतवती। तदनन्तरं कस्मिंश्चित् प्रकोष्ठे तस्य वासव्यवस्थां कल्पयित्वा शुश्रूषाम् आरब्धवती सा।

पूर्वं शङ्करेण स्वीक्रियमाणम् ओषधं स्थगितं जातम्। तस्मात् ज्वरः तु न्यूनः अभवत् किन्तु कासः प्रतिदिनं वर्धते स्म। कफेन सह रक्तम् अपि बहिः निर्गच्छत् आसीत्। ततः नगरात् कश्चन वैद्यः आगतः। सः तं परिशील्य 'एषः रोगः असाध्यः' इति अवदत्।

तथापि प्रयत्नः अनुवर्तमानः एव आसीत्। शङ्करः पश्यति स्म यत् सोहनीं प्रति यः दुर्व्यवहारः मया मत्पित्रा च आचरितः सा एव इदानीम् अहर्निशं मम सेवायां प्राणपणेन अपि तत्परा अस्ति। शङ्करस्य दौर्बल्यं प्रतिदिनं वर्धते स्म। तथापि तस्य मनःस्थितिः निर्मला आसीत्। सः स्वस्य पापानि अवगच्छति स्म।

अथैकदा तस्य अतिसारः अभवत्। एतस्मिन् काले सोहनी यत् तस्य मलमूत्रादिकं स्वच्छीकरोति तत् दृष्ट्वा सः नितरां विस्मितः जातः। एवं भासते स्म यथा सः स्तनन्धयः शिशुः अस्ति इति। शङ्करः तस्याः शुश्रूषां दृष्ट्वा तथा स्वेन कृतानि पापानि स्मृत्वा अवदत्- "सोहनि, एतत् सर्वं त्वं किमर्थं करोषि?" इति।

"अहं न करिष्यामि चेत् कः करिष्यति?"

"मरणासन्नस्थितौ एव मां त्यज। मम शुश्रूषाकरणेन किं प्रयोजनम्? मम द्वित्रदिनानां पश्चात् मरणं भविष्यति एव" इति शङ्करः अवदत्।

"वयं महिलाः एवं कर्तुं न शक्नुमः। सेवा अस्माकं धर्मः। अस्माकं नेत्रयोः पुरतः कोऽपि मरणासन्नः अस्ति तर्हि तं तथैव त्यक्तुं न शक्नुमः। एतत् अस्माकं कृते अस्वाभाविकम् अस्ति"।

"किन्तु, लक्ष्मीः अपि काचित् महिला एव। यावत् अहम् उद्योगं करोमि स्म तावत् मम वेतनात् प्रतिमासं सप्तरूप्यकाणि तस्यै दीयते स्म। इदानीं मयि उद्योगत्यागे कृते सा न्यायालये धनं प्राप्तुं प्रार्थनापत्रं लिखितवती अस्ति"।

"अहं चिन्तयामि यत् तस्याः शरीरं तु महिलायाः किन्तु हृदयं तु पाषाणम् इव अस्ति। तस्याः मनः पशुमनः इव अस्ति। आत्मा तु तस्यां नास्ति एव" इति सोहनी उक्तवती।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"एतत् तु सत्यम्। किन्तु तव अग्रजः मङ्गलः मम निमित्तम् एतावत् अधिकं धनव्ययं किमर्थं करोति?"

"धनं कस्यापि पैतृकं न भवति। एकदा देशे दुर्भिक्षं जातम् आसीत्। अग्रजः तावत्पर्यन्तं ग्रामवासिनः भोजितवान् यावत् तस्य पार्श्वे धनम् आसीत्। अन्ते यदा धनं समाप्तं तदा सः अफ्रीकादेशं गतः। तस्य धारणा आसीत् यदि आवश्यकतायाः अपेक्षया अधिकं धनं संगृह्यते तर्हि तत् पापम् इव भवति। यतः, अधिकं तत् धनम् अन्येषां भागरूपेण भवति। अतः आवश्यकतानुसारं तत् वितरणीयम् अन्येषां कृते"।

"किम्, एतत् मानवस्वभावात् विपरीतम् आचरणं नास्ति?" इति अपृच्छत् शङ्करः।

"दीपं भवान् जानाति खलु। अग्रजस्य पुत्रः अस्ति सः" इति वदन्ती स्मितं कुर्वती सोहनी अवदत्- "सः अद्यत्वे महाविद्यालये शिक्षणं प्राप्नोति। तस्य कथनम् अस्ति यत् केनचित् विदुषा एतत् प्रमाणीकृतम् अस्ति- 'मानवः पशोः सन्तानः अस्ति। तस्य स्वभावे पशूनां लक्षणानि दृश्यन्ते' इति। अत्र मदीयः विचारः एषः अस्ति यत् मानवेन जन्मसमयात् एव पशुस्वभावः प्राप्तः भवति। तस्मिन् मानवस्वभावः तु शिक्षया संस्कारेण अनुभवबलेन एव सम्भवति। धनस्य विषये अकारणं लोभप्रवृत्तिः पशुतायाः लक्षणं भवति। किन्तु एतस्य धनस्य अन्येषां निमित्तम् उपयोगकरणं मानवतायाः लक्षणं भवति" इति।

शङ्करः मनसि चिन्तयन् आसीत् यत् 'मत्पितुः एतेषां च मध्ये कियान् दृष्टिभेदः अस्ति। सः धनसंग्रहणार्थं धनं संगृह्णाति स्म। किन्तु मङ्गलः अन्येषां निमित्तं धनव्ययं कर्तुं तत् संगृह्णाति स्म। इत्थं दृष्टिभेदे सति उभयोः अपि व्यवहारः पृथक् एव आसीत्। स्वस्य दृष्टिकारणात् एव अहं खट्वायां शयनं कुर्वन् जीवनस्य अन्तिमानि दिनानि गणयामि। अपरत्र मङ्गलः तद्बालाः च आनन्देन क्रीडन्तः कूर्दन्तः जीवनयापनं कुर्वन्ति' इति।

सः बहु इच्छति स्म अहं स्वस्थः भूत्वा सोहन्या सह सुखेन अवशिष्टानि दिनानि यापयेयम् इति। किन्तु तस्य एषा इच्छा पूर्णा स्यात् उत न इत्यस्मिन् विषये तस्य सन्देहः आसीत्। अहं क्षयरोगपीडितः अस्मि इति सः सुष्ठु जानाति स्म। एतस्य रोगस्य परिणामम् अपि अवगच्छति स्म। यदा यदा शुश्रूषां कुर्वतीं सोहनीं सः पश्यति स्म तदा तदा तेन पश्चात्तापः अपि अनुभूयते स्म। किञ्चित् कालानन्तरं तस्य मुखात् मध्ये मध्ये एतत् वाक्यम् अपि निर्गच्छति स्म- "निर्वाणदीपे किमु तैलदानम्?"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

४

मानिन्याः व्यवहारः दिनानुदिनं विलक्षणः प्रतिभाति स्म। गृहे किञ्चन पूजागृहम् आसीत्। तत्र भगवतः विष्णोः प्रतिमा स्थापिता आसीत्। मानिन्याः मातापितरौ तत्र पूजां कुरुतः स्म। तयोः देवपूजनस्य पश्चात् मानिन्याः पूजाकालः प्रारम्भः भवति स्म। सा घण्टाधिकं यावत् उपविश्य रामुणा उक्तस्य मन्त्रस्य जपं करोति स्म। पूर्वं तु तस्याः पितरौ परिहासेन विषयस्य एतस्य व्याक्षेपणं कुरुतः स्म। किन्तु यदा मानिन्याः व्यवहारः नितरां विलक्षणः जातः तदा तौ चिन्ताकुलौ जातौ।

मानिन्याः व्यवहारः अर्चकवर्याय बृजलालाय बहु रोचते स्म। अस्मिन् गृहे सः 'ज्येष्ठपितृव्य' इति नाम्ना विख्यातः आसीत्। बालाः तु शिशुकालात् एव तेन सह क्रीडन्ति स्म। तस्मात् ते स्वस्य अन्तःस्थितान् विचारान् अपि तं वदन्ति स्म। अर्चकवर्यः अपि तैः उक्तं वचनं श्रुत्वा तेषां हितार्थम् एव सर्वदा चिन्तयति स्म।

मानिनी बहुधा स्वस्य अन्तरङ्गविचारान् अर्चकवर्यं वदति स्म। सामान्यं शिक्षणं प्राप्तवान् अर्चकवर्यः तस्याः सर्वं वचनम् आकर्ण्य कदाचित् उत्तरदाने असमर्थः अपि भवति स्म। अस्मिन् समये मानिनी चतुर्दशवर्षीया जाता आसीत्। यौवनस्य आरम्भकारणात् तस्याः मनः बहुभिः चिन्तनैः आन्दोलितं भवति स्म। बहूनां विचाराणां तु अर्थम् अपि सा न जानाति स्म। कदाचित् अर्चकवर्यं पृच्छति स्म। किन्तु उत्तरम् अजानतः तस्य मनसि द्वैधीभावः एव उत्पद्यते स्म।

एकदा मानिनी पूजां समाप्य ततः उत्थाय अन्यमनस्का इव व्यवहारं कृतवती। मन्दिरात् बहिः आगच्छन्तीं मानिनीम् अवलोक्य अर्चकवर्यः एवम् अनुभूतवान् यत् तस्याः नेत्रयोः अवर्णनीयः उन्मादः कान्तिः च दृश्येते स्म। यदा सा मातुः प्रकोष्ठं गच्छन्ती आसीत् तदा अर्चकवर्यः तां निर्निमेषम् अपश्यत्। मानिनी अङ्गणम् अतिक्रम्य मातुः प्रकोष्ठं प्रविशन्ती आसीत्। किन्तु अपरक्षणे तस्याः मनसि कश्चन विचारः आगतः। सा मुखं परिवर्त्य आह्वानम् अकरोत्- "ज्येष्ठपितृव्य"! इति।

अर्चकवर्यः तु ताम् एव पश्यन् आसीत्। सः अचिन्तयत् 'अद्य पुनः एतस्याः काचित् समस्या आपतिता' इति। आगतानां समास्यानां परिहाराय मम आह्वानं भवति इति जानाति स्म अर्चकवर्यः। अतः- "आं, पुत्रि!" इति अवदत्।

"अद्य अहं काञ्चित् विशिष्टां घटनाम् अपश्यम्" इति मानिनी तस्य समीपम् आगत्य उक्तवती।

"किम्?"

Funding by IKS-MoE

"भवान् अन्तः आगच्छति चेत् वदिष्यामि" इति स्मितं कुर्वती अवदत्- "अद्य

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अहं किञ्चन रहस्यमयं ज्ञानम् अवगतवती" इति।

अर्चकवर्यः बृजलालः तद् ज्ञातुम् उत्सुकः अभवत्। तथापि एवं प्रकारेण एकान्ते मानिन्या सह सम्भाषणं तस्मिन् संकोचं जनयति स्म। सः भीतः इव अभवत्। 'किञ्चित् तादृशं प्रश्नं न कुर्यात् एषा, यस्य उत्तरं मया न ज्ञायेत' इति तेन चिन्तितम्। तस्मात् सः अपृच्छत्- "तव माता गृहे नास्ति किम्?" इति।

"अस्ति! .... पिता अपि अस्ति। अहं तयोः समीपम् एव गच्छन्ती आसम्"।

"स्वस्य रहस्यमयस्य ज्ञानस्य बोधनार्थम् एव?"

एतच्छ्रुत्वा मानिनी गम्भीरं विचारं कृत्वा- "ताभ्यां सह एतादृशं सम्भाषणं लाभाय न भवति। भवन्तं कथयामि। यतः भवान् मदीयं वचनम् अवगन्तुं प्रयत्नं करोति। यदा सर्वं विषयं भवान् अवगच्छति तदा समस्यायाः परिहाराय प्रयत्नम् अपि करोति" इति अर्चकवर्यम् उक्तवती।

ततः मानिनी प्रकोष्ठं प्रविष्टा। तस्मिन् समये प्रातःकालिकम् अल्पाहारं कुरुतः स्म तदीयौ मातापितरौ। मानिन्याः पृष्ठतः आगतम् अर्चकवर्यं दृष्ट्वा मङ्गलः अवदत्- "आगच्छतु अर्चकवर्य! किम् अद्यापि एषा भवता सह वाग्युद्धं कर्तुम् इच्छति?" इति।

अर्चकः बृजलालः अहसत्। मङ्गलेन निर्दिष्टे आसने उपविशन् बृजलालः- "मङ्गल, एषा वाग्युद्धं न करोति। किन्तु कदाचित् तादृशं किमपि विषयं वदति यादृशः विषयः शास्त्रपारङ्गतानां विदुषां सभायाम् अपि चर्चितः न भवति। तस्मिन् दिने एषा उक्तवती आसीत् 'प्राणिषु त्रीणि तत्त्वानि भवन्ति। आत्मा शरीरं मनः च' इति। एतत् तु सत्यमेव खलु। अद्य एषा पुनः किञ्चित् विषयं वक्तुम् इच्छति" इति मङ्गलम् अवदत्।

"एतत् सर्वं कः शिक्षयति एताम्?" इति मोहिनी अपृच्छत्।

उत्तरं मानिनी प्रादात्- "रामुपितृव्यः मह्यं किञ्चन मन्त्रम् उपदिष्टवान् अस्ति। अहं तस्य जपं करोमि। तस्मात् मदीया कुण्डलिनी जागरिता जाता। परिणामः तु एषः जातः यत् यदा अहं ध्यानावस्थायां भवामि तदा अस्याः सृष्टेः परमाणवः पार्थक्येन नृत्यं कुर्वन्तः दृश्यन्ते। अहं तान् दृष्ट्वा ऊहां करोमि। वस्तुतः मम आयुः इदानीं न्यूनम् अस्ति। अल्पवयस्का बाला अहं कथं नैकविधानां विषयाणां विषये अवगमनं कर्तुं शक्नुयाम्? तदर्थम् एतस्मिन् ग्रामे एषः ज्येष्ठः पितृव्यः एव अस्ति यः मदीयां मनःस्थितिं समादधाति। अतः एव एतं पृच्छन्ती भवामि..........

"अद्य अहं किञ्चन विचित्रं दृश्यम् अपश्यम्। कालः साक्षात् मम पुरतः चलन् इव दृष्टः। एषः कश्चन नद्याः प्रवाहवेगः इव आसीत्। अहम् अन्ये प्राणिनः च तथैव नद्यां वहन्तः आस्म यथा कदाचित् नद्यां बालाः प्रवहन्तः भवन्ति। अहं तस्यां कालरूपिनद्यां वहन्ती इत्थम् अनुभवामि स्म 'नद्याः तटे नितरां सुन्दरं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मनमोहकं सुखदायकं विश्रामस्थलम् अस्ति। तत्र गन्तुं सर्वेषां मनः भवति। मम अपि अभवत्। किन्तु कालस्य प्रवाहवेगात् बहिः निर्गमनम् अतीव कठिनम् आसीत्। नटेश्वरः तटे स्थित्वा मां ततः बहिः आनेतुं तदीयौ हस्तौ अग्रे प्रसार्य प्रयत्नं कुर्वन् आसीत्। सः वदति स्म योगसिद्धिबलेन कालस्य गतिरोधः कर्तुं शक्यते। यः एवं कर्तुं समर्थः सः अजरः अमरः च भवति। कालस्य गतिप्रभावः पुनः तस्मिन् न भवति'....

"अहं नटेश्वरम् अपृच्छं किं भवान् कालस्य विकरालमुखात् रक्षितः जातः? इति। सः अवदत्- 'आम्! किञ्चित् स्तरपर्यन्तम्' इति। पुनः सः अवदत् यदि अहं तस्य पाणिग्रहणं करोमि तर्हि माम् अपि सः ततः बहिः आनेष्यति। तदनन्तरं सहस्रं वर्षाणि यावत् अस्याम् एव बाल्यावस्थायां जीविता सती अस्मिन् लोके विचरणं कर्तुं शक्नोमि....

"अहं ज्येष्ठपितृव्यं प्रष्टुम् इच्छामि यत् किं मया दृष्टस्य स्वप्नस्य विषयः यथार्थः उत न?"

अर्चकः बृजलालः गम्भीरभावं धारयन्- "तव वचनं तु सत्यम् अस्ति। कालः कश्चन द्रवविशेषः। एतस्य विस्तारः दैर्घ्यं गाम्भीर्यं च भवति। एतस्य वेगपरिधौ आगतः जनः जन्ममरणयोः भवबन्धने, बाल्यस्य यौवनस्य वृद्धावस्थायाः च नैकविधेषु भोगेषु च आसक्तः भवति। तस्मात् बहिः आगमनस्य उपायं मदीयं शास्त्रं न वदति। अथवा, एवं वक्तुं शक्यते यत् मयि तादृशम् अवगमनसामर्थ्यं नास्ति। नटेश्वरे तत् सामर्थ्यम् अस्ति उत न इति अहं न जानामि" इति अवदत्।

"अहं नटेश्वरस्य हस्ते स्वहस्तं स्थापयितुं प्रयत्नम् अकरवम्। किन्तु कालरूपिनद्याः वेगकारणतः मदीयं हस्तं ग्रहीतुम् अशक्तः जातः सः। तथापि सः मां बहिः आनयनस्य प्रयत्नं कुर्वन् तटमार्गेण चलन् आसीत्" इति स्वानुभवं उक्तवती मानिनी।

"कुत्र अस्ति सः?" इति अर्चकवर्यः अपृच्छत्।

"भवान् तं द्रष्टुं न शक्नोति। किन्तु अहं यदा नेत्रे निमीलयामि तदा हस्तं प्रसारयन् सः मां बहिः आनेतुं प्रयत्नरतः दृश्यते"।

"मानिनि! ......" इति उच्चैः तर्जयन्ती मोहिनी अवदत्- "त्वं स्वप्नवचनं वदन्ती असि? किमर्थं दृष्टस्य स्वप्नस्य विषये तावती अधिका चिन्ता?" इति।

"स्वप्नः नास्ति अम्ब! अहं जपं कुर्वती आसम्। तस्मिन् समये एव एतत् दृश्यं मम पुरतः आगतम्। अहम् एकं विषयम् इतोऽपि वक्तुम् इच्छामि। आवयोः ज्येष्ठता कनिष्ठता च सार्धैकवर्षस्य एव अस्ति" इति।

"सः त्वत्तः ज्येष्ठः उत कनिष्ठः?" इति मोहिनी मानिनीम् अपृच्छत्।

"अहं यस्यां दिशि प्रवहन्ती गच्छामि स्म तस्यां दिशि एव सः गच्छति स्म।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सः नद्याः उभयोः पार्श्वे गच्छन् भवति स्म। नद्याः प्रवाहवेगः तं प्रवाहयितुं न शक्नोति स्म। कदाचित् एवं भाति स्म सः तटे एव स्थितः अस्ति। कदाचित् एवं प्रतीयते स्म यत् सः नदीपारं गच्छन् अस्ति। तथापि सः नद्याः वेगेन न प्रवहति स्म। सः स्वस्य हस्तावलम्बनं कृत्वा मध्यभागस्य अन्तरं समापयितुम् ऐच्छत्। किन्तु तत् अन्तरं न समाप्तं जातम्"।

मङ्गलः तु अल्पाहारं कुर्वन् सर्वेषां वचनं शृणोति स्म। ततः सः अवदत्- "मानिनि! यदि एवं चिन्तयिष्यसि तर्हि उन्मत्ता भविष्यसि। ततः त्वम् उन्मत्तालयं प्रति प्रेषणीयं भवेः। वद .... शिक्षकवर्यः पाठयितुम् आगच्छति न वा?" इति।

"पितः, आगच्छति सः। किन्तु सः एव तस्मिन् दिने वदति स्म यत् कालः दिक् इति उभौ अपि द्रव्यवाचकौ स्तः। कालस्य गाम्भीर्यं ज्ञातवान् मानवः सृष्टिविषयकं सर्वं रहस्यमयं ज्ञातुं शक्नोति। सामान्यः मानवः तु एतत् कर्तुं न शक्नोति। कालस्य वैशाल्यम् अवगतवान् मानवः तस्य गतेः विनाशकारिप्रभावात् आत्मानं रक्षितुं शक्नोति.........

"शिक्षकवर्यस्य कथनानुसारं यदा अहं जपं करोमि तदा मदीया कुण्डलिनी जागरिता भवति। तदनन्तरं कालस्य गाम्भीर्यं ज्ञातुम् अपेक्षितां शक्तिं प्राप्नोमि। इदानीं कालस्य वैशाल्यं ज्ञातुम् अपेक्षिता शक्तिः मयि नास्ति। शिक्षकवर्यः वदति एषा शक्तिः योगाभ्यासबलेन आगच्छेत्। तत्पश्चात् अहम् एतस्मिन् वयसि एव सर्वदा भविष्यामि" इति मानिनी उक्तवती।

"आम्!" इति अर्चकः बृजलालः अवदत्- "तावत् कालम् एषा चतुर्दशवर्षीया अविवाहिता एव भविष्यति" इति।

तत् श्रुत्वा मङ्गलः मोहिनी च अहसताम्। मानिन्याः चिन्तनानुसारं तु हासस्य अत्र किमपि कारणं न आसीत्। तस्मात् तस्याः मुखम् लज्जया आरक्तं जातम्। अर्चकः बृजलालः तस्याः मनःस्थितिम् अवगत्य अवदत्- "मङ्गल! अत्र हासस्य किमपि कारणं नास्ति। विस्मयस्य विषयः तु निश्चयेन अस्ति। एतस्मिन् लघुनि वयसि एतस्याः बुद्धिबन्धनम् उन्मुक्तं जातम् अस्ति। शास्त्राणां गूढं रहस्यम् अवगच्छन्ती अस्ति। शास्त्राणि पठन्तः वयं वयोवृद्धाः अभवाम। किन्तु मानिन्या उक्तं वचनम् अवगन्तुं न शक्नुमः" इति।

"किं जपं करोषि मानिनि?" इति मोहिनी अपृच्छत्।

"मन्त्रः तु सरलः। किन्तु तस्य विधिविशेषकारणात् तस्य जपकरणं नितरां कठिनम् अस्ति। रामुपितृव्यस्य कथनम् अस्ति यत् जपसमये स्वकीयं ध्यानं ब्रह्मरन्ध्रं प्रति नेतव्यम्" इति मानिनी उक्तवती।

ततः मङ्गलः- "इदानीं मया अवगतम् यत् किमर्थं जगदीशचन्द्रः स्वयम् इव

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वाम् उन्मत्तां कर्तुं संस्कृतं पाठयितुं वदति स्म। यथा रामुः उन्मत्तः इव तम् अनुसरन् अकर्मण्यः जातः तथा एव तव स्थितिः शोचनीया भवेत्। तव संस्कृतशिक्षणं समापनीयम् इति अहं चिन्तयामि। किन्तु यदा तव नेत्रयोः अश्रूणि पश्यामि तदा मदीयं मनः खिन्नं भवति" इति मानिनीम् अवदत्।

अधुना तु सत्यम् एव तस्याः नेत्रे सजले जाते। अर्चकवर्यः सर्वदा इव मानिन्याः साहाय्यं कर्तुम् अभिलषन्- "मङ्गलभ्रातः, स्वस्य अज्ञानतायाः कारणेन ज्ञानस्य निन्दनं मा करोतु। एतत् पापम् अस्ति। भवतः पुत्र्यां मोहः स्वार्थवशात् अस्ति। तस्मात् एव कारणात् सः मोहः एतस्याः उन्नतौ सहायकः नास्ति, अपि तु बाधकः जातः अस्ति" इति मङ्गलम् उक्तवान्।

मोहिनी अवगन्तुं न शक्तवती यत् मानिन्याः क्रियाकलापस्य सा निन्दां कुर्यात् उत प्रशंसां कुर्यात्। सा एतादृशे निर्णयकाले आत्मानं योग्यां न परिगणयति स्म। तस्याः चिन्ता तु अस्मिन् विषये आसीत् यत् कदाचित् मानिनी जगदीशचन्द्रेण सह विवाहं कर्तुं हठं न कुर्यात्। एषः विवाहः कथं भवितुं शक्यते? उभयोः वयसि बहुभेदः अस्ति।

चर्च्यमानं विषयम् अपसारयितुं मोहिनी-"गच्छ मानिनि! अल्पाहारं कुरु। क्षणानन्तरं शिक्षकवर्यः पाठयितुम् आगमिष्यति" इति तां ततः बहिः प्रेषितवती।

मानिन्याः गमनस्य पश्चात् मोहिनी पत्युः अभिमुखं पश्यन्ती- "मानिन्याः विवाहस्य प्रबन्धनं चिन्तनीयम् अस्माभिः। विलम्बः क्रियते चेत् कार्यं नश्येत्" इति अवदत्।

"बृजलालः अपृच्छत्- "किं नाशम् अभ्येति?" इति।

"एतस्याः आकर्षणं जगदीशं प्रति वर्धमानं अस्ति। आसक्तिः तीव्रा भवति चेत् दुःखक्लेशाभ्यां ऋते अन्यत् किमपि अवशिष्टं न भवेत्"।

मङ्गलः मनसि अचिन्तयत् 'अहम् अर्चकस्य पक्षम् आश्रयेयम्' इति। अतः मोहिन्याः कथनस्य उत्तरदानावसरे सः मौनम् अवालम्बत। तदा अर्चकवर्यः अवदत्- "भ्रातृजाये! जीवनस्य उद्देशः विवाहः उत जीवने सुखशान्तेः प्राप्तिः? विवाहः तु सुखस्य शान्तेः च साधनम् अस्ति। तस्मात् मदीयः विचारः अस्ति यत् विवाहार्थं शीघ्रता न करणीया। मानिन्याः चिन्तनं परिपक्वं भवतु। यदि तस्याः मनः जगदीशेन सह विवाहं कर्तुं भवति तर्हि भवत्याः का आपत्तिः? वयोभेदम् अहम् अपि पश्यामि। किन्तु मम विश्वासः अस्ति अस्माकम् अपेक्षया अपि अधिकम् एषा वयसः अन्तरं पश्येत्। तस्यां दृष्टियोग्यता प्रादुर्भवेत् एव। उद्वेगवशात् सम्भाषणेन हानिः एव भवेत्" इति।

मङ्गलः अवदत्- "मम चिन्तनानुसारं तु अध्ययनं मन्त्रस्य जपकरणम् इति उभयम् अपि ताम् उन्मत्तां करिष्यति। मस्तिष्कं नष्टं चेत् पुनः जीवनपर्यन्तं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्लेशः एव" इति।

"एतं क्लेशं भवान् दूरीकर्तुं न शक्नोति मङ्गल। अहम् अपि तं मन्त्रं जानामि। जपं करोमि च। अहम् अपि मदीयं ध्यानं ब्रह्मरन्ध्रे स्थापयितुं प्रयत्नं करोमि। किन्तु मदीया कुण्डलिनी जागरिता न जाता। तस्मात् वदन् अस्मि यत् तस्याः पूर्वजन्मनां कर्मफलम् अस्मिन् जन्मनि प्रकटयत् अस्ति। एतम् अवरोद्धुं न शक्नोति भवान्। एतत् उन्मत्तानां कार्यम् इति कदाचित् वयम् अनुभवेम चेत् अपि वस्तुतः एतत् सर्वं किम् इति वक्तुं न शक्यते। अहं एतत् कार्यम् उन्मादमयम् अस्ति उत न इति न वदामि। तस्याः स्मरणशक्तिः विषयप्रतिपादनसामर्थ्यं हानिलाभौ विचारयितुम् तस्याम् अपेक्षिता शक्तिः इति सर्वं प्रंशसनीयम् अस्ति" इति उक्तवान् अर्चकवर्यः।

"अत्र कश्चन विषयः अस्ति। अहं चिन्तयामि यत् तया क्रियमाणं सम्भाषणम् अन्येभ्यः साधारणजनेभ्यः भिन्नम् अस्ति। अतः सामान्यानां जनानां कृते रुचिकरः विषयः एषः नास्ति" इति मोहिनी अवदत्।

बृजलालः स्मितं कुर्वन् - "भ्रातृजायायाः कथनं विचित्रम् अस्ति। जनानाम् अवगमनं भवतु उत न, तेन बालानां जीवनं कटुमयं कर्तुं कः अधिकारः अस्माकम्?" इति अवदत्।

"तर्हि भवान् किम् इच्छति अर्चकवर्य?" इति मङ्गलः विषयम् अमुं समापयितुम् अपृच्छत्।

"अहं तु वदामि यत् भवतः पुत्री विशेषप्रतिभावती अत्यन्तं पुण्यकर्मणः अंशभागिनी अस्ति। तस्याः जीवनं भवतः त्वराकारणात् न नाशनीयम्। तस्याः मनः इतोऽपि अधिकं विकसेत्। तदनन्तरं द्रक्ष्यामः यत् किम् उचितम् अनुचितं च करणीयम्"।

एषः विषयः अत्रैव समाप्तः।

५

भारतवर्षे रामुजगदीशचन्द्रयोः भ्रमणं निर्विघ्नं घटनारहितं च जातम्। मुम्बयीनगरं यदा तौ गतवन्तौ तदा पूर्वपरिचिताः दश द्वादश वा जनाः ताभ्यां सह मेलितवन्तः। तेषां सहयोगेन अनायासेन तौ पर्याप्तं धनं संगृहीतवन्तौ। तदनन्तरं तौ यूरोप अमेरिका इत्यादिषु देशेषु भ्रमणार्थं प्रस्थितवन्तौ। विदेशेषु प्रवासाय अनुज्ञापत्रस्य प्राप्तिकाले किञ्चित् काठिन्यम् अनुभूतवन्तौ तौ, किन्तु वित्तकोषे पर्याप्तं धनम् अस्ति, इत्यतः ताभ्याम् अनुज्ञापत्रं प्राप्तम् एव।

यावत् एतयोः समीपं धनम् आसीत् तावत् भ्रमणं कृतवन्तौ। इटली, स्विटजरलैण्ड, अस्ट्रिया, रूस, स्वीडन, नार्वे इंग्लैण्ड इत्यादिषु देशेषु परिचयकाले तौ 'प्रवासकर्तारौ

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आवाम्' इति उक्तवन्तौ। क्लेशः तु जर्मनीदेशे सञ्जातः। तस्य देशस्य राजदूतः कश्चन सामान्यः बुद्धिमान् जनः आसीत्। स्वस्य अनुज्ञापत्रं दूतावासे प्रदर्श्य राजदूतेन ड्रेककिपनसेन सह मेलनं कर्तुं तौ यदा इच्छां प्रकटितवन्तौ तदा तत्रत्यैः पृष्टम्- "भवान् कस्य पुत्रः?" इति

"कयोश्चित् सामान्ययोः मातापित्रोः। यौ कदाचित् सर्वेषां कृते अपरिचितौ स्तः" इति उत्तरं प्रादात् जगदीशः।

"भवान् किं कार्यं करोति? स्वस्मिन् देशे धनिकः, भूस्वामी, राजा उत वाणिज्यकर्ता भवान्?"

"आवां विज्ञानिनौ। मानवविज्ञानस्य छात्रौ स्वः"।

"भ्रमणार्थं कुतः तावत् धनं प्राप्तम्?"

"आवां स्वीयया विद्यया प्राप्तवन्तौ"।

स्वशिरः कम्पमानः प्रश्नकर्ता अवदत्- "तेन सह मेलनस्य अवसरः न प्राप्यते इति भाति मम" इति।

"अहं विश्वसिमि यत् निश्चयेन सः आवाभ्यां मेलिष्यति" इति जगदीशचन्द्रः अवदत्।

"अस्तु, भवन्तौ इदानीं स्वस्य आवासं प्रति गन्तुं शक्नुतः"।

"एषः मम आवासस्थलस्य सङ्केतः अस्ति" इति उक्त्वा जगदीशचन्द्रः स्वस्य परिचयपत्रं तस्य प्रश्नकर्तुः पुरतः स्थापितवान्। ततः दूतावासात् बहिः गत्वा पुनः प्रत्यागत्य तं कर्मचारिणम् अपृच्छत्- "क्षम्यतां, किम् अहं भवतः नाम ज्ञातुं शक्नोमि?"

"न आवश्यकं मदीयं नाम ज्ञातुम्" इति उत्तरं प्रादात् सः।

जगदीशः स्मितम् अकरोत्। दूतावासात् बहिः आगतः सः। बहिः आगतं तं रामुः अवदत्- "गुरुदेव, एषः जनः अतीव मूर्खः असभ्यः च प्रतिभाति" इति।

"तेन किम्? आवाभ्यां तु स्वस्य कार्यं क्रियमाणम् अस्ति। यावत् स्वस्मिन् कार्यसाधने विघ्नः न आपतेत् तावत् अन्यत्र अवधानं न करणीयम् आवाभ्याम्" इति जगदीशः उदतरत्।

"नैव गुरुदेव! किमपि तु करणीयम् एव। असभ्यजनानां कृते कदाचित् सभ्यतायाः पाठः पाठनीयः एव"।

"प्रकृतिः स्वयमेव एतं सुमार्गं दर्शयिष्यति"।

"गुरुदेव, किमपि तु करणीयम् एव। यदा आरभ्य यूरोपे आवां पादौ स्थापितवन्तौ तदा आरभ्य आवां केवलं भोजनं भ्रमणम् एव कुर्वः। किमपि तादृशं कार्यं निश्चयेन करणीयं येन अत्रत्यानां शून्यमस्तिष्कानाम् आघातः भवेत्"।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"अस्तु रामो! एषः विज्ञानप्रधानः देशः। विज्ञानविषये अत्रत्यानां जनानां ज्ञानम् अपूर्णम् इति बोधयितुम् आवां प्रयत्नं करिष्यावः"।

एषा वार्ता समाप्ता अभवत्। तथापि दूतावासे कर्मचारिणा कृतः शुष्कः व्यवहारः रामोः मनसि खेदं जनयति स्म। बर्लिननामकं आवासगृहं प्राप्य उन्नयिन्या पञ्चमे अट्टे भाटकप्रकोष्ठं गन्तुं तौ उद्युक्तौ आस्ताम्। तावता एव कश्चित् वितारकः रजतस्थाल्यां किञ्चन पत्रं संस्थाप्य आनीतवान्। जगदीशः तत् पत्रं पठित्वा रामवे प्रादात्। ततः वितारकाय धन्यवादम् उक्त्वा उन्नयिनीचालकम् उन्नयिनीम् उपरि नेतुम् अकथयत्।

रामुः तत् पत्रम् अपठत्। तत्र लिखितम् आसीत्- "हिस् एक्सलेन्सी ड्रेककिपनिसः आंग्लराजदूतः, श्रीमद्भ्यां जगदीशचन्द्ररामदासाभ्यां सह सायङ्काले चतुर्वादने चायं पीत्वा आनन्दम् अनुभविष्यति" इति। एषः सन्देशः दूरभाषद्वारा अपि प्रेषितः आसीत्।

स्वस्य प्रकोष्ठं प्राप्य रामुः स्मितम् अकरोत्। तदा जगदीशचन्द्रः- "यूरोपे अहम् अज्ञातरूपेण भ्रमणं कर्तुम् इच्छामि स्म, किन्तु इदानीं किमपि गोपयितुं न शक्यते" इति अवदत्।

"एतत् कथं सञ्जातं गुरुदेव?"

"सायङ्काले यदा आवां तत्र प्राप्स्यावः तदा स्वयं सः वदेत्" इति अवदत् जगदीशचन्द्रः। त्रिवादनं सञ्जातम्। तस्मात् उभौ अपि सम्यक् वस्त्रं परिधाय आंग्लदूतावासं प्रति प्रस्थितौ।

दूतावासस्य द्वारे सः एव कर्मचारी तयोः प्रतीक्षां करोति स्म यः ऐदम्प्राथम्येन प्रश्नान् पृष्टवान् आसीत्। यदा तौ टैक्सीयानेन अवतीर्णौ तदा सः विनयेन हस्तमेलनं कृत्वा अवदत्- "हिस् एक्सलेन्सी भवतोः प्रतीक्षां करोति। आगच्छताम्!"

"आवां समयेन प्राप्तवन्तौ इति चिन्तयामः"।

अविलम्बेन तौ अन्तः प्रवेशितौ। तत्र वृषभः इव स्थूलकायः जनः उत्थाय हस्तेन संस्पृश्य- "मिस्टर जगदीश, ऐन्द्रजालिक, भवता सह मिलित्वा नितरां प्रसीदामि" इति अवदत्।

यदा ते उपविष्टवन्तः तदा पार्श्वे एव विद्यमाने आसन्दे उपविष्टायाः दुर्बलायाः कस्याश्चित् महिलायाः परिचयं कारयन् राजदूतः अवदत्- "एषा मदीया पत्नी मिसेस् किपनिस" इति। जगदीशः किञ्चित् अवनम्य हस्तौ संयोज्य नमस्कारम् अकरोत्। तत्पश्चात् रामोः परिचयः संजातः। मिस्टरड्रेकः स्वस्य कथनम् प्रारब्धवान्- "अहं दशभ्यः एकादशवर्षेभ्यः वा पूर्वं कस्याञ्चित् पत्रिकायां भवतः इन्द्रजालविषये पठितवान्। तदा आरभ्य अहं मुम्बयीनगरस्थाय मित्राय असकृत् भवतः विषये पत्रं लिखितवान् अस्मि।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ततः एका एव सूचना वारं वारं प्राप्ता यत् भवान् कुत्रापि तिरोहितः जातः अस्ति। तदनन्तरं ततः एव सूचना प्राप्ता यत् भवान् मुम्बयीनगरं प्रति आगतः अस्ति। तत्र इन्द्रजालस्य चमत्कारं प्रदर्श्य जनान् विस्मयाकुलान् कुर्वन् अस्ति। सः एतत् अपि असूचयत् यत् भवान् भ्रमणार्थं यूरोपम् आगच्छन् अस्ति इति। तदा आरभ्य एव अहं विभिन्नेभ्यः स्थानेभ्यः भवतः विषये वार्ताः ज्ञातुं प्रयत्नं कुर्वन् अस्मि। अहम् आदौ भवतः विषये वार्ताः अप्राप्य नैराश्यम् अनुभवामि स्म। किन्तु अद्य भवतः परिचयपत्रं प्राप्य भवता मेलितुं व्याकुलः अभवम्। तदनन्तरं भवतः आवासस्थाने दूरभाषद्वारा सन्देशं प्रेषितवान्" इति।

तदनन्तरं श्रीमती किपनिस उक्तवती- "अस्माकं मित्रं मुम्बयीनगरात् यत्किमपि भवतः विषये अलिखत्, तत्सर्वम् अविश्वसनीयं भाति। वयं यं कमपि एतस्य विषये वदामः स्म, ते सर्वे सन्देहेन शिरश्चालनम् अकुर्वन्" इति।

"इन्द्रजालविद्यायाः प्रदर्शनं कर्तुं मदीया इच्छा न आसीत्। किन्तु भवतः मुम्बयीनगरस्थस्य मित्रस्य वचनं पुरस्कुर्वन् तथा च भवत्पत्न्याः संशयप्रवृत्तिमतां मित्राणां भ्रमनिवारणार्थम् अहं किमपि दर्शयितुं बाध्यः संजातः अस्मि। यदि भवदीया स्वीकृतिः स्यात् तर्हि सर्वाणि मित्राणि आहूयन्ताम्। अहं भवतः सेवायै आगमिष्यामि" इति उक्तवान् जगदीशचन्द्रः।

"धन्यवादाः"! इति श्रीमती किपनिस मुखं वर्तुलाकारं कुर्वती कृतज्ञताभावेन उक्तवती।

ततः चायस्य परिवेषणम् अभवत्। सः एव जनः यः अशिष्टं व्यवहारं कृतवान् आसीत् चायं निर्मितवान्। रामुः जगदीशः च चायं पिबन्तौ ताभ्यां सह सम्भाषणं कुरुतः स्म। मिस्टरकिपनिसः जगदीशचन्द्रेण सह तथा श्रीमती किपनिस रामुणा सह सम्भाषणरतौ आस्ताम्। श्रीमती किपनिस रामुम्- "भवान् अपि किमपि कर्तुं शक्नोति किम्?" इति अपृच्छत्।

"यदि भवती अनुमतिं ददाति तर्हि इदानीम् एव किमपि दर्शयितुं शक्नोमि" इति प्रत्यवदत् रामुः।

"आम्! आम्!! अवश्यं प्रदर्श्यताम्। तेन मम सन्तोषः भवेत्"।

ततः रामुः स्वस्मात् कोषात् किञ्चन करवस्त्रं निष्कास्य- "किं भवती वक्तुं शक्नोति यत् एतस्मात् करवस्त्रात् कीदृशः गन्धः निस्सरति?" इति अपृच्छत्।

श्रीमती किपनिस करवस्त्रम् आघ्राय उक्तवती- "वाह! एतस्मिन् तु मदीयं प्रियं सुगन्धद्रव्यं लग्नम् अस्ति। अस्मिन् देशे 'पैरिसब्यूटी' नाम्ना एतत् प्रसिद्धम् अस्ति। एतस्याः लघुकूपी पञ्चपौण्डमूल्यात्मिका भवति" इति।

Funding by IKS-MoE

"भवती कदाचित् दोषं तु न करोति?"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीमती किपनिस पुनः आघ्राय अकथयत्- "तदेव सुगन्धद्रव्यम् अस्ति इति मम विश्वासः अस्ति" इति।

"तर्हि हिस् एक्सलेन्सी अपि एतत् आघ्राय स्वस्य अभिप्रायं वदेत् इति मदीयः विचारः अस्ति" इति रामुः अवदत्।

श्रीमती किपनिस पत्युः अवधानं स्वाभिमुखं कुर्वती- "पश्यतु किञ्चित्, एतस्मांत् कीदृशः सुगन्धः निस्सरन् अस्ति?" इति अपृच्छत्।

सः नासिकायाः समीपं करवस्त्रं नीतवान्। अनुक्षणं नासिकां वक्रीकृत्य- "श्रीमन्! एतस्मात् तु दुर्गन्धः आगच्छति" इति अवदत्।

तदा हसन् जगदीशचन्द्रः- "श्रीमन्, गन्धस्य अभिज्ञानं कश्चन अनभिज्ञः कर्तुं न शक्नोति" इति अवदत्।

श्रीमती किपनिस असकृत् तं गन्धम् आघ्रातवती। तस्य गन्धेन प्रसन्ना सती रामुम् अपृच्छत्- "एतत् कथं प्रवृत्तम्?" इति।

"एषा एव भ्रान्तिः कथ्यते। अस्मिन् विश्वे यत् किमपि पश्यामः, शृणुमः, आस्वादनं कुर्मः, जिघ्रामः स्पृशामः वा, तत् सर्वं भ्रान्तिमयं भवति। तस्मात् एव करवस्त्रस्य जिघ्रणम् अपि भ्रान्तिमयम् एव। स्वस्य मनः स्थितेः अनुसारेण एव इन्द्रियाणि कार्याणि कुर्वन्ति। भवत्याः मनसि सम्मोहिन्याः प्रभावः दृश्यमानः अस्ति। वयम् एतस्याः प्रभावेण यत् इच्छामः तदनुसारम् एव जनाः पश्यन्ति, शृण्वन्ति जिघ्रन्ति च"।

"एतदेव तु ज्ञातव्यम् अस्ति यत् कथं भवान् अस्माकं मनसि स्वस्य सम्मोहनस्य प्रभावं जनयितुं समर्थः अभवत्"।

"वस्तुतः प्रत्येकस्मिन् मानवे एषा सम्मोहिनी शक्तिः न्यूनाधिक्येन विद्यमाना भवति एव। ये जनसम्पर्कं कुर्वन्ति तादृशेषु वक्तारः नेतारः वणिजः अभिकर्तारः इत्यादिषु सर्वेषु एव स्वल्पप्रमाणेन एषा शक्तिः विद्यमाना भवति।

तेषां यावान् प्रभावः अपरेषां मनस्सु भवति तदनुकूलाः एव जनाः वक्तृणां नेतृणाम् अधिकारिणाम् अभिकर्तृणां प्रभावपरिधिम् आगच्छन्ति .....

"एतस्याः विद्यमानायाः शक्तेः उत्तरोत्तरं विकासः कर्तुं शक्यते। सा शक्तिः तावतीं वृद्धिं प्राप्नुयात् यथा इतरे जनाः चमत्कृताः भवेयुः। नैपोलियन, सिकन्दर, सीजर इत्यादयः योधाः तथा बुद्धः ईसामसीहः मुहम्मदः इत्यादयः धर्मगुरवः एतस्याः एव शक्तेः बलेन हिंसाम् अहिंसां वा कर्तुं जनान् उद्यतान् कृतवन्तः। अहम् अपि ताम् एव शक्तिं विकसितां कृत्वा दर्शयन् अस्मि"।

"बहु उत्तमम्! बहु उत्तमम्!" इति मिस्टर किपनिसः वदन्- "आई फॉलो यू परफैक्टली" इति अवदत्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुरतः मधुरैः पूर्णा स्थालिका स्थापिता आसीत्। यदा सा रिक्ता सञ्जाता तदा जगदीशचन्द्रः- "युंवर एक्सलेन्सी, पश्यतु, एषा स्थालिका अस्ति खलु?" इति अवदत्।

"आम्" इति किपनिसः अकथयत्।

"अत्र पश्यतु" इति जगदीशः काञ्चित् छुरिकां स्थालिकायां स्थापयन् अवदत्।

मिस्टर किपनिसः, श्रीमती किपनिस, मिस्टर जॉन, वितारकाः अन्ये सर्वे अपि पश्यन्तः आसन्। जगदीशः छुरिकां स्व्यकरोत्। अनुक्षणम् एव षट्इंचपरिमितस्य धूमस्य स्तम्भः निर्मितः अभवत्। जगदीशः छुरिकां स्थालिकायाम् अभ्रामयत्। ततः धूमस्तम्भः अपि परिभ्रमणम् अकरोत्। किञ्चित् कालानन्तरं सः धूमस्तम्भः नर्तकीरूपेण परिवृत्तः अभवत्। सर्वे एव नेत्रे विशालीकृत्य तां षट्इंचपरिमिताम् उन्नतां महिलाम् अपश्यन्। जगदीशः अवदत्- "युवर एक्सलेन्सी, एषा मुम्बयीनगरस्था प्रसिद्धा नर्तकी अमीरबायी अस्ति। एषा इदानीं भवतां पुरतः नृत्यं दर्शयिष्यति" इति। ततः अनुक्षणम् एव अदृश्यः ध्वनिः श्रुतः- 'धिक् धिक् धा, तिट् तिट् तिरकिट ता' इति। सा नर्तकी सविलासं चलति स्म। ततः 'छन छन छननन, छन छन' इति ध्वनिं जनयन्ती नृत्यम् अकरोत् सा।

तदनन्तरं सा अतीव मधुरस्वरेण शरीरानुगुणं गीतम् अगायत्। अस्मिन् समये एव अदृश्यशक्तिबलेन तम्बूरवाद्यस्य ऊर्ध्वकस्य च मनोरमः ध्वनिः अपि तत्रत्यैः प्रेक्षकैः श्रुतः।

चायसमाप्तिपर्यन्तम् एवमेव आह्लादकारिणी क्रीडा प्रचलन्ती आसीत्। चायं पीत्वा यदा सर्वे उत्थिताः तदा श्रीमती किपनिस रामुं पार्थक्येन अपृच्छत्- "भवान् कदा प्रभृति गुरोः सकाशात् एतादृशीं विद्यां शिक्षयन् अस्ति?" इति।

"चतुर्दशवर्षेभ्यः"।

"अन्येषाम् उपरि यः प्रभावः जन्यते भवता, सः कियत्कालं यावत् स्थिरः भवति?"

"वर्षाधिकं यावत्। कदाचित् जीवनपर्यन्तम् अपि एषः प्रभावः स्थिरीकर्तुं शक्यते"।

"किं भवान् कस्यचित् जनस्य प्रीतिभावम् अन्यस्मिन् जनयितुं शक्नोति?" इति अपृच्छत् सा।

"एतत् तु अत्यन्तं सहजं कार्यम् अस्ति"।

एतत् श्रुत्वा श्रीमती किपनिस गम्भीरं विचारं कुर्वती रामुं निर्निमेषनेत्राभ्याम् अपश्यत्। पश्चात् सचेतनतां प्राप्तवती सा- "अहं भवता सह कदापि पुनः मेलिष्यामि। भवान् कदापर्यन्तं बर्लिननगरे स्थास्यति?" इति अपृच्छत्।

"मासं यावत् आवयोः अत्र प्रवासः अस्ति" इति अवदत् रामुः।

तस्मिन् एव काले मिस्टर किपनीसः जगदीशम् अपृच्छत्- "भवान् स्वस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विद्यायाः चमत्कारं मम मित्राणां कृते कदा दर्शयिष्यति?" इति।

"यदा भवान् वदेत्। मया एतत् प्रदर्शयितुं विशेषः कश्चन प्रयत्नः करणीयः न भवति" इति जगदीशचन्द्रः अवदत्।

६

राजदूतेन किपनिसेन जगदीशचन्द्रस्य विद्यायाः शक्तेः च प्रदर्शनं दूतावासे एव कस्मिंश्चित् सभागारे कारितम्। बर्लिन-नगरस्य उपशताः विख्याताः प्रमुखाः जनाः तत्र उपस्थिताः आसन्। एतेषु जर्मनसैनिकानां प्रमुखः फॉन हिन्डनबर्गः, जर्मनदेशस्य कश्चन प्रख्यातः वैज्ञानिकः लूयी कोहनः, कमाण्डर क्रिप्टन बिस्मार्कः, विलहैलम कैसरस्य सचिवः, बहूनां यन्त्रागाराणां स्वामिनः च उपस्थिताः आसन्।

सर्वप्रथमं श्रीमान् ड्रेक किपनिसः जगदीशचन्द्रस्य संक्षिप्तं परिचयम् उक्तवान्। तत्पश्चात् जगदीशचन्द्रः- "प्रेक्षकाणां मनसि भ्रमोत्पादनम् एव ऐन्द्रजालिकस्य प्रथमं कार्यं भवति। किन्तु योगाभ्यासस्य क्षेत्रम् एतस्मात् अपि बहु विस्तृतम् अस्ति। योगबलेन कश्चन न केवलं अपरेषां मनः सम्मोहयितुं शक्नोति अपितु तेषु भ्रान्तिम् अपि जनयितुं शक्नोति। सः अस्याः सृष्टेः गूढतमानि रहस्यानि अवगम्य अखिलस्य विश्वस्य निर्माणम् अपि कर्तुं शक्नोति। अहम् उभयोः अपि अंशयोः प्रदर्शनं करिष्यामि" इति अवदत्।

ततः सः नैकेषां भ्रान्तिजन्यानां चमत्कृतीनाम् प्रदर्शनम् अकरोत्। सः गीतं श्रावितवान्। नृत्यं दर्शितवान्। बहूनां सुगन्धद्रव्याणां जिघ्रणं कारितवान्। खादनं विनैव बहूनां खाद्यपदार्थानाम् आस्वादनं कारितवान् च।

द्वितीयवारं प्रदर्शनकाले सः अवदत्- "इदानीं किमपि तादृशं विशेषं वदन्तु भवन्तः यत् भवतां विज्ञानम् अपि कर्तुम् असमर्थं भवेत्। किन्तु अहं तत्कर्तुं शक्नोमि उत न इति पश्चात् वदिष्यामि। अहं ज्वलति अङ्गारे घण्टां यावत् स्थातुं शक्नोमि। ततोऽपि अधिकं कर्तुं शक्नोमि। वदन्तु, भवन्तः किम् इच्छन्ति?" इति।

कैसरविलहैलमस्य सचिवः मिस्टर क्रिप्टनः अवदत्- "मिस्टर ऐन्द्रजालिक! माननीयस्य कैसरमहोदयस्य कृते भारतवर्षे उपलभ्यमानम् आम्रम् आनेतुं शक्नोति भवान्?" इति।

"आम्"।

"तत् खादितुं शक्यते किम्?"

"आम्"।

"तर्हि कण्डोलपरिमितानि आम्राणि तदर्थम् आनीयन्ताम्"।

"तत् भवतः कारयाने वस्तुस्थापनार्थं कल्पिते स्थले स्थापितम् अस्ति। भवान्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तत् अत्र आनाय्य सर्वान् प्रेक्षकान् दर्शयितुं शक्नोति" इति अवदत् जगदीशचन्द्रः।

मिस्टर क्रिप्टनः अवाङ्मुखः सञ्जातः। सः तत्रत्यम् आतिथेयम् उक्तवान्- "कृपया, कमपि सेवकं प्रेषयित्वा तत् आनाययतु" इति।

मिस्टर किपनिसः सेवकद्वयं प्रेषयित्वा ततः आम्रैः पूरितं कण्डोलम् आनाय्य सर्वान् प्रेक्षकान् दर्शितवान्। तस्मात् कण्डोलात् आम्रसुगन्धः सर्वत्र प्रसरन् आसीत्। ततः जगदीशचन्द्रः तत्र उपस्थितेभ्यः सर्वेभ्यः एकैकम् आम्रम् प्रादात्। कण्डोलं रिक्तं सञ्जातम्। रिक्तं तत् कण्डोलं सचिवं क्रिप्टनं प्रदर्श्य जगदीशः- "भवतः स्वामिनः कृते अपरं किञ्चन आम्रकण्डोलं स्थापितम् अस्ति मया" इति अवदत्।

सर्वे आश्चर्यचकिताः सन्तः तम् अपश्यन्। 'मिस्टर किपनिसः ऐन्द्रजालिकेन सह संमिल्य वञ्चनां कुर्वन् अस्ति' इति सन्देहः उत्पन्नः क्रिप्टनस्य मनसि। तस्मात् सः प्रेक्षकान् अवदत्- "अहं स्वयम् एव तत् कण्डोलं तत्र द्रष्टुम् इच्छामि। ततः आगत्य 'सत्यं किम्' इति भवतः सर्वान् वदिष्यामि" इति।

सः स्वयं तत्र अगच्छत्। तत्र विद्यमानं किञ्चन आम्रपूरितं कण्डोलं दृष्ट्वा ततः प्रत्यागत्य "अहं कारयानचालकम् अपृच्छम्। सः उक्तवान् यत् यदा मिस्टर किपनिसस्य सेवकौ आगत्य आम्रपूरितं कण्डोलं याचितवन्तौ तदा सः हसितवान् आसीत्। ततः सः वस्तुस्थापनार्थं कल्पितं स्थलम् उद्घाट्य दर्शितवान्। तत्र विद्यमानं आम्रकण्डोलं दृष्ट्वा सः तावान् विस्मितः सञ्जातः येन उन्मत्तः इव व्यवहारम् अकरोत्। सः वदति स्म प्रथमस्य कण्डोलस्य निष्कासनसमये अन्यत् किमपि न आसीत् इति। पूर्णं समयं यावत् सः वाहनस्य पार्श्वे एव स्थितः आसीत्। सः शपथेन वदन् आसीत् यत् कारयानस्य पार्श्वे मत् ऋते कोऽपि न आगतः" इति सर्वान् प्रेक्षकान् उक्तवान्।

पुनः विज्ञानी कश्चन मिस्टर लुयीकोहनः अपृच्छत्- "वयं जर्मनदेशस्य विज्ञानिनः काचैः सुवर्णस्य निर्माणं कुर्वन्तः स्मः। किन्तु एतावता साफल्यं न प्राप्तम्। किं भवान् तदपि कर्तुं शक्नोति?" इति।

"अथ किम्! मह्यं किमपि काचेन निर्मितं वस्तु ददातु" इति जगदीशचन्द्रेण उक्ते सति लुयी कोहनः स्वस्मात् कोषात् काचनिर्मिताम् अङ्कनीम् अयच्छत्। तस्य पार्श्वे काचनिर्मिता काचित् टोपी अपि आसीत्। कागदस्य उपरि तया घर्षणेन लेखनं दृश्यते स्म। जगदीशचन्द्रः ताम् अङ्कनीं दृष्ट्वा- "प्राध्यापकमहोदय, एतत् तु किमपि नास्ति। एतत् भवान् स्वीकरोतु। अहम् इतोऽपि चमत्कारपूर्णं किञ्चन कार्यं भवन्तं दर्शयामि..........

"अधिकभारवस्तुभिः स्वल्पभारयुतानि वस्तूनि निर्मातुं शक्यन्ते। एतत् पश्यतु, सुवर्णं जातम्" इत्युक्त्वा तस्मै अङ्कनीम् अयच्छत् जगदीशचन्द्रः। तस्य काचनिर्मिता टोपी सुवर्णनिर्मिता जाता। जगदीशः पुनः- "किन्तु अहं खिन्नम् अस्मि यत् कस्यचिदपि पार्श्वे

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यदि लौहदण्डः अस्ति तर्हि दीयताम्। अहं पूर्णस्य लौहदण्डस्य सुवर्णरूपेण परिवर्तनं करिष्यामि। लौहः सुवर्णस्य अपेक्षया अल्पभारयुतः भवति। सः सुवर्णनिर्माणकाले सङ्कुचितः भविष्यति" इति अवदत्।

लुयी कोहनः स्वकीयं लौहदण्डं तस्मै यच्छन्- "अस्तु, एतत् स्वीक्रियताम्" इति अवदत्।

जगदीशः लौहदण्डं स्वीकृत्य पुरतः विद्यमानायाः उत्पीठिकायाः उपरि अस्थापयत्। तं वस्त्रेण च आच्छाद्य- "सुवर्णं लौहस्य अपेक्षया प्रायशः तृतीयांशं यावत् भारयुतं भवति। अतः एव लौहः सुवर्णत्वप्राप्तिकाले तेनैव परिमाणेन सङ्कुचितः भविष्यति। तस्मात् सुवर्णं तु प्रामाणिकं भवेत्। द्वयोः भारतोलनसमये सुवर्णस्य तावान् एव भारः भविष्यति यावान् भारः लौहदण्डस्य अस्ति। किन्तु तस्य वैशाल्यं तृतीयांशं यावत् न्यूनं भविष्यति" इति अवदत्।

एतावत् उक्त्वा सः वस्त्रम् अपसारितवान्। विज्ञानिना दत्तस्य दण्डस्य वैशाल्यं दैर्घ्यं च न्यूनम् अभवत्। किन्तु लौहस्य स्थाने कान्तिमयं सुवर्णं सञ्जातम्। तं सुवर्णमयं दण्डं डॉक्टर कोहनीमहोदयाय यच्छन् जगदीशचन्द्रः- "अहं डॉक्टरमहोदयाय निवेदयामि यत् एतस्य धनस्य उपयोगं कस्यचित् सार्वजनिककार्याय करोतु इति। स्वस्य कार्यसाधनार्थम् एतत् न उपयोक्तव्यम्" इति अवदत्।

सर्वे प्रेक्षकाः तं दण्डं दृष्ट्वा तस्य भारं च अवगत्य 'सुवर्णदण्डः अस्ति' इति ऊहितवन्तः। तत्पश्चात् डॉक्टर कोहनी अवदत्- "अहम् एतस्य रासायनिकं भौतिकं च परीक्षणं कृत्वा पुनः भवता सह मेलिष्यामि" इति।

इत्थं बहुधा परीक्षणस्य पश्चात् प्रदर्शनं समाप्तं सञ्जातम्। प्रायः सर्वे प्रेक्षकाः नेत्रे आमर्दयन्ति स्म। यदा सर्वे गतवतन्तः तदा जगदीशचन्द्रः- "यूरोपस्य लोभयुक्ते समाजे अहं किञ्चन विस्मयलुण्ठनयोः प्रमुखं केन्द्रं भविष्यामि इति मम भीतिः अस्ति। तस्मात् अहं स्वस्य स्थानपरिवर्तनं कृत्वा अज्ञातं स्थानं गन्तुम् इच्छामि" इति राजदूतम् अवदत्।

"भवन्तौ दूतावासम् आगत्य वासं कर्तुं शक्नुतः"।

"एतेन कोऽपि लाभः न भवेत्। अहम् अत्र बन्दी इव भवेयम्। अहं शान्तिपूर्वकं देशं देशान्तरं च भ्रमितुम् इच्छामि। तत्र सफलतां च प्राप्तुम् इच्छामि"।

"इदानीं तु भवता जर्मनदेशीयेन महाराजेन सह मेलनीयम् अस्ति। सः धन्यवादपत्रम् अपि प्रेषयिष्यति" इति राजदूतः मिस्टर किपनिसः उक्तवान्।

"तत् मेलनं तु अस्मिन् दूतावासे अपि भवितुं शक्नोति। सामान्याः जनाः माम् अनुसरन्तु इति अहं कदापि न इच्छामि"।

"तर्हि भवान् किम् इच्छति?" इति अपृच्छत् किटनिसः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"अहं भवद्द्वारा आत्मनः संरक्षणं वाञ्छामि" इति जगदीशचन्द्रेण उक्तम्।

"भवान् इदानीम् अस्मिन् दूतावासे वासं करोतु। तत्पश्चात् गुप्तरूपेण जर्मनीदेशात् बहिः प्रेषयिष्यामि इति"।

ततः जगदीशचन्द्रः रामुः च तस्मिन् दूतावासे एव वासम् अकुरुताम्। पूर्वतननिवासस्थानात् वस्तूनि आनायितानि। किन्तु अत्र काचित् समस्या उत्पन्ना।

श्रीमती किपनिस दूतावासस्थेन कस्मिंश्चित् सेनाधिकारिणि स्निह्यति स्म। किन्तु सः सेनाधिकारी तस्याः स्नेहप्रस्तावं निराकृतवान् आसीत्। श्रीमती किपनिस अस्मिन् कार्ये रामोः साहाय्यम् इच्छति स्म। 'एतत् सम्यक् कार्यं नास्ति' इति बहु बोधितवान् रामुः। किन्तु सा किमपि अनवगच्छन्ती पुनः प्रार्थनां कृतवती। विवशः रामुः विषयम् एतं गुरुदेवम् अवदत्।

जगदीशचन्द्रः अवदत्- "एतत् कार्यं शीघ्रं न भविष्यति। तदर्थं समयः अपेक्षते इति त्वं तां वद। तावत् तथा उपायं करोमि येन सा अधिकारिसम्बद्धं स्नेहभावं त्यजेत्" इति।

ततः कस्याञ्चित् रात्रौ मि. किपनिसस्य आदेशानुसारं जगदीशचन्द्रः कैसरस्य राजभवनं प्रति प्रेषितः। तत्र सः कैसरस्य पुरतः उपस्थितः अभवत्। कैसरः शुद्धया आंग्लभाषया सम्भाषणं कुर्वन्- "डॉ. कोहनः भवतः विषये यत् उक्तवान् तत् श्रुत्वा मम मनः प्रमुदितं जातम्। अहम् इच्छामि यत् भवान् जर्मनदेशे वासं कुर्वन् स्वीयेन ज्ञानेन विश्वलाभाय प्रयत्नं कुर्यात् इति। अत्र विशालः कश्चन संस्कृतपुस्तकालयः अपि अस्ति। अत्रत्यः सर्वकारः विज्ञानस्य उन्नत्यै बहु धनं व्ययीकुर्वन् अस्ति। समस्ते विश्वे विज्ञानेन तादृशम् उन्नतं स्थानं कुत्रापि न प्राप्तं यादृशं जर्मनदेशे प्राप्तम् अस्ति। तस्मात् अत्र निवासकरणेन भवान् न केवलम् अनुकूलं वातावरणं प्राप्नुयात् अपितु सर्वविधम् आनुकूल्यं प्राप्स्यति। भवान् यदि इच्छति तर्हि अस्माभिः भवते किञ्चन सुन्दरं गृहम् एकान्ते दीयेत तथा भोजनादिव्यवस्थाः अपि कल्प्येरन्" इति जगदीशचन्द्रम् अवदत्।

जगदीशः एतेन प्रस्तावेन आश्चर्यचकितः अभवत्। किन्तु उत्तरं कथं दातव्यम् इति सः जानाति स्म। सः अवदत्- "श्रीमतः भवतः एतावती कृपा मयि अस्ति इति ज्ञात्वा अहम् अनुगृहीतः अस्मि। भवान् यत् आनुकूल्यं मह्यं दातुम् इच्छति तेन मम मनः प्रसन्नं जातम् अस्ति। अस्मिन् समये तु विश्वभ्रमणं कृत्वा ज्ञानसम्पादनं कर्तुम् इच्छामि। तदनन्तरं मम विवाहः भविष्यति। विवाहस्य पश्चात् अवशिष्टं जीवनं लोकसेवायै अर्पयितुम् इच्छामि। तस्मिन् काले श्रीमतः भवतः प्रस्तावात् लाभं स्वीकृत्य आत्मानं धन्यं करिष्यामि" इति।

"किं सङ्कल्पमनसा एतत् वचनं कथ्यमानम् अस्ति?"

"आम्, एतत् मदीयं दृढं वचनम् अस्ति" इति जगदीशचन्द्रः प्रत्युत्तरत्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"किन्तु, भवान् तु मानवात् अपि श्रेष्ठः कश्चन 'सुपर ह्यूमन' इति अस्ति"।

"अहं स्वस्य वचनपालनं कर्तुं पूर्णं प्रयत्नं करिष्यामि"।

"भवान् भ्रमणात् कदा अवकाशं प्राप्स्यति?"

"इदानीम् इतोऽपि एकं वर्षम् अपेक्षितम् अस्ति"।

"धन्यवादाः! जर्मनदेशीयाः प्रजाः अस्मिन् देशे भवतः प्रवासार्थं सदा कृतज्ञाः भविष्यन्ति" इति उक्तं कैसरेण।

यदा जगदीशचन्द्रः उत्थाय ततः गन्तुम् उद्यतः तदा तेन उक्तम्- "अहम् इच्छामि यत् श्रीमते भवते स्मृतिस्वरूपं किञ्चन उपहारं दद्याम्" इति।

कैसरः औत्सुक्येन तम् अपश्यत्। जगदीशचन्द्रः स्वस्य दक्षिणहस्तस्य मुष्टिं पिधाय अनन्तरम् उद्घाट्य ततः तस्मै सुन्दरं हीरकयुतम् अङ्गुलीयकम् अयच्छत्। तत् अङ्गुलीयकं कैसरस्य अङ्गुलीं सम्यक् प्रविष्टम्। तत् दृष्ट्वा कैसरः प्रमुदितः जातः। तदनन्तरं जगदीशचन्द्रः अवनम्य प्रणामं कृत्वा गन्तुकामः सन् तम् अनुज्ञां याचितवान्।

७

डॉ. कोहनस्य वक्तव्यं यदा वार्तापत्रे प्रकाशितं जातं तदा भारतस्य तौ योगाभ्यासिनौ द्रष्टुं आंग्लदूतावासस्य पुरतः जनानां सम्मर्दः एव जातः। प्रतिदिनं तावान् सम्मर्दः वर्धमानः आसीत् येन तं नियन्त्रयितुम् आरक्षकाः सैनिकाश्च आह्वातव्याः अभवन्।

तदनन्तरं एकैडमी ऑफ साइंसिज नामिकायाः संस्थायाः परतया जगदीशचन्द्रस्य अभिनन्दनं कर्तुम् आयोजनम् आरब्धम् अभवत्। तदा जगदीशचन्द्रः अचिन्तयत् 'जर्मनदेशे इतोऽपि प्रवासकरणेन अहं संकटापन्नः भवेयम्' इति। अतः सः तया संस्थया क्रियमाणं अभिनन्दनसमारोहं प्रति आगन्तुम् असम्मतिम् असूचयत्। 'असम्मतेः कारणं तु मम वियानादेशं प्रति गमनम् अस्ति। ततः प्रत्यागत्य अहं संस्थाद्वारा दीयमानम् अभिनन्दनं स्वीकरिष्यामि' इति सूचनां तत्र प्रेषितवान्। परेद्युः बर्लिननगरस्य वार्तापत्रेषु तस्य वियानादेशं प्रति गमनस्य वार्ता प्रकाशिता अभवत्।

जगदीशचन्द्रः रामुः च आंग्लराजदूतात् अनुमतिं प्राप्य पलायनं कर्तुम् इच्छतः स्म। मि. किपनिसः तु तयोः गमनम् अङ्गकरोति स्म, किन्तु श्रीमती किपनिस तत्र वासं कर्तुम् आग्रहं करोति स्म। तस्मात् मि. किपनिसः कानिचित् दिनानि इतोऽपि वासं कर्तुम् अवदत्। एतस्यां परिस्थितौ एकदा सायङ्काले जगदीशचन्द्रः रामुणा सह गुप्तमार्गेण दूतावासात् बहिः निर्गतवान्।

जनाः चिन्तयन्ति स्म यत् तौ वियानादेशं प्रति अगच्छताम्। वस्तुतः तौ पेरिसनगरं प्राप्तवन्तौ। तत्पश्चात् तौ तादृशं प्रदर्शनं कर्तुं न ऐच्छताम्, यादृशं बर्लिननगरे

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कृतवन्तौ आस्ताम्। पेरिसनगरे तयोः किञ्चित् पृच्छा जाता किन्तु पश्चात् तौ पत्रकाराणां दृष्टिपथात् तिरोहितौ जातौ।

यूरोपतः अमेरिका, ततः आस्ट्रेलिया फिलिपाइन्स जावा सुमात्रा जापान चीन तिब्बत प्रभृतिभ्यः देशेभ्यः काश्मीरम् आगत्य तौ पुनः स्वकीयं गृहम् ऊधमपुरं प्राप्तवन्तौ।

गृहात् निर्गतवतोः तयोः षट् वर्षाणि अतीतानि आसन्। तयोः ग्रामं प्रति आगमनेन कुटुम्बजनाः न प्रसन्नाः अभवन् न वा दुःखं प्राकटयन्। मिथ्यास्तुतिं कर्तुम् आगताः ते पुनः प्रतिनिवृत्ताः अभवन्।

रामोः मुखमण्डलस्य तेजः पूर्वस्य अपेक्षया इतोऽपि अवर्धत। जगदीशचन्द्रस्य कुटुम्बजनाः रामुं धनिकं मन्यन्ते स्म। 'तस्य धनबलेन एव अकर्मण्यः सन् जगदीशः सर्वत्र अटति खादति च' इति मतम् आसीत् तेषाम्। एतादृशस्य चिन्तनस्य पश्चात् मीनायाः विवाहविचारः अपि समुपस्थितः अभवत्। किन्तु तदर्थं रामुः सज्जः न आसीत्। एतस्मात् कारणात् जगदीशस्य सम्बन्धिनः रुष्टाः अभवन्।

परिणामः एषः जातः यत् जगदीशचन्द्रः पुनः गृहात् बहिः गन्तुम् उद्यतः अभवत्। रामुः एकदा "यदि भवान् आदिशति तर्हि अहं विवाहं करोमि" इति तम् अवदत्।

तदा जगदीशचन्द्रः अवदत्- "त्वं तदेव कुरु यत् कर्तुं तव मनः वदति" इति।

एवं प्रकारेण विवाहविचारः समाप्तः। अस्मिन् पर्याये रामुः मीनायाः विवाहनिमित्तं पञ्चसहस्रस्य रूप्यकाणां प्रबन्धनम् अकरोत्।

एतेन मीनायाः पितुः सन्तोषः तु अभवत् किन्तु जगदीशस्य भ्रातृषु ईर्ष्याभावः इतोऽपि अवर्धत। नित्यं ते कलहं कुर्वन्ति स्म।

एकदा जगदीशस्य अग्रजः तत्समीपम् आगत्य- "जगदीश, इदानीं त्वं पञ्चचत्वारिंद्वर्षीयः जातः। त्वं विवाहं किमर्थं न करोषि? त्वयि अविवाहिते सति रामुणा अपि अविवाहितेन एव स्थातव्यम् भवेत्" इति।

"अहं विवाहं तु करिष्यामि एव। आगामिमासे विवाहार्थं गमिष्यामि। रामोः विवाहः तु तस्य इच्छानुगुणं भविष्यति। सः मीनायाः पाणिग्रहणं कर्तुं न इच्छति। तस्मात् कारणात् अहं तस्मिन् विवाहेच्छां जनयितुं न शक्नोमि" इति जगदीशचन्द्रेण उक्तम्।

"एतत् गृहं कस्य अस्ति? त्वदीयम् उत रामोः?" इति अग्रजेन पृष्टम्।

"भवान् कस्य इति चिन्तयति?" इति प्रतिप्रश्नं कृतवान् जगदीशचन्द्रः।

"सर्वे रामोः गृहम् अस्ति इति मन्यन्ते"।

"तर्हि तस्य एव अस्ति इति अवगच्छन्तु"।

"त्वं विवाहस्य पश्चात् कुत्र निवसिष्यसि?"

"यत्र निवसिष्यामि तत्र भवान् आगमिष्यति एव। कदाचित् एतत् गृहं रामुणा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मह्यम् एव दीयेत"।

"किमर्थम्?"

"एतस्मिन् विषये भवान् तमेव पृच्छतु। किं सर्वं माम् एव प्रक्ष्यति?"

"अहम् एतदर्थं पृच्छामि ह्यः उपमण्डलाधीशः आगतः आसीत्। सः रामोः आयस्य विषये पृच्छां करोति स्म। सः वदति स्म यत् युवां चौर्यवृत्त्या धनसंग्रहणं कुर्वन्तौ महाराजौ इव ऐश्वर्यवन्तौ स्थः इति" इति जगदीशचन्द्रस्य अग्रजः तम् अवदत्।

जगदीशः तु सामान्यः विषयः इति चिन्तयन् आसीत् किन्तु स्थितिः तु अत्यन्तं विकटा आसीत्। वस्तुतः अग्रजः एव जगदीशं रामुं च विरुध्य उपमण्डलाधीशम् उत्तेजयति स्म। तस्मात् कारणात् अपरेद्युः एव उपमण्डलाधिकारी रामुणा मेलितुम् आगतः। रामुः तं दृष्ट्वा विस्मयेन- "का आज्ञा भवतः? अत्र आगमनस्य कष्टं किमर्थं सोढम्?" इति अपृच्छत्।

"विषयः एवम् अस्ति यत् दण्डाधिकारिणः सर्वेऽपि अधिकाराः अत्र मया प्राप्ताः सन्ति। एतदर्थम् अस्मिन् क्षेत्रे शान्तिव्यवस्थां कल्पयितुं मम एव उत्तरदायित्त्वम्। अहं पश्यन् अस्मि- 'भवन्तः ऐश्वर्येण जीवनं यापयन्तः सन्ति, किन्तु आयस्य कुत्रापि स्रोतः एव न दृश्यते' इति। तत् कथम्? आयस्य स्रोतः किम्?"

"मदीया विद्या" इति प्रत्युत्तरत् रामुः।

"विद्या किं चटकायाः अण्डानि इव धनं ददाति? विद्यया यदि कार्यं कुर्मः तर्हि एव धनं लभ्यते"।

"अस्माकं विद्या साक्षात् एव धनं ददाति"।

"तर्हि एषा काचित् अपूर्वा विद्या अस्ति या अनायासं धनवृष्टिं करोति?"

"आम्, तथैव अस्ति"।

"एतादृशी विद्या तु चोराणां लुण्ठाकानां च समीपे भवति"।

"किमपि अवगच्छतु। चौर्यं लुण्ठनं च अस्माभिः कृतं चेत् अस्मान् निगडेन गृह्णातु"।

"तदेव कर्तुं तु आगतः अहम्" इत्युक्त्वा सः मण्डलाधिकारी बहिः स्थितान् आरक्षकान् आहूय रामोः निगडेन बन्धनं कारितवान्। तस्मिन् एव काले जगदीशचन्द्रः अपि तत्र आगच्छत्। निग्रहणस्य पत्रं दर्शयतु इति सः असकृत् उक्तवान्। किन्तु शासनव्यवस्था एव तादृशी आसीत् यत्र नियमाः न पाल्यन्ते। मण्डलाधिकारी अवदत्- "अलम् विकत्थनेन। कदाचित् त्वम् अपि ग्रहीतव्यः भवेः" इति।

जगदीशचन्द्रः स्मितं कुर्वन् तत्र स्थितः आसीत्। रामुं निगडेन बद्ध्वा मण्डलस्य कारागारे स्थापितवन्तः ते। तत्र दिनत्रयं स्थापयित्वा तं जम्मूप्रदेशं प्रेषितवन्तः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जगदीशचन्द्रः पूर्वम् एव तत्र प्राप्तः आसीत्। तत्र सः रामुं विरुध्य मण्डलाधिकारिणा क्रियमाणम् आरोपं ज्ञातुम् इच्छति स्म। पञ्चदिनानां पश्चात् रामुः न्यायालये उपस्थापितः अभवत्। 'तस्य किमपि आजीविकायाः साधनं नास्ति। अतः अकर्मण्यः एषः इति उद्घुष्य सः देशात् बहिः निष्कासनीयः' इति तर्कम् उपस्थापयन् मण्डलाधिकारी अवदत्। ततः न्यायाधीशः रामुम् अपृच्छत्- "तव नाम किम्?" इति। रामुः तूष्णीकः सञ्जातः।

"कुत्रत्यः त्वम्?"

एतस्य उत्तरम् अपि रामुः न अवदत्।

"तव पितुः नाम किम्?"

तदा रामुः- "अहं कस्यापि प्रश्नस्य उत्तरं दातुं न इच्छामि। अहं चिन्तयामि यत् मम ग्रहणम् न्यायविरुद्धम् अस्ति। मंम विरुद्धं कोऽपि आरोपः नास्ति" इति न्यायाधीशम् अवदत्।

"एतत् सर्वं पश्चात् परिशीलयामः। पूर्वं नामं निवाससङ्केतं च लेखय"।

"यदि मम ग्रहणम् एव अकारणं जातं तर्हि तत्सम्बद्धः भवता दीयमानः निर्णयः अपि असङ्गतः स्यात्। अहम् एतस्मिन् अन्याययुक्ते निर्णये विश्वसितुं न शक्नोमि"।

"अन्यः कश्चनः अपराधः भवतु उत न, किन्तु न्यायालयेन पृष्टानां प्रश्नानाम् उत्तरम् अयच्छन् अपि त्वम् अपराधम् एव कुर्वन् असि। एतत् न्यायालयस्य अवमाननम् एव। तस्मात् सकृत् पुनः पृच्छामि तव नाम किम्?"

"न्यायालयस्य अवमाननं मदीयम् अभिलषितं नाऽस्ति। किन्तु अहं पृच्छामि 'यदा ऊधमपुरे किमपि चौर्यं लुण्ठनं वा न जातं तदा भवद्भिः कथम् ऊह्यते यत् अहं चौर्येण लुण्ठनेन वा आजीविकायाः निर्वहणं करोमि? मम अकारणं हि निग्रहणात् मदीयम् एव अवमाननं जातम् अस्ति। अहं शीघ्रं मुक्तः भवेयम्। मुक्तेः पश्चात् एव यस्य कस्यापि उत्तरं दास्यामि। परन्तु यावत् अहं निगडेन शृङ्खलाभिः च बद्धः सन् अवमानम् अनुभविष्यामि तावत् मम विषये पृष्टानां प्रश्नानाम् उत्तरं न वदिष्यामि" इति रामुः न्यायाधीशं प्रति उक्तवान्।

"पश्यतु, मिस्टर रामु, तव यौवनम् आरोग्यं च दृष्ट्वा हर्षः भवति। मदीयं मनः त्वया सह सम्यक् व्यवहारं कर्तुं वदति। किन्तु त्वं शासननियमान् न जानासि। तदर्थं वदामि यत् स्वस्य नाम सङ्केतादिकं त्वं लेखय। पश्चात् अहं त्वां मोचयिष्यामि। ततः पूर्वम् अहं निर्णयं कर्तुं न शक्नोमि" इति न्यायाधीशः रामुं प्रशंसन् अबोधयत्।

रामुः स्मितं कुर्वन्- "एतत् तु 'कृत्यैः स्वकीयैः खलु सिद्धिलब्धिः' इति आभाणकं चरितार्थम् अभवत्। पश्यतु महोदय, अहं केवलम् एतत् एव वक्तुं स्थितः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अस्मि यत् मण्डलाधिकारी मादृशं कञ्चित् निरपराधिनं गृहीत्वा घोरम् अन्यायं कृतवान् अस्ति। यदि भवतः शासननियमाः एतस्य कृते अङ्गीकारं ददाति तर्हि इतोऽपि अधिकः अन्यायः भवेत्। एतादृशानां नियमानाम् अङ्गीकारप्रदानं मानवतातः पतनम् इव भवेत्। एतत् सर्वं सत्यम् अस्ति चेत् अपि भवति तादृशी शक्तिः एव नास्ति या शक्त्या भवान् मां दण्डयेत्, न वा कारागारे मां बन्धुं शक्नुयात्! अहम् गच्छामि" इति उक्त्वा रामुः ततः अन्तर्हितः अभवत्।

"किम् ....?" इति विस्मितभावं प्रकटयन् विस्फाटिताभ्यां नेत्राभ्यां पश्यन् एव आसीत् न्यायाधीशः। तस्य मुखात् 'किम्' इति ऋते अन्यत् किमपि वचनं न निर्गतम्। रामुः धूमयुक्तः मेघः इव अभवत्। तदनन्तरं सः न दृष्टः केनापि। निगडं शृङ्खलाः च 'खट्' इति ध्वनिना भूमौ अपतन्। न्यायालये विद्यमानाः जनाः आश्चर्येण पश्यन्तः एव आसन्। न्यायाधीशस्य शरीरं रोमाञ्चितं जातम्। सः आसन्दात् उत्थाय किमपि वक्तुम् इच्छति स्म किन्तु तस्य मुखात् ध्वनिः एव न निर्गतः।

जगदीशचन्द्रः अवनम्य न्यायालयं नमस्कृत्य किमपि अनुक्त्वा एव न्यायालयात् निरगच्छत्।

८

जगदीशचन्द्रः न्यायालयात् निर्गत्य रेलवेस्थानकं प्रति प्रस्थितवान्। किञ्चित् दूरं रामुः अपि तेन सह अमिलत्। उभाभ्याम् अपि तदा सम्भाषणं कृतम्। रामुः अवदत्- "गुरुदेव, इदानीं तु बडाग्रामं प्रति गन्तव्यम्। ऊधमपुरं प्रति गमनेन वृथा कोलाहलः भवेत्। शासनं पुनः ग्रहीतुं प्रयत्नं कुर्यात्। अपरं च प्रवृत्तायाः घटनायाः विषयम् अवगत्य अस्माकं प्रेक्षकाणां तत्र आगमनम् अपि भवेत्" इति।

जगदीशः हसन्- "मूर्खाय न्यायाधीशाय कानिचित् दिनानि यावत् शिरोवेदनां जनितवान् असि त्वम्। न जाने एतस्मिन् विषये वार्तापत्राणि कीदृशाः वार्ताः प्रकाशयेयुः" इति उक्तवान्।

"ते मूर्खाः स्वशिरः पातयन्तु नाम। अद्य एव आवां बडाग्रामं प्रति गच्छाव" इति दृढेन वचसा उक्तवान् रामुः।

"अहं जानामि यत् मम गमनेन तत्र पुनः कलहः भवेत्। बडाग्रामे तु मानिन्याः सन्तप्तस्य आत्मनः मुक्तिः अपि करणीया अस्ति। एतदर्थं बडाग्रामम् एव गच्छाव" इति जगदीशचन्द्रेण उक्तम्।

परेद्युः रामुः जगदीशचन्द्रः च बडाग्रामं प्राप्तवन्तौ। यस्मिन् दिने तौ ग्रामं प्रति आगतवन्तौ तस्मिन् दिने शङ्कर... । तस्य अन्त्येष्टिसंस्कारं निर्वर्त्य जनाः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रत्यागताः आसन्।

आगतौ तौ दृष्ट्वा मङ्गलः पुरतः समागत्य शङ्करस्य दिवङ्गमनस्य विषये अवदत्। तेन उभौ अपि शोकाकुलौ अभवताम्। रामुः गृहस्य अन्तः गत्वा अग्रजां सोहनीं सान्त्वयन्- "भगिनि, धैर्यं धरतु। बहु दुःखम् अनुभवन्ती अस्ति खलु"? इति अवदत्।

"रामो! सुखं दुःखं वा किमपि मया न अनुभूयते। कश्चन भारः अनुभूयते स्म यदा तं श्वसुरालये एव परित्यज्य अत्र आगता आसम्। परन्तु स्वस्य अन्तिमेषु दिनेषु सः मह्यं सेवायाः अवसरं प्रकल्प्य मम भारं न्यूनीकृतवान्। भगवान् यत् करोति तत् श्रेयसे एव करोति" इति सोहनी उक्तवती।

"भगिनि, मम सन्तोषः अस्ति यत् भवती स्वमनः नियन्त्रयितुं समर्था अभवत्। भवत्याः विवाहसम्बन्धः एव सम्यक् न आसीत् इति अहम् अनुभवामि। अतः एतादृशः परिणामः तु स्यात् एव। भवतु, त्यज्यताम् अयं विषयः। भवत्याः श्वश्रूः श्वसुरः च कुत्र स्तः?" इति रामुः अवदत्।

"तयोः विषये न किमपि ज्ञायते। ऋणप्रत्यर्पणे असमर्थे जाते तौ हरिद्वारं प्रति अगच्छताम् इति श्रूयते। ततः कापि सूचना न आगता यत् तौ कुत्र स्तः इति"।

रामुः अग्रजया सह सम्भाष्य गृहात् बहिः आगच्छन् आसीत्। तदा तेन कस्यापि रोदनध्वनिः श्रुतः। सः वेगेन बहिः आगत्य अपश्यत्। अश्वशकटात् द्वे महिले रुदत्यौ अवतरन्त्यौ आस्ताम्। ततः गृहस्य अन्तः प्रवेष्टुम् ते उद्युक्ते अभवताम्। एतयोः एका दिवंगतस्य शङ्करस्य पत्नी, अपरा च तस्याः श्वश्रूः अस्ति इति। तस्य सन्देहः जातः। अतः सः द्वारे स्थितः अभवत्। तस्मिन् एव काले मङ्गलः अपि तत्र आगतः। तयोः परिचयम् उक्त्वा सः रामुम् अवदत्- "एते अन्तः नय" इति।

"आदौ माता प्रष्टव्या खलु?"

मङ्गलस्य माता यदा ज्ञातवती यत् लक्ष्मीः तत्श्वश्रूः च आगते तदा सा स्वयं बहिः आगत्य- "भवत्यौ अत्र रोदनं न कुरुताम्। यदि रोदनम् एव करणीयं तर्हि श्मशानभूमिं प्रति भवद्भ्यां गन्तव्यम्" इति उक्तवती।

विवशीभूय ते पुनः अश्वशकटम् आरुह्य नगरं प्रत्यागते।

जगदीशचन्द्रः रामोः मातुः गृहे वासम् अकरोत्। त्रयोदशदिनानि यावत् शङ्करस्य मृत्योः विषयकः शोकः गृहे आसीत्। एषु दिनेषु जगदीशचन्द्रः रामुः च मङ्गलस्य गृहं गच्छन्तौ आस्ताम्। तत्र मोहिनीमानिनीभ्यां सह मेलनं कुरुतः स्म।

तेषु दिनेषु मानिन्याः स्थितिः अत्यन्तं विचित्रा आसीत्। तस्याः मनसि सर्वदा चाञ्चल्यम् अधीरता च भवतः स्म। सा इदानीं गृहात् कदाचित् एव निर्गच्छति स्म। तस्मात् कारणात् यदा जगदीशचन्द्रः तद् गृहं प्रति आगच्छति स्म तदा एव सा तं द्रष्टुं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शक्नोति स्म। तदर्थं सा सर्वदा व्याकुला सती तं प्रतीक्षते स्म। जगदीशचन्द्रः अपि तया मेलितुं बहु इच्छति स्म। किन्तु मेलितुम् अवसरः एव तेन न प्राप्यते स्म।

तथापि जगदीशचन्द्रेण तद्गृहं प्रति आगते मानिनी अपि सर्वाणि कार्याणि परित्यज्य तस्य समीपम् आगच्छति स्म। मानिनी वाल्मीकिना लिखितस्य संस्कृतरामायणस्य पाठं करोति स्म। जगदीशचन्द्रः तं नानाविधान् प्रश्नान् पृच्छति स्म, येन तस्याः मानसिकः विकासः कियान् जातः इति तस्य अवगमनं भवेत्।

इत्थम् अक्षिमेषणी क्रीडा अधिककालं यावत् न प्राचलत्। दिवङ्गतस्य शङ्करस्य त्रयोदशदिनानि अतीतानि जातानि। ततः मानिन्याः विषयः प्रारब्धः। मङ्गलः मोहिनी च रामुबृजलालौ पार्थक्येन उपवेश्य स्वस्य अन्तर्मनसः भावान् प्रकटितवन्तौ। तदा मङ्गलः- "रामो! तव गुरुः मानिन्याः विषये किं चिन्तयति? सः पुनः पुनः तया सह मेलितुं किमर्थम् आग्रहं करोति?" इति रामुम् अपृच्छत्।

रामुः स्वस्य मनोभावान् प्रकटयितुम् उत्तमम् अवसरम् एव प्रतीक्षमाणः आसीत्। अतः सः- "भ्रातः, गुरुदेवस्य मानिन्याः च विवाहः विधिना लिखितः अस्ति। गुरुदेवस्य मम च विद्यानुसारं तयोः जन्मजन्मान्तरः सम्बन्धः अस्ति। केनचित् कारणेन द्वयोः मध्ये वयसः भेदः जातः अस्ति। परन्तु योगिनां वयसि विंशतिः त्रिंशत् वा वर्षाणि अधिकानि भवन्ति चेत् न कापि चिन्ता" इति अवदत्।

"रामो! जनाः किं वदेयुः? सर्वे एव एतत् कार्यं निन्दन्तः 'षोडशवर्षीयां बालां पञ्चाशत्वर्षीयस्य वृद्धस्य कण्ठे अबध्नात् तस्य लुब्धः पिता' इति वदेयुः।

"अस्तु, भ्रातः! परन्तु साधारणाः जनाः एतं विषयं न जानन्ति, न वा एतं गूढं रहस्यम् अवगन्तुं तेषु तादृशं सामर्थ्यम् अस्ति। किं तेषां कथनेन उभयोः जन्मजन्मान्तरस्य सम्बन्धस्य मेलने विघ्नोपस्थापनम् उचितम् अस्ति?"

"एतदेव तु ज्ञातव्यम् अस्ति यत् उभयोः जन्मजन्मान्तरस्य सम्बन्धः कथं जातः?" इति मङ्गलेन पृष्टम्।

"मानिनी एव एतस्मिन् विषये सप्रमाणं निरूपयिष्यति। भवान् ताम् एव पृच्छतु" इति रामुणा उक्तम्।

"सा तु वदति स्म यत् त्वं किञ्चन मन्त्रं जपितुं तस्यै अवदः। तेन तस्याः मनसि नैके विचाराः उदिताः अभवन्। साधारणजनानां दृष्ट्या एतत् उन्मत्ततायाः लक्षणं भवति"।

"मन्त्रः तु बुद्धेः विकासाय उच्यते। एवं प्रतीयते यत् सम्यक् प्रकारेण जपकरणात् तस्यां दूरदृष्टिः समुत्पन्ना जाता अस्ति। भूतकालस्य अवगमनानन्तरं भविष्यतः विषयेषु अवगमनस्य प्रयत्नं कुर्वती अस्ति इति प्रतिभाति। ये एतादृशीं शक्तिं न अवगच्छन्ति ते एव एतां शक्तिम् उन्मत्ततां वदेयुः। किन्तु भ्रातः, सा किम् इच्छति इति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ताम् अपि पृच्छतु"।

तदा मोहिनी- "सा इदानीं बालिका अस्ति। सा कथम् अवगन्तुं शक्नुयात् यत् वैवाहिकं जीवनं किं भवति? केनचित् व्याजेन तव गुरुः तस्याः उपरि इन्द्रजालं कृतवान् अस्ति। तस्मात् एव कारणात् सा उन्मत्ता जाता अस्ति" इति अवदत्।

"पश्यतु भ्रातृजाये, सम्पूर्णे विश्वे एषा एव सम्मोहिनी विद्या प्रचलति। कस्यचित् एकस्य कस्मिंश्चित् प्रभावः न्यूनाधिक्यं भवति एव। एतस्मात् एव कारणात् कश्चन अपरस्य कार्यं साधयति। गुरुदेवः अन्येषाम् अपेक्षया अधिकाम् एव एतादृशीं शक्तिम् प्राप्तवान् अस्ति। यदि एषः प्रभावः आजीवनं तिष्ठेत् तर्हि अत्र का हानिः स्यात्?"

"किन्तु कस्यचित् एकस्य जीवनं तु बहु पूर्वम् एव समाप्तं भवेत्। तदनन्तरम् अपरस्य जीवनं नितरां दुष्करं भवेत्। ततः सः सम्मोहिन्याः प्रभावः अपि न भविष्यति, न वा प्रभावस्य उद्देश्यः"।

"भ्रातृजाये, यथा भवती चिन्तयति तद् विपरीतं भविष्यति। यस्य विषये 'पूर्वं समाप्तं भविष्यति' इति भवत्याः चिन्तनम् अस्ति, कदाचित् सः पश्चात् अपि जीवेत्। प्रयत्नः तु एतदर्थं विधातव्यः यत् उभयोः मध्ये अपरः अपि योगसिद्धिबलेन सहचरेण सह दीर्घं जीवनं जीवितुं शक्नुयात्" इति रामुणा उक्तम्।

"मया तु एते विषयाः न अवगम्यन्ते एव। अहं चिन्तयामि यदि तव गुरुः इतः निर्गच्छेत् तर्हि पश्चात् मानिनी विवाहं कर्तुं सिद्धा भवेत् एव इति। नगरस्य केनचित् धनिकपुत्रेण सह वार्ता प्रचलन्ती अस्ति। सः लक्षाधिकानां रूप्यकाणां स्वामी अस्ति" इति मोहिनी रामुम् अकथयत्।

एतत् श्रुत्वा रामुः अहसत्। यदा सर्वे तं प्रश्नदृष्ट्या अपश्यन् तदा सः अवदत्- "भ्रातृजाये, अग्रजायाः कृते अपि पिता लक्षपतिम् एव अन्विष्टवान् आसीत्। शङ्करस्य पिता शङ्करस्य कृते इतोऽपि अपरां काञ्चन लक्षपतेः पुत्रीम् अन्विष्टवान्। इदानीं भवती अपि नगरस्य कस्यचन लक्षपतेः अन्वेषणं कुर्वती अस्ति। भगवान् भवत्यै अन्येभ्यः च सद्बुद्धिं दद्यात्। गुरुदेवस्य विषये चिन्त्यते चेत् सः तु एतदर्थम् एव षट् वर्षाणि यावत् दूरम् आसीत्। एतदभ्यन्तरे मानिनी तस्मात् दूरं गता उत तत्समीपम् आगता?" इति।

रामोः एतया युक्त्या मङ्गलः मोहिनी च निरुत्तरौ जातौ। तथापि तयोः मनः एतत् न अङ्गीकरोति स्म। इदानीं अर्चकवर्यः बृजलालः अवदत्- "मङ्गलभ्रातः, मानिनी निश्चयेन बालिका अस्ति। तथापि भवद्भ्यां सा प्रष्टव्या एव। यदि सा तादृशं किमपि वदति यत् भवद्भ्यां न अवगम्येत तर्हि तां बोधयितुं प्रयत्नं कुरुताम्। एतत् तु अङ्गीकरणीयम् एव यत् सा भवतोः अपेक्षया विद्यावती बुद्धिमती च अस्ति। मम मतानुसारं सा वक्तव्या यत् तस्याः विवाहार्थं प्रस्तावद्वयम् अस्ति। उभयोः अपि प्रस्तावयोः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पूर्णं विवरणं दातव्यम्। यदि सा भवन्तं निर्णयं कर्तुं वदेत् तर्हि भवान् स्वबुद्धया निर्णयं करोतु। यदि सा एव एतस्मिन् विषये 'निर्णयम् अहं करोमि' इति वदेत् तर्हि पुनः विचारं कृत्वा स्वकीयं मतं प्रकटयतु इति उच्यताम्। किं रामो! त्वं किं वदसि?" इति।

"अहम् अर्चकवर्यस्य विचारेण पूर्णरूपेण सहमतः अस्मि। केवलम् एतावत् एव वदामि यत् मम गुरुदेवं निर्धनं न वदन्तु भवन्तः। यावत् धनम् इच्छन्ति तावत् सः दातुं शक्नोति। जगति विद्यमानं सर्वम् ऐश्वर्यं यस्य अङ्गुलीषु नृत्यति, तं कृपया निर्धनं मा वदन्तु" इति रामुणा उक्तम्।

रामुणा इन्द्रजालेन सर्वेषां पुरतः सहस्रं रूप्यकाणि यानि आनीतानि आसन् तानि मोहिन्या स्मृतानि। अतः सा अपृच्छत्- "कति रूप्यकाणि सः दातुम् अर्हति?" इति।

"भवती एव वदतु। इच्छति चेत् भवत्याः गृहं सुवर्णैः वज्रवैडूर्यादिभिः च पूर्णं कर्तुं शक्नोति सः"।

मङ्गलः अपि रामुणा आनीतं धनं स्मृतवान्। सः अवदत्- "मोहिनि! अलं धनस्य चर्चया। नगरस्य धनिकेषु किञ्चित् अपि मम विश्वासः नास्ति। तेषां सौजन्यं धनस्य अनुपातेन न्यूनाधिक्यं भवति। त्वं मानिनीम् आह्वय" इति।

"गच्छ, रामु! ताम् आह्वय। सा पाकशालायां स्यात्"।

रामुः अन्तः गतः। मानिनी दाधिकं मथ्नाति स्म। तस्याः पृष्ठं द्वाराभिमुखम् आसीत्। सा मथनं कुर्वती गायन्ती आसीत्-

"आगतः मम वीथ्यां गिरिधारी।
अहं तिरोहिता जाता लज्जावशात्"।। इति।

"मानिनि!" इति रामुः हसन् एव आह्वयत्- "अत्र आगच्छ" इति।

"आनयामि पितृव्य! किञ्चित् इतोऽपि मथ्नामि" इति मानिनी ततः एव उक्तवती।

"अरे, किम् आनयसि? अद्य त्वया सज्जीकृतं दाधिकं कोऽपि न पास्यति। आगच्छ, सर्वे त्वाम् आह्वयन्ति" इति रामुः अवदत्।

"पितृव्य! किम् अस्ति?" इति सा दधिमथनं परित्यज्य ततः उत्थाय तदभिमुखं दृष्ट्वा चिन्तिता सती अपृच्छत्।

"माता आह्वयन्ती अस्ति"।

"किमर्थं पितृव्य?"

"न ज्ञायते"।

मानिनी रामुम् अपश्यत्। सा जानाति स्म यत् रामुपितृव्यः एव तस्याः मनोभावम् अवगन्तुं शक्नोति। तथापि तम् किमपि अनुक्त्वा सा बहिः आगत्य उपवेशनस्थलम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आगता। तत्र गम्भीरभावं धारयतः उपविष्टवतः मातापितरौ अर्चकवर्यं च दृष्ट्वा सा द्वारसमीपम् एव स्थिता अभवत्। तस्याः पृष्ठतः रामुः आगच्छन् आसीत्। सः अवदत्- "अन्तः आगच्छ, भीतिः मास्तु"! इति।

"आगच्छ पुत्रि!" इति अर्चकवर्यः ताम् आह्वयन् अवदत्।

मानिनी अन्तः गत्वा मातुः समीपम् उपविष्टवती। तदा अर्चकवर्यः विषयं प्रारब्धवान्- "पश्य पुत्रि! इदानीं त्वदीये विवाहविषये अस्माभिः चर्च्यमानम् अस्ति। द्वित्रेभ्यः स्थानेभ्यः तव विवाहस्य प्रस्तावः आगतः अस्ति। कुत्र विवाहः भवेत् इति त्वदीयौ मातापितरौ निश्चयं कर्तुम् इच्छतः। अस्मिन् विषये त्वदीयं मतम् अपि स्वीकरणीयम् इति रामुः अवदत्। एतदर्थं त्वम् अत्र आहूता असि" इति।

मौनेन उपविष्टवती मानिनी भूमिं पश्यन्ती आसीत्। इदानीं किमपि कथनम् उचितं न भवेत् इति चिन्तितवती सा। अवाङ्मुखीं ताम् दृष्ट्वा रामुः अवदत्- "वद मानिनि, कः अभिप्रायः तव?" इति।

"अत्र कः अभिप्रायः?" सा ललाटे वक्ररेखां कुर्वती अवदत्।

"तव विवाहः भविष्यति खलु"।

"मम विवाहः अभवत्"।

"कदा? केन सह? कः पाणिग्रहणम् अकरोत्?" इति मङ्गलः अपृच्छत्।

"पूर्वजन्मनि नटेश्वरः मम पाणिग्रहणम् अकरोत्। तस्मिन् काले अपि विवादः आसीत्। किन्तु मम कश्चन मातुलः आसीत्। सः मम पक्षधरः। तस्य साहाय्येन नटेश्वरेण सह विवाहः अभवत्। सः एव मातुलः अस्मिन् जन्मनि मम पितृव्यः अस्ति"।

"त्वं किमर्थम् उन्मत्ता इव वदसि मानिनि?" इति तस्याः माता वदन्ती- "कः नटेश्वरः आसीत्? कः त्वदीयः मातुलः? त्वं च का? इत्येतत् सर्वं भगवान् एव जानाति। यत् किमपि त्वं वदन्ती असि तत् सर्वं तव भ्रान्तिः अस्ति। अत्र कापि प्रामाणिकता नास्ति" इति।

"तर्हि भवत्याः मनः यथा इच्छति तथा करोतु। मयि भवत्याम् इव बुद्धिः नास्ति। भवती मम पूज्या। अहं भवत्याः आज्ञायाः उल्लङ्घनं न करिष्यामि"।

एतावत् उक्त्वा क्षणं विरम्य पुनः सा- "किम् अहम् इदानीम् इतः गच्छानि?" इति पृच्छन्ती भूमिम् अपश्यत्।

"न, तिष्ठ तावत्!" इति ताम् अवरुध्य मङ्गलः- "एषः नटेश्वरः कः? कथं ज्ञातुं शक्यते यत् एषः सः एव नटेश्वरः यं त्वं जानासि? रामुः तव मातुलः आसीत् इति कथम् अवगन्तुं शक्यते?" इति मानिनीम् अपृच्छत्।

"मदीयं मनः एवं वदति। तथापि अहं सप्रमाणं निरूपयितुं न शक्नोमि। अतः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एव वदामि भवान् यथा वदति तथा आचरिष्यामि"।

इत्येवम् उक्त्वा सा उत्थितवती। ताम् न कोऽपि अवरुद्धवान्। सा उपवेशनस्थलात् निर्गत्य पुनः पाकशालां गतवती। तत्र गत्वा दधिमथनम् आरब्धवती च। धरर्र घूँ .... धरर्र घूँ .... इति दधिमथनपात्रस्य ध्वनिः तत्र श्रूयमाणः आसीत्।

६

रामुः मोहिनी मङ्गलः अर्चकवर्यः च मानिन्याः गमनस्य अनन्तरं परस्परं मुखं पश्यन्तः आसन्। बहुकालं यावत् सर्वे स्वगतम् एव विचारमग्नाः आसन्। तदा रामुः सर्वान् स्वप्नलोकात् आनयन् इव अवदत्- "भ्रातः, गुरुदेवः यदि ऐषिष्यत् तर्हि भवति सम्मोहिनिमन्त्रस्य प्रयोगं कृत्वा मानिन्याः पाणिग्रहणं कृत्वा च इतः अगमिष्यत्। किन्तु सः तथा कर्तुं न ऐच्छत्। भवान् विचारं कृत्वा वदतु यत् एषः विवाहसम्बन्धः भवता अङ्गीक्रियते उत न। अस्मिन् विषये गुरुदेवेन सह अपि भवता विमर्शः करणीयः इति मम निवेदनम् अस्ति। यदि मानिनी पृष्टा तर्हि गुरुदेवस्य पृच्छाकरणेन का हानिः?" इति।

अर्चकवर्यस्य मनसि कोऽपि उपायः अस्फुरत्। सः मङ्गलम् अपश्यत्। तदा मोहिनी- "अस्तु! तम् आह्वयतु। अद्य एव निर्णयः भवेत्। यदि विवाहः भवति तर्हि भवतु नाम। नोचेत् अहं तव गुरुदेवस्य पादौ स्पृष्ट्वा वदिष्यामि यत् भवान् इतः निर्गच्छतु कृपया। मम पुत्र्याः मनसः शान्तिभङ्गः न करणीयः भवता" इति।

मङ्गलस्य मातृगृहात् जगदीशचन्द्रः आहूतः। तस्य आगमनस्य पश्चात् पुनः विवाहविषयः आरब्धः। तदा मङ्गलः- "गुरुदेव, मानिन्याः विवाहविषयः चर्च्यमानः अस्ति अस्माभिः। भवन्तं विम्रष्टुम् आहूतवन्तः" इति जगदीशचन्द्रम् उक्तवान्।

जगदीशचन्द्रः स्मितं कुर्वन्- "मया सह चर्चाकरणस्य कोऽपि लाभः नास्ति। अत्र मदीयः स्वार्थः अस्ति। मदीयः विमर्शः अपि स्वार्थमयः एव भवेत्" इति मङ्गलम् अवदत्।

"भवान् धार्मिकः जनः अस्ति। वयं भवति विश्वसिमः। भवान् मम पुत्र्याः हिताय एव निःस्वार्थभावेन वचनं वदेत्। नगरस्य कस्यचित् चौधरिसागरचन्दस्य पुत्रस्य विवाहार्थं प्रस्तावः आगतः अस्ति। वरः 'एम. ए.' पदवीधरः। अस्मिन् समये सर्वकारीये विभागे उन्नते पदे कार्यरतः अस्ति। उपसहस्रं तस्य वेतनम् अस्ति। दर्शनेन अपि स्वस्थः सुन्दरः सुशीलः च प्रतिभाति इति। उच्यतां भवतः कः अभिप्रायः?" इति।

"समीचीनः वरः" इति जगदीशचन्द्रेण उक्तम्।

"तर्हि किं भवतः अभिप्रायः एतस्य सम्बन्धस्य कृते अनुकूलः अस्ति?"

"एतस्य सम्बन्धस्य अपेक्षया अन्यः उत्तमः सम्बन्धः न लभ्यते किम्?"

"इदानीं तु नास्ति"।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"कस्यचित् अनुत्तमस्य सम्बन्धस्य विषयः मया अपि ज्ञायते" इति सः किञ्चित् विचारयन्- "शतात् वर्षेभ्यः पूर्वं नेपालस्य राजधान्याः काष्ठमण्डपस्य उत्तरस्यां दिशि विंशतिमीलमिते दूरे टोची इति नामके ग्रामे भामिनी नामिका काचित् कन्यका कस्यचित् ब्राह्मणस्य पुत्री आसीत्। राजकुटुम्बस्य कश्चन नटेश्वरनामकः युवकः अटन् तं ग्रामम् प्रति आगतः। सः तस्यां स्नेहवशात् तत्रैव वासं कर्तुम् आरब्धवान्। भामिनी तु ब्राह्मणस्य पुत्री आसीत्। नटेश्वरः क्षत्रियवंशीयः। तथापि नटेश्वरस्य प्रयत्नकारणात् तयोः विवाहः सञ्जातः। कस्मिंश्चित् सुन्दरे गृहे तयोः आवासः आसीत्। दौर्भाग्येण कश्चन सर्पः नटेश्वरं दष्टवान्। तेन तस्य मरणं जातम्। भामिनी तु स्वस्य संतानपालनार्थं जीविता आसीत्। नटेश्वरस्य पुनः जन्म अभवत्। सः अवधजनपदस्य मिर्जापुरनामके ग्रामे कस्यचित् भूस्वामिनः गृहे आसीत्। विन्ध्याचलस्य कस्यचित् भूस्वामिनः पुत्र्या सह तस्य विवाहः समजायत। किन्तु तयोः मध्ये सामञ्जस्याभावात् केषाञ्चित् वर्षाणाम् असफलविवाहितजीवनात् च अनन्तरं नटेश्वरः आत्मानं गङ्गायां विसर्जनम् अकरोत्। तत्पश्चात् तस्य जन्म जम्मूप्रदेशस्य समीपे ऊधमपुरनामके ग्रामे साधारणस्य भूस्वामिनः गृहे अभवत्। स्वस्य दशमे वयसि सः गृहं परित्यज्य लद्दाखमार्गेण तिब्बतं गतवान्..........

"तत्र कश्चन बौद्धभिक्षुकः तस्मै पञ्चदशवर्षाणि यावत् योगाभ्यासस्य शिक्षणम् अयच्छत्। ततः प्रत्यागतं नटेश्वरं तस्य बन्धवः धनार्जनं कर्तुं विवशम् अकुर्वन्। नटेश्वरः स्वस्य सिद्धिबलेन योगबलेन च सार्धैकमासाभ्यन्तरे एव सार्धैकलक्षं रूप्यकाणि संगृहीतवान्। ततः ग्रामं प्रत्यागत्य किञ्चन नूतनं गृहं निर्माय तस्मिन् गृहे वासं कर्तुम् आरब्धवान्। दशवर्षेभ्यः तस्मिन् गृहे वासं कुर्वन् योगाभ्यासं च कुर्वन् तेन भूतं भविष्यत् च अवगतम्। तदनन्तरं तेन ज्ञातं यत् सियालकोटस्य पार्श्वे बडाग्रामे भामिन्याः जन्म जातम् अस्ति इति। सः तस्याः पाणिग्रहणं कर्तुम् ऐच्छत्। तस्मिन् समये सा केवला नववर्षीया आसीत्। तस्मात् षट् वर्षाणि इतस्ततः अटित्वा इदानीं पुनः सः अत्र विवाहार्थम् आगतः। भगवान् भवन्तं तस्याः संरक्षकं कृतवान् अस्ति" इति सः मङ्गलं सविस्तरं स्वस्य आगमनस्य उद्देशम् उक्तवान्।

"यदि वयं भवतः कथने न विश्वसिमः तर्हि भवान् किं करिष्यति? मानिन्याः विषये भवतः किं चिन्तनं भवेत्?"

"अहं मानिनीं पत्नीरूपेण अङ्गीकरोमि। तथापि अहं चिन्तयामि यत् दम्पत्योः सम्बन्धः स्वामिसेवकयोः सम्बन्धः इव नास्ति। पत्नी काचित् धेनुः अजा वा नास्ति यस्याः ग्रीवायां रज्जुबन्धनं कृत्वा गृहं प्रति सा नेतुं शक्येत। सा मया सह गमने अगमने वा पूर्णतया स्वतन्त्रा अस्ति। भवतः स्वस्य च इच्छायाः अनुगुणं व्यवहारं कर्तुं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सा पूर्णरूपेण अधिकारिणी अस्ति। मयि शक्तिः अस्ति चेत् अपि तस्याः उपरि बलप्रयोगं न करिष्यामि"।

"श्रीमन् जगदीशचन्द्र!" इति सम्बोधयन् बृजलालः अवदत्- "भवदीया कथा अद्भुता अस्ति। एषा तावती आश्चर्यजनिका अस्ति यत् अस्मत्सदृशाः अल्पज्ञाः प्राणिनः एतस्याः गाम्भीर्यम् अवगन्तुं न शक्नुवन्ति। तस्मात् कारणात् यदि मानिन्याः मातापितरौ एतस्याः विवाहः भवता सह अकृत्वा अन्यत्र कर्तुम् इच्छतः तर्हि किं भवान् मानिन्याः आत्मशान्त्यर्थम् इतः गमिष्यति?" इति।

"निश्चयेन गमिष्यामि। तथापि एतत् वक्तुम् इच्छामि यत् यदि मानिन्याः इच्छायाः विरुद्धम् अन्यत्र विवाहं करिष्यति तर्हि सम्यक् न भवेत्। अहं कृष्णः इव रुक्मिण्याः अपहरणं कर्तुं न आगमिष्यामि। किन्तु रुक्मिणी अपि शिशुपालस्य पत्नी न भविष्यति। एवं मयि विश्वासः अस्ति.............

"अहम् इदानीं गन्तुम् इच्छामि। द्वित्राणि दिनानि इतोऽपि अस्मिन् ग्रामे अस्मि। तावत् भवान् सम्यक् विचार्य निर्णयं कृत्वा मां सूचयतु"।

इत्युक्त्वा जगदीशचन्द्रः उदतिष्ठत्। सर्वान् प्रणम्य ततः निरगच्छत् च। रामुः गुरुदेवाग्रजयोः मध्ये प्रवृत्तं सर्वं सम्भाषणं तूष्णीं भूत्वा शृणोति स्म। जगदीशचन्द्रस्य गमनस्य पश्चात् सः मुखम् उद्घाटयन्- "भ्रातृजाये, मदीयं वचनं पालयतु। एषः विवाहः भवतु। नोचेत् अनिष्टं भवेत्" इति।

"एतत् तु तव गुरुः अपि उक्तवान्। मम विश्वासः अस्ति यत् मानिन्याः जीवनं सागरचन्द्रस्य पुत्रेण नागरचन्देन सह सानन्दं व्यतीतं भविष्यति। इदानीं त्वं वद। तव गुरोः पार्श्वे का सम्पत्तिः अस्ति? का शिक्षा अस्ति? किं वाणिज्यम् अस्ति? पुनः, पञ्चाशता वर्षीयेण वृद्धेन सह षोडशवर्षीयायाः कन्यायाः विवाहः कथं भवितुं शक्यते?"

"भ्रातृजाये, यदा सत्याः विवाहः शङ्करेण महादेवेन सह जायमानः आसीत् तदा एताः एव युक्तयः दक्षस्य परामर्शकैः दीयन्ते स्म। परिणामः कः जातः? किं भवती अपि तम् एव परिणामम् इच्छन्ती अस्ति?"

"तर्हि किं त्वं स्वकीयं गुरुदेवं भगवतः शङ्करस्य अवताररूपं मन्यसे?"

रामोः मुखं नैराश्येन अप्रत्याशितायाः आशङ्कायाः कारणतः पीतवर्णमयं जातम् आसीत्। तथापि सः अन्तिमं प्रयत्नं कुर्वन्- "भ्रातृजाये, भवती धनसम्पदः लोभं करोति खलु?" इति अपृच्छत्।

"नैव! अहं समानवयसोः आदरं करोमि" इति मोहिनी अवदत्।

रामुः इतोऽपि किमपि वक्तुम् असमर्थः जातः। सः ततः उत्थाय मातृगृहं प्रति गतः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१०

मोहिनीमङ्गलयोः मध्ये दिनद्वयं रात्रिन्दियं च विमर्शः जातः। मङ्गलः अर्चकवर्येण बृजलालेन सह एतस्मिन् विषये समालोच्य पुनः मोहिनीं वदति स्म। परन्तु तस्यां नारीहठः आसीत्। परिणामतः जगदीशचन्द्रः बडाग्रामं परित्यज्य संसारसागरे विलीनः अभवत्। परेद्युः यदा रामुः उत्थितवान् तदा गुरुदेवस्य शय्या रिक्ता आसीत् इति तेन दृष्टम्। सः ग्रामं त्यक्त्वा गतवान् आसीत्। रामुः तु तस्य अन्वेषणस्य अपेक्षया गृहे मानिन्याः सहायतार्थं स्थितिः एव वरम् इति अमन्यत। अतः सः गुरुदेवस्य पृष्ठतः न गतः।

एकस्मिन् दिने चौधरिसागरचन्दस्य गृहात् स्त्रियः आगत्य मानिन्याः हस्तयोः रागाङ्गीं लेपितवत्यः। परेद्युः मानिनी उत्थाय देवस्य पुरतः विद्यमाने आसने उपविश्य पूजाम् अकरोत्। पूजायां नैकाः घण्टाः व्यतीताः अभवन्। तस्मात् कारणात् यदा मोहिनी ताम् आप्रष्टुम् तत्र आगता तदा स्वशिरः भूमौ अवनम्य देवप्रणामम् अर्पयन्तीं मानिनीं दृष्ट्वा, सा बहिः एव स्थिता जाता। किन्तु बहूनां निमेषाणाम् अनन्तरम् अपि यदा सा न उत्थिता तदा अन्तः गत्वा शनैः अवदत्- "मानिनि! मानिनि! ...." इति।

बहुकालं यावत् तथैव भूमौ तस्याः अवनतं मस्तकं परिशील्य मोहिनी तस्याः शरीरम् अकम्पयत। तथा कृते मानिन्याः शरीरम् अधः भूमौ अपतत्। माता तस्याः शरीरम् अस्पृशत्। मानिन्याः शरीरं शीतलं जातम् आसीत्। सा तस्याः नेत्रयोः पक्ष्मणी उत्थाप्य दृष्टवती। नेत्रे प्रस्तरमये आस्ताम्।

सा हताशा सती तत्रैव उपविष्टवती। तस्याः कण्ठः स्तम्भितः जातः। नेत्राभ्याम् अश्रुधाराप्रवाहः प्रवाहिता जातः।

यदा मङ्गलः आगच्छत् तदा सः अपि प्रवृत्ताम् एतां घटनां दृष्ट्वा प्रक्षुब्धः आसीत्। सः अपि स्वशक्त्या मानिनीं जीवितां कर्तुं प्रयत्नम् अकरोत्। किन्तु कोऽपि लाभः न जातः।

Bhawan's Sri Sankaracharya ... Bharatiya Mahavidyalaya

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

...wan's Sri Sankarachary... Bharatiya Vid... Mahavidyala...

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

साहित्यकारः गुरुदत्तः [illegible] निदर्शकत्वेन कार्यम् अकरोत्। ततः नेशनलस्कूलनामके संस्थाने प्रधानाध्यापकत्वेन कार्यम् आरब्धवान्। उत्तरप्रदेशे अमेठी इति जनपदस्य विधायकस्य कुंवररणञ्जयसिंहस्य सचिवः अपि आसीत्। ततः लक्ष्मणपुरम् आगत्य चिकित्साकार्यं प्रारब्धवान्। लक्ष्मणपुरतः जन्मस्थलं लाहौरम् आगत्य पुनः १९३७ तमे वर्षे देहलीम् आगतः।

श्रीगुरुदत्तः चिकित्साकार्यं कुर्वन् लेखनकार्यम् अपि अकरोत्। १९४२ तमे वर्षे एतस्य प्रथमः 'स्वाधीनता के पथ पर' उपन्यासः प्रकाशितः अभवत्। एतस्मिन् उपन्यासे राजनीतेः सामाजिकतायाः च अद्भुतं मिश्रणम् आसीत्। हिन्दीजगति एतेन उपन्यासेन अत्यन्तं ख्यातिः अर्जिता। तस्मात् उत्साहितः सन् साहित्यकारः गुरुदत्तः 'पथिक', 'स्वराज्यदान' इति कृतिद्वयम् अरचयत्।

विज्ञानपृष्ठभूमौ स्वस्य विश्लेषणात्मकबुद्ध्या यदा वेदादिशास्त्रम् अधीतवान् तदा सः तत्रत्यं विशालं ज्ञानराशिं दृष्ट्वा तत्रैव अरमत। परिणामतः वेदम् अन्यान् च शास्त्रीयग्रन्थान् आधारीकृत्य शास्त्राणां युक्तिपूर्वकं विश्लेषणं कुर्वन् गुरुदत्तः अत्यन्तं सरलया सुबोधगम्यया भाषया नैकेषां ग्रन्थानां रचनाम् अकरोत्। तेषु 'मायाजाल' इति अन्यतमः उपन्यासः।

डा. कैलासपतिः झा देहलीनगरवासी न्यायाचार्यः, व्याकरणाचार्यः च। केन्द्रीयविद्यालये अध्यापकः, बहुभ्यः वर्षेभ्यः संस्कृतप्रचारकार्येषु रतः च। संस्कृतगृहविषये संस्कृतमाध्यमेन पाठनविषये च झामहोदयस्य महान् आग्रहः, तद्विषये सः सर्वदा प्रयत्नशीलः च।

Funding by IKS-MoE

मूल्यम् - रू. ५५/-

ISBN - 978-81-87276-82-7